ಪಂಚಾ[illegible] (ಯ[illegible] ಚರಿತೆ

(ಮನ್[illegible] ವಿರಚಿತ)





శ్రీ
ఇదం పుస్తకం [illegible] పల్లగుమ్మి శ్రీ వేం[illegible]

[illegible]

[illegible] ति-अ- अनंताचार्यस्येदं - मञ्जुदेवी पुस्त[illegible]

पुल्लगु मिवेंकटाचार्यं प्रति क्रयार्थं दत्त [illegible]

[illegible]

[illegible]

[illegible]तवरतन लालके मकान में चौवा
[illegible]नने परिभाखेंदुशेखरकी टीका म
[illegible]तरवा महेस पांडे जिस्को लेना हो
[illegible] वादेबीप्रसाद तिवाडी के दुकान पर
[illegible]लके पास मिलेगी

[illegible]प्रत्याहार[illegible]

प॰टी॰ श्रीगणेशाय नमः॥ नत्वा गणपतिं देवं नृसिंहं कमलायुतम्॥ तातं शंभुं प्रसूं दुर्गां कृष्णदेवं तथाग्रजम्॥ शास्त्रप्रवर्तकाचार्य्यान्पा-
१ णिनिप्रभृतीन्मुनीन्॥ बालंभट्टाभिधं पायगुण्डोपाख्यं परं गुरुम्॥ दोषाय पण्डितम्मन्यैः परिभाषेन्दुशेखरे॥ दत्तास्तान्सम्यगुद्धर्तुमेतत्तु
दैवेन चिन्त्यते॥ शिष्यशिक्षायै प्रसंगतोऽन्येषां मङ्गलाय चोपास्यदेवतानतिमुपनिबध्नन् चिकीर्षितं प्रतिजानीते॥ नत्वा साम्बशि-
वमिति॥ अम्बाशब्देन प्रकृतिर्माया तया सहितः शेतेऽस्मिन्जगदिति व्युत्पत्त्या जगत्स्थित्यधिकरणम्· इह तेर्वृद्धयति· अन्तर्भावि-
तण्यर्थो हि ह्रते मेनिनिश्रजा वर्द्धकमिति पदत्रयेण सङ्घारिकत्वं तस्य बोधितम्॥ यद्वा निराकारस्य ब्रह्मणो नत्याद्यसंभवात्साम्ब-
शिवमिति। तथा च तेन सृष्ट्याद्यर्थं साक्षात्साम्बशिवाकारत्वमेव स्वस्य कल्पितेन च शिवाकारेण स्वोपयोगाय शिष्याद्याकारकल्पन-
मिति शिवस्वरूपके न प्राधान्यं बोधितम्॥ नागेशः इति॥ यद्यपि आत्मनाम गुरोर्नामेत्यभियुक्तोक्तेः स्वनामग्रहणं स्वस्य निषिद्धं तथापि
प्रत्यभिवादे इति सूत्रस्थभाष्यकैयटप्रामाण्येन नामग्रहणमभिवादयेदिति धर्म्मशास्त्रप्रामाण्येन च सामान्यनिषेधस्य वैधनाम-
ग्रहणातिरिक्तविषयकत्वकल्पनात्॥ याज्ञीयहिंसाविधिना नहिंस्यादिति सामान्यनिषेधस्य वैधहिंसातिरिक्तविषयकत्वकल्पन-
वत्॥ स्वकीर्त्यनुवृत्तये स्वनामग्रहणे स्वशिष्टाचारानुगृहीतस्य तद्बोधकस्मृत्यनुमिति इत्थं विधत्वं प्रकृतेऽप्यस्त्येवेति न दोषः। यद्वा तन्नि- एम
षेधस्य पारिभाषिकनामविषयत्वेन यौगिकनामविषयत्वं रूढेर्बलवत्त्वात्॥ अत एव गोनर्दीयस्त्वाहेति भाष्यकारस्य यौगिकनामग्र- १

हणं संगच्छते प्रकृते च नागेशः प्रवर्त्तको यस्येति यौगिकत्वान्न निषेधप्रवृत्तिः। तेन च भाष्यस्थितसिद्धान्तमेवात्र विषयतां तज्जिज्ञासूनामे-
तदधिकार इति सूचितम्॥ यद्वा॥ मया क्रियत इत्यनुक्त्या नागेशः कुरुत इति ताटस्थ्येनोक्त्या तन्निरासः॥ एवं च प्रयोजननामग्रहणमि-
ति निषेधाप्रवृत्तिः॥ अहंकृतिनिरासरूपफलस्य स्वात्मगामित्वात्कुरुत इत्यात्मनेपदोपपत्तिरिति तु न सम्यक्· तस्य प्रत्ययाभावस्यैव पुरुषा-
र्थत्वेनानुद्देश्यत्वेनाफलत्वात्॥ प्रथमपुरुषफलतायास्तस्मिन्नकुम्भकत्वेऽपि आत्मनेपदफलतायास्तस्मिन्नसंभवाच्च॥ कुरुत इति। ननु
ग्रन्थकरणफलस्य सुखबोधरूपस्य बालानामित्यनेन परनिष्ठत्वबोधनादात्मनिष्ठत्वाभावादात्मनेपदाप्राप्तिरिति चेन्न काव्यं यशसेऽर्थ-
कृत इति काव्यप्रकाशबोधितयशःप्राप्त्यादिरूपफलस्य काव्यकर्तरीव ग्रन्थकर्तर्यपि यशःप्राप्त्यादिरूपफलस्य स्वगतस्यैवार्थप्रकाश-
नरूपस्य वा लौकिकफलस्योद्देश्यत्वादात्मनेपदसिद्धेः। चन्द्रायोन्मीलितमिति न्यायेन सुखबोधस्य परनिष्ठत्वमपीत्याह॥ बालानामि-
ति· परिभाषेन्दुशेखरमिति। परव्याख्यानन्तु गरादोऽवधेयम्॥ व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम्·। तेनाणुदिति।
व्याख्यानेनेत्यर्थः॥ परन्तु व्याख्यानस्य दुर्ज्ञेयत्वादगतिकत्वाच्च तत्र तत्र ज्ञापकोपन्यासोऽपि यथाणुदित्सूत्रे परेण प्रत्याहारे उरर्दिति तपर-
करणं ज्ञापकमुक्तं शब्देन्दुशेखरे· तथा हि। पूर्वेण प्रत्याहारे ऋकारस्याण्त्वाभावात्सवर्णग्रहणाप्रसक्तेस्तन्निष्फलम्·। न च तपरसूत्रे णत्व-
कारग्रहणार्थं तस्यानेऽन्तरतमपरिभाषया ऋकारस्य स्थाने तस्य वारणे न तद्ग्रहणे फलाभावादिति व्यर्थं सत्परेण प्रत्याहारे ज्ञापकमधि-

प॰टी॰ कन्तत्रैव स्पष्टम्। ननु नवेत्यादिशङ्कैव नावतरन्न संगच्छते सूत्रकृन्मते ऋकारऌकारयोः सावर्ण्याभावेन तद्ग्रहणस्य दुर्वचत्वात्। न
२ परसूत्रे समानकालत्वात्सवर्णनिर्देशाय सवर्णपदानुवृत्तेरावश्यकत्वाद्वार्त्तिककृन्मतेन तत्संभवेपि अणुदित्सूत्रेऽणग्रहणस्य तेन प्र
त्याख्यातत्वात्पूर्वेण परेणैव नित्सद्ग्रहाभावात्। एतेनोपसर्गादृतीति सूत्रे तपरकरणादणुदित्सूत्रेऽणग्रहणं परेणेति न युक्तं ऌ
कारग्रहणे चारितार्थ्यादिति शेखरोक्तमपि निरस्तमिति तच्चिन्त्यम्। उरण्रपर इति सूत्रे रप्रत्याहारस्य तवमते सत्त्वेन तस्य च तयोः सा
वर्ण्यसत्त्व एव सफलत्वेन सूत्रमतेपि तयोः सावर्ण्यानुमानात्। सिद्धान्ते रप्रत्याहाराभावेन तस्यानुमायकत्वासंभवेपि अकोकि दीर्घ इ
त्येव वाच्ये हि तल्लकारस्ये तदर्थं कृतेनाकः सवर्ण इति सवर्णग्रहणेन प्रथमयोः पूर्व इत्येव वक्तव्ये गमृनित्ये तदर्थं कृतेन सवर्णग्र
हणेन च सूत्रमतेन तयोः सावर्ण्यानुमानमन्यथोरिति ऋकारेण ऌकारग्रहणस्यैवाभावात् लपरत्वविधानवैयर्थ्यापत्तेः न हि ऌकार
ग्रहणमपि चोदितं भाष्ये॥ ननु सवर्णग्रहणमपरिभाष्यमाकृतिग्रहणादिति वार्त्तिकमते प्राप्लकारीयतीत्यादौ सवर्णसंज्ञामात्रे
ण न निस्तारः॥ ऌकारस्य ऋत्वजात्यनाक्रान्तत्वात् ततः सावर्ण्यवचनस्थाने ऌवर्णस्य ऋवद्भावो वाच्यः। न चैवं होतृकार इत्यत्र साव
[illegible]तामत्तकरीर्घानापत्तिरिति वाच्यम्। ऌति ऌ वेति वा ग्रहणेन दीर्घस्यापि समुच्चयेन विधानात्॥ तथा च सावर्ण्यानङ्गीकारेपि एम २
ऋवद्भावेनोरिति ऋकारेण ऌकारस्यापि ग्रहणेन तत्स्थानिकाणो लपरत्वविधानेन भाष्योपपत्तेः। कथं सावर्ण्यानुमानमिति चे

त्सत्यम्। जातिपक्षे तथा सिद्धान्तस्य शब्देरत्नादौ प्रतिपादनेपि व्यक्तिपक्ष एवाणग्रहणसत्त्वेन तत्रैव ज्ञापकोपन्यासात्॥ व्यक्तिपक्षा
भिप्रायेणैव ऋऌवर्णयोः सावर्ण्यवचनमवलम्ब्य वाष्टवचनद्वयप्रत्याख्यानपरतुल्यास्यसूत्रस्थभाष्यसंगतिरपीति न भाष्ययोर्वि
रोधः। ननु तत्र किं पुनरत्र ज्यायः सवर्णसंज्ञावचनमेव ज्यायः इत्युपक्रम्य यदि तर्हि ऋकारग्रहणे ऌकारग्रहणं सन्निहितं भवति उ
रान् ऋलृकारस्यापि रपरत्वं प्राप्नोति ऌकारस्य लपरत्वं वक्ष्यामि तच्चाप्यवश्यं वक्तव्यमसत्यां सवर्णसंज्ञायां विध्यर्थं तदेव सत्यां रे
फबाधनार्थमिति तुल्यास्यसूत्रस्थभाष्येण सवर्णसंज्ञावचनानारम्भे ऌकारघटितस्यैव लपरत्वं वचनस्य कर्त्तव्यतायाः प्रतीते
तदारम्भे तु तद्घटितस्यापीत्यन्यत्। एतेन वार्त्तिकमते स्थितत्वे वै तद्भाष्यप्रवृत्तिरित्यपास्तमिति दिक्। किञ्च वार्त्तिककृदुक्तजातिप
क्षे उक्तरीत्या ऋऌवर्णयोः साजात्यातिदेशसत्त्वेपि सावर्ण्यासत्त्वेन वार्त्तिककृन्मतेन तत्संभवेपीत्यस्याज्ञानविजृम्भितत्वमेव॥ प्र
त्युत वार्त्तिककृन्मतेन तत्संभवेपीत्युक्ता व्यक्तिपक्षाभिप्रायेणैव सावर्ण्यसंभवसत्त्वयाबोधनात्। अत एव तुल्यास्यसूत्रे भाष्ये तयोः
स्थानभेदादसावर्ण्यमाशङ्क्य व्यक्तिपक्षाभिप्रायेणैव ऋऌवर्णयोः सावर्ण्यवचनमवतारितम्। एतस्य जातिपक्षाभिप्रायकत्वे सा
वर्ण्यमात्रेण निस्तारात् समानजातित्वमेव विधीयेत॥ तस्माज्जातिपक्षेऽणग्रहणाभावस्तयोः समानजातित्वातिदेशश्च व्यक्तिपक्षे वा
णग्रहणं तयोः सावर्ण्यं चेति सर्वं सुस्थम्॥ ननु सिद्धान्ते जातिपक्षे तुल्यास्यमिति सवर्णसंज्ञाविधिप्रदेशे एव समाने जातिविधान

प॰दी॰ ३ मनुचितंप्रकरणविरोधादितिचेन्न।। कालाध्वनोरत्यन्तसंयोगेइत्यस्यस्थानेकालाध्वनोरत्यन्तसंयोगेकर्मवद्वाधर्थमितिद्विती
याप्रकरणेकर्मवद्भावविधानस्याधीगर्थदयेशांकर्मणीतिषष्ठीप्रकरणेकर्मादिष्वकर्मवद्वादविरुद्धस्यान्यत्रदर्शनाददोषात्।। त
त्राद्येधात्वर्थभेदस्वीकाराद्द्वितीयेशेषेइत्यनुवर्त्यचप्रत्याख्यानमित्यन्यत्।। उक्तवैरूप्यवारणायतुल्यास्यसूत्रेणापिसमानजातित्व
मेवविधीयतेइतितुवहुसमाधेयत्वाद्दुरूहमस्वरस्वरसाननुगुणंचेत्युपेक्षितमित्यलम्। यथोद्देशसंज्ञापरिभाषंकार्य्यकालंसंज्ञा
परिभाषम्।। नचकार्य्यकालपक्षेङमोह्रस्वादित्यादाविति। यत्तुपत्रापिविप्रघपीदंशत्वेनपरत्वात्त्रिपाद्यांप्रवृत्तिःप्रधानसंस्कारायेष्यते
यथाङमोह्रस्वादित्यादौसप्तमीपञ्चम्युभयनिर्देशेपरत्वात्पञ्चमीनिर्देशस्यतदर्थन्तुनमुनेइतिसूत्रेघुनेतिवदमुनेतिवक्तव्येनेत्यु
क्तेर्योगविभागोनपूर्वत्रासिद्धत्वाभावःकैयटादिभिर्वर्णितस्तत्राश्रयणीयोऽयंवानपदान्तसूत्रेत्रैपादिकानांद्विर्वचनादीनांकेषा
ञ्चिद्ग्रहणेनेदुदुपधस्येतिसूत्रेप्रत्ययस्येत्युक्तेवाप्रधानीयसंस्काराणांकचित्त्रिपाद्यांप्रवृत्तिरङ्गीकरणीयेतियथोद्देशपक्षेऽपीदंभा
ष्यांशोऽयमसुलभश्चिन्त्यम्।। योगविभागस्यभाष्येदर्शनेनवार्त्तिककृत्पठितसिद्धकाण्डवैयर्थ्येनचाप्रामाणिकत्वात्।। द्विर्वचना
दिग्रहणस्यभाष्येप्रत्याख्यानाच्च।। वृत्तिघटितानामतिदेशानांत्रिपाद्यांप्रवृत्तिज्ञापनार्थत्वाद्वा।। अतएवाग्निरित्यादौविसर्गसिद्धि रामः ३
अप्रत्ययस्येतिनिषेधश्चसार्थकः। वस्तुतःप्रत्ययः पदस्यतत्सम्बन्धिपरत्वेनप्रत्ययसम्बन्धिभिन्नस्येत्यर्थस्यशब्दरत्नादौव्यवस्था

पितत्वादितिवोध्यन्तस्माद्यथोद्देशपक्षेऽपीतद्भाष्ययोजनमसंगतमेवत्रिपाद्याअसिद्धत्वेनपरिभाषयोस्तत्राप्रवृत्त्यापत्तेरतःकार्य्य
कालपक्षएवाशंक्यसमाध्यते।। विप्रतिषेधसूत्रेइति।। यत्तुएतत्सादिसारम्भोगोभवतीत्यनेनमूलमनूद्यतद्भाष्यवार्तिकविरुद्धन्तथाहिअ
मीॐआमूअत्रेत्यादौमीत्वादेरसिद्धत्वात्स्यादयःप्राप्नुवन्ति। अदसोमादितिप्रगृह्यसंज्ञायास्तुनसामर्थ्यंकार्य्यकालपक्षेऽपिप्रगृ
ह्यस्येत्येतदेकवाक्यतापन्नानाम्प्रतिमीत्वादेःसिद्धत्वेनसामर्थ्यस्योपक्षीणत्वाददेतोऽयादीनाम्प्रतिषेधोवक्तव्योविप्रतिषेधाद्वा।
कार्य्यकालपक्षेऽदसोमादितिसूत्रेऽलुप्तप्रगृह्याइत्येतद्देशस्थंपरत्वादयादीन्बाधतेइत्यदसोमादितिसूत्रेभाष्यवार्त्तिकयोरुक्तत्वा
च्चसमाधानद्वयंस्वदेशत्यागकल्पनंविनाकथंसंगच्छतामित्याहुस्तच्चिन्त्यम्। उक्तभाष्यात्कार्य्यकालसंज्ञेवस्वदेशत्यागमवलम्ब
तेइत्यर्थस्यसंज्ञाशास्त्रस्यत्वित्यादिनाभाष्येउक्तमित्यनेनग्रन्थेनमूलकृतैवावेदितत्वात्कार्य्यकालायाःपरिभाषायाःस्वदेशत्या
गानङ्गीकारेऽपिक्षत्यभावात्।। यदपिसंज्ञायाःस्वतोविरोधात्कार्य्यविशेषवोधोत्तरमेवविरोधप्रतिसन्धानंचेतितत्रत्यपरत्वमेवनवि
प्रतिषेधसूत्रप्रवृत्तौवीजम्। परिभाषाविषयेतुआदेःपरस्यानेकाल्शित्सर्वस्येत्यादेःकार्य्यविशेषप्रतिसन्धानंविनापिविरोधसं
भवात्पाठकृतमेवपरत्वंविप्रतिषेधसूत्रप्रवृत्तौवीजमितिहित्वदभिमतंतन्नयुक्तम्। तस्मिन्नितितस्मादित्येताभ्यांपूर्वपरयोरेकस
म्वन्धित्ववोधनेस्वतोविरोधात्तुङ्मुडादिरूपकार्य्यविशेषप्रतिसन्धानेतुतस्यसत्वात्संज्ञायाइवपरिभाषायाअपिकार्य्यकालपक्षे

प॰ टी॰ पाठकृतपरत्वानापत्तावपरत्वात्पञ्चमीनिर्द्दिष्टो बलीयानिति भाष्यासंगत्यापत्तेरिति तदपि न कार्य्यविशेषप्रतिसन्धानं विनापि विधे
४ यत्किञ्चिद्विधेयसम्बन्धित्वमादौ यत्किंचिद्विधेयसम्बन्धित्वं सर्वस्मिन्निति स्वतो विरोधित्वं न स्यात्॥ अपि त्वेकः पूर्वपरयोरन्य
त्र पूर्वपरयोरित्युपादानात्। ङम इत्यादौ युगपद्द्वयोः परिभाषयोर्न प्रकल्पकत्वमिति न विरोध इत्युच्यते तदा कार्य्यविशेषप्रतिस
न्धानेपि युगपत्प्रकल्पकत्वाभावेन विरोधाभाव तदुक्तिर्व्याहतैवेति बोध्यम्॥ वस्तुतः परत्वादित्येकदेशयुक्तिः ङम इति पञ्चम्या
अचारितार्थ्येन न निरवकाशत्वादित्येव भाष्ये सिद्धान्त्यभिमतो हेतुरिति दिक्॥ अनेकान्ता अनुबन्धाः॥ अनुबन्धान्पक्षीकृत्य
नवयवत्वे साध्ये व्यतिरेकिणं हेतुं प्रतिपादयितुं व्यतिरेकव्याप्तिमाह॥ मीन्येति॥ तथा च णकाराद्यनुबन्धस्तदनवयवस्त
त्रानुपलभ्यमानत्वात्तस्य व्याप्याधिकरणकोपलब्धिविषयत्वाभावात्। यन्नैवमित्यनुमानप्रयोगः। एतेन हेतोर्वैयधिक
रण्याशंका निरस्ता। सिद्धान्तमाह। वस्तुत एकान्ता इति॥ अत्रापि णादिटकणकाराद्यनुबन्धेषु तदवयवत्वं साध्यते तत्रैवो
पलभ्यमानत्वात्तदन्याधिकरणकोपलब्धिविषयत्वाभावे सति तत्प्रत्यायकाधिकरणकोपलब्धिविषयत्वाद्यन्नैवन्तन्नैवमि राम॰
त्यनुमानप्रयोग इत्याह॥ नावयवो हीति॥ फले उपलम्भपदं कर्मप्रत्ययान्तं भावप्रधानम्। यद्वा भावप्रत्ययान्तमुपलब्ध्यर्थकं नियतत्वा ४
प्यनुमानप्रयोगः इत्याह्॥ ... 
हेतुरिति पूर्वोक्तानुमानं फलितम्। व्यर्थतापत्तेश्चेति। न च दध्नश्चकारेण स्वपूर्ववर्त्तित्वेव कार्य्यं ज्ञाप्यते नो तत्रात एव काश्यादिम्प्रष्ट

ञ्जिठावितिञ्जिठस्य ञ्जित्त्वं चरितार्थमिति बुभुक्षणीत्यादावनेकान्तत्वेपि न दोष इति वाच्यम्. एवमपि गौरवं भाष्यविरोधश्च मुख्यदूषण
मस्येवेत्याशयात्तदाहेदं चेति॥ नानुबन्धकृतमनेकान्तत्वम्॥ नन्वनुबन्धत्वयोग्यकृतमनेकान्तत्वमिति परिभाषार्थस्यान्यत्रोक्तत्वात्कथ
मानुपूर्व्यात्सिद्धिः कथितेति चेन्न दीक्षितानुरोधेनैतद्ग्रन्थस्य सत्त्वात्सर्वादेशस्तु प्रश्लेषेण बोध्यः। स्पष्टश्चायमर्थो लुटः प्रथमस्येति सूत्रेणैनि
त्यत्वात्सिद्धमेकदेशयुक्तभाष्यव्याख्यानावसर उद्योतकैयटस्याप्यत्रैव स्वरस इति तत्रैव स्पष्टम्॥ यत्त्वेकान्तत्वपक्षेऽनुबन्धकार्य्येऽनलि
धाविति निषेधादिति निषेधाप्रवृत्तयेऽनुबन्धानामल्व्यवहाराभावज्ञापकं शिद्ग्रहणमित्युक्तं शेखरे तन्मुधैवानुबन्धविनिर्मुक्तपदा
र्थोपस्थितेः सर्वसंमतत्वेन स्वयमपि तत्थेवानुरितत्वेन दोषानवकाशत्वादिति तन्मुधैवाण्णुदित्सूत्रभाष्यप्रामाण्याद्दृष्टत्वविधे
यत्वविषयतया बोधविषयतापा अनुबन्धविनिर्मुक्ते सत्यपि सानुबन्धकनिर्द्दिष्टस्यानित्वादेशत्वयोरनुबन्धविशेषे सूत्रोपात्तेण
वसत्वस्य ङ्क्निञ्चगाङ्कुटादिहलः एन इत्यादिसूत्रस्थभाष्यात्लाभेन तद्विरोधात्। स्पष्टश्चायमर्थः स्थानिवत्सूत्रे शेखरे. अत एवङ्
र्थ्यादेशस्य ग्रहो लिटीति दूटो दीर्घादेशस्य प्राप्तेः स्थानिभूतालोऽभावेनानल्विधाविति निषेधाविषयत्वेन स्थानिवत्त्वात्सुपि चेट
ढ्रीनि दीर्घसत्त्वापत्तयोः शभायायग्रहीदित्यादौ सिद्धिरेतत्सिद्धये निर्मितत्वानवच्छेदके दीक्षितोक्तासाधारण्यनिवेशो विफल एतेनोपस्थाप्यो
पस्थापकोभयवृत्तित्वेनेट्त्वादेः स्थान्यसाधारणधर्मत्वाद्यो हि स्थान्यल्त्वाश्रारणोऽल्त्वादिः स्थान्यल्पोऽडहल्त्वादिर्वा स एवानल्विधा

प॰टी॰ वृत्तिनिषेधेन निवर्त्यत इत्यपास्तम्॥ न चैवमपि स्थानिसम्बन्धी यो ल्विति द्वितीयार्थमादाय रमायाद्यही इत्यादेरसिद्धिरेव सुस्थेति॥
५ त्वादेरत्मात्र वृत्तिर्यः स्थानिसम्बन्धी तावच्छेदको धर्मस्तत्त्वादिस्तदवच्छिन्नस्थानिसम्बन्ध्येकारेकाररूपाल्लवृत्तित्वादत्त्वविधावि
तिनिषेधादिति चेत्सत्यमादेशविधावुपात्तस्थानिसम्बन्धितावच्छेदकधर्मस्य कार्य्यविधानुपादानेन निमित्ततावच्छेदकधर्मेणसह
सम्बन्धेनाल्मात्र वृत्तित्वरूपसाधारणधर्मेणवाऽभेदेएव द्वितीयार्थमादाय निषेधप्रवृत्तेरङ्गीकारादत एव शेखरे द्वितीयार्थव्याख्या
वसरे एव भूविवेत्यत्र दोषवारणाय यन्निमित्तं वैकल्येत्यादि पंक्तौ निमित्ततावच्छेदके फलितमसाधारण्यमुक्तमन्यथमार्थविषये तु न
सर्वत्र तयोरभेद इति न तत्र न योक्तमित्युपरिष्टाद्विवेचयिष्यामः। एतेन शब्दइदु पस्थान्यवयव इकार इति इत्त्वस्य अल्विधित्वेनन
द्वितीयार्थमादाय निषेधापत्तिः एव भूविवेत्यादावादेशसाधारणवल्वादिनिमित्तस्यदः स्थान्यलाश्रितत्वात्स्य प्रतिषेधनिवृत्तये।
स्थान्यल्साधारण्येनाश्रयणमङ्गीकर्त्तव्यं प्रीति पूर्वापरविरोधश्चेत्यपास्तमिति दिक्॥ नानुबन्धकृतमनेजन्तत्वम्॥ निर्दिश्योऽस
रूपा इति यदिनुमाङ्ग इतिकृतत्वानिर्दिश्योऽनुबन्धानामनेकान्तत्वे ज्ञापकस्तथापि सन्यवर्णस्तु इत्यादावनेकाल्त्वाभावात्सर्वादेशतापत्त्या
अध्येतरत्यादेशत्वसिद्धिरदादेशमुखमित्यत्र पकारसत्त्वेऽपि एजन्तत्वानपायादात्वेऽदाविति प्रतिषेधसिद्धिः। गोरदुत्यादौकालोऽ राम॰
सोरूप्याद्वासरूपन्यायाप्रवृत्त्याकेनारणोनित्यबाधसिद्धिश्चेति परिभाषात्रयंव्यर्थं तस्यलोप इति सूत्रस्थकैयटस्याप्येत्रैवस्वरसइत्यु ५

च्यतेन दाटिदादिवदुसुशब्देषुसमीपेऽवयवत्वारोपेणवहुव्रीहिः स्वीकार्य्यः अन्त्यादिपदयोस्तत्र तत्र लक्षणाश्रयणं वुन्छण्दावगति
कव्याख्यानादिस्वीकारस्तस्य लोप इति सूत्रस्थभाष्यविरोधश्चापद्येते निमाङ्रूपादिना तत्परिभाषार्थज्ञापकतैवसाध्वीति बोध्यम्। ए
तेनोक्तगौरवं भाष्यविरोधं च सहन्न परिभाषात्रयस्वीकारप्रयुक्तगौरवमसहन्न विपरीतवादिनानुमन्तव्यः॥ अनुबन्धस्यानेकान्त
त्वात्सिद्धमिति तत्र भाष्योक्तिस्त्वेकदेश्युक्तिर्न इति प्रदीपोद्योतेस्पष्टम्॥ नानुबन्धकृतमसारूप्यम्॥ विकल्पविधायकमिति। विकल्पा
र्थकविभाषापदघटितज्ञापकमित्यर्थः विभाषाग्रहणं ज्ञापकमिति यावत्॥ उभयगतिरिह भवति। त्यन्ताधादन्तावेति। ननुकतीति
त्यन्तासंख्या कृत्रिमाऽस्तीति त्यन्तप्रतिषेधो ज्ञापकएवेति वाच्यम्। अर्थवदनर्थकयोः कृत्रिमयोस्तिशब्दयोः संभवेएवैतत्परिभा
षासंचारात् विंशतिनप्रत्ययसत्वेनाति शब्दस्यानर्थकत्वाद्विंशादेशापत्तेति प्रत्ययस्यार्थवत्वप्यकृतिमत्वादत आह॰ षादन्तावेति
गुरुचरणाः अतएव कथं कृत्वा ज्ञापकं न हि कृत्रिम उक्तिः संगच्छते॥ यद्यपितदग्रिमातपश्चापिसन्तायाः प्रतिषेधं शास्तीत्यादिभा
ष्यादाथवद्ग्रहणे इति परिभाषासंचारेण त्यन्तः प्रतिषेधस्यापि ज्ञापकत्वं लभ्यते। तथाप्युक्तरीत्यार्थवद्ग्रहणपरिभाषाया असंचारा
त्प्रदीपोद्योतयोरुपपादितस्यापि तत्संचारस्याक्लिष्टत्वाच्च तदनादर इति तात्पर्य्यम्। न वोधोपयोगीति। यथा घटशब्दो घटार्थवाचक
इति सामान्यज्ञानं नीलघट इत्यादिविशेषवोधोपयोगि न तथा सर्वे सर्वार्थवाचका इति सामान्यज्ञानं वृद्धिशब्द आदैच वाचक इति विशे

प॰टी॰ पबोधोपयोगिनेत्यर्थः। तादृशसामान्यज्ञानस्यार्थादृत्ते एवं सामान्योपस्थितिद्वारा तादृशसामान्याकारबोधजनकत्वन्त्वस्त्येव। सर्वम्विष्णु
६ मयं जगदित्यादितो घटो विष्णुमयः पटो विष्णुमय इत्यादिबोधो विशेषधर्मावच्छिन्नोपस्थितेरभावेन सार्वजनीनानुभवविरुद्ध एव स
र्वशब्दाद्वस्तुत्वव्यापकतया एवंविधप्रतीतेः। चैत्रो दधि भुङ्क्ते मैत्रः क्षीरं देवदत्त ओदनं यज्ञदत्तस्तु सर्वमित्यादौ तु समभिव्याहृततत्पदार्थ
तावच्छेदकावच्छिन्नस्यैव बोधो न तु व्यापकतया विशेषधर्मानुपस्थितावेव व्यापकतया तदर्थत्वादित्यन्यत्र स्पष्टम्। एतेनेदं चिन्त्यं
घट इति सामान्याकारस्य तस्य बोधोपयोगित्वदर्शनात्। नीलपीतादिव्यक्तिविशेषबोधः प्रकरणादिसहकारेण घटत्वावच्छेदादिति चे
त्सत्यम्। प्रकृतेऽपि सर्वं विष्णुमयं जगदित्यादौ सर्वादिशब्दोपस्थितेः योग्यतान्यतराभावाच्चेत्यपास्तम्॥ अनेकशक्यतावच्छेदकत्वे सति
एकशक्यतावच्छेदकत्वरूपनानार्थकत्वस्य घटादिशब्देऽभावेन प्रकरणादेरभिधानियामकत्वाभावाच्च॥ अत एव विरोधिताया उ
दाहरणप्रसङ्गे रामार्जुनाविति प्राचोक्तमुदाहरणमन्योन्याश्रयेण संगच्छते तस्मादन्यतरस्य पदस्य व्यवस्थितार्थत्वे एवमपि तेन विरो
धप्रतिसन्धानान्नानार्थपदस्याभिधानियमनमिति रामरावणयोरित्युदाहरणं भवितुमर्हतीति रसगङ्गाधरकृतः व्यक्ताभिप्रायेण ना राम॰ ६
नार्थकत्वस्वीकारे व्यवस्थितार्थकशब्दाप्रसिद्धिः काव्यप्रदीपकारा अपि पञ्चमोल्लासे व्यञ्जनाव्यवस्थापनप्रस्तावे वाच्यत्वयोर्निय
नत्वानियतत्वरूपस्यैव धर्मस्य कथनप्रसङ्गे घटादिशब्दवाच्यस्य व्यवस्थितत्वं नार्थकसैन्धवादिशब्दवाच्यस्यार्थस्य व्यवस्थितत्वं सी

चक्रुः। किंत्वनेकधर्मावच्छिन्नानां शब्दादुपस्थितौ वक्तृतात्पर्यमिति शब्दे हि प्रकरणादिना तात्पर्यनिर्णायकं प्रकरणादिभिः नीलघट
त्वादिविशेषरूपेण गृहीतशक्तिकं प्रतिप्रकरणादिसहकारेण घट इति ज्ञानस्य विशेषविषयकत्वमस्त्येवेति संक्षेपः। नहि कार्यि
निमित्ततया आश्रीयते। अतिशयार्थकेनेति नातिशयितकार्यवान्निमित्तत्वेन नाश्रीयते इत्यर्थलाभात्फलितमाह। कार्यमनुभवन्नि
ति। ननूर्णुनविषतीत्यत्रेसशब्दस्येव शयितरि इत्यत्र ङित्त्वे तथैव शब्दस्य सार्वधातुकार्द्धधातुकयोरिति गन्ताङ्गान्त्यस्य गुणविधाना
त्कार्यानुभवः। इकारे कार्यानुभवसत्त्वेऽपि ङित्वाभाववत्त्वस्य समुदायानुबन्धत्वादिति कथं विशिष्टपरिभाषाज्ञापकत्वमिति चेन्न
कार्यानुभववदवयवकत्वरूपकार्यित्वस्य परिभाषाविवक्षितत्वान्निर्देशस्य ज्ञापकत्वनिर्वाहादूर्णुनविषतीत्यादौ च तादृश।
कार्यित्वस्य सत्त्वे सत्त्वेन तस्य निमित्तत्वानाश्रयणेऽपीसो ङित्वनिमित्तत्वेनाश्रयणे बाधकाभावात्। अरिरिषतीत्यादौ चारिसशब्द
स्य ङित्वभावकत्वेनेसोऽपि ङित्वकार्यानुभवात्तस्य तन्निमित्तत्वेनानाश्रयणं यद्यपि सर्वे सर्वपदादेशा इति न्याये नशी इत्यस्य शे इत्यादे
शेन दोषाभावात्। ऊर्णुनविषतीत्यादौ तूक्तरीत्या समुदायादेशेन समुदायत्वेऽपीसो निमित्तत्वमस्त्येवेति संक्षेपः। केचित्तु सार्वधा
तुकार्द्धधातुकयोरित्यादाविक्परिभाषाप्रवृत्तौ प्रथमान्तगुणपदस्य वर्णमात्रस्य प्रयोजकतया तज्ज्ञाने सवयिनं किन्तु त्यस्यो
पस्थितानिषेधे पर्युदासार्थकनञोऽभावेन वाक्यैकवाक्यतयाऽन्वयबोधे तदवस्थायामेवेङित्वस्य प्रशक्तकार्यित्वस्य च सत्त्वे

प॰टी॰ ७ नपरिभाषोत्पत्तौ पश्चादप्रतिबद्धप्रसरालोन्त्यपरिभाषाप्रवृत्तावपि तस्याः पूर्वोक्तरीत्या प्रयोजनकत्वेन ज्ञापकत्वस्य मेरुशिखरारू
ढत्वादिति समादधुस्तन्न युक्तिमत्। विधिनिषेधयोर्युगपत्प्रवृत्तौ निषेधस्य विध्यपबाधकत्वादन्तरङ्गोपजीव्यनिषेधविध्यापेक्ष
यैव बलीयस्त्वस्य निषेधाश्च बलीयांस इत्यनेन प्रतिपादनात्। अन्यथा शास्त्रद्वयप्रामाण्याद्विकल्पापत्तिस्स्पष्टश्चेदं कमेर्णिङ
नलुमताङ्गस्येत्यनयोर्योगयोर्भाष्यप्रदीपोद्द्योतेषु ततश्च शपि नेत्यादावलोऽन्त्यपरिभाषया णिगन्ताङ्गान्त्यस्येति प्रसज्यमानो गुणो।
निषेधाश्च बलीयांस इति न्यायेन क्ङिति चेति निषेधेन बाध्यते सत्यामप्येतस्यां परिभाषायां प्रशक्तकार्यित्ववदिकारस्यानयानि
मित्तत्वनिषेधेपि शीङस्तन्निषेधाभावात्। तस्मान्मदुक्तरीतिरेव ज्यायसी। निषेधाश्चेत्यस्यापवादन्यायमूलकतया तद्विषये ऽप
वादप्रवृत्त्युत्तरमुत्सर्गप्रवृत्तेः पश्चादप्रतिबद्धेत्यादेर्निर्बीजत्वाच्च। किञ्चान्तरङ्गोपजीव्यविधिमात्रापेक्षया निषेधस्यानेन प्राब
ल्यबोधनेऽलोऽन्त्यपरिभाषाप्रवृत्तेः प्रागप्यनेन न्यायेन क्ङिति चेति निषेधापत्तिर्निषेधे इकोल्लक्षणगुणस्योपजीव्यत्वेनैकोप्युपजीव्यत्वा
त्। अपि च यादृशविधिनिषेधयोः प्रवृत्तौ शास्त्रद्वयप्रामाण्याद्विकल्पापत्तिस्तादृशविध्यपेक्षयैव तादृशनिषेधस्य बलवत्त्वं विभा
षा जसीति ज्ञापकादाश्रीयते इत्यलोन्त्यपरिभाषां प्रति निषेधस्य बलवत्त्वासंभव इत्युपरिष्टान्निरूपयिष्यामः॥ यदागमास्तद्गुणीभू
तास्तद्ग्रहणेन गृह्यन्ते॥ तद्गुणीभूता इत्यस्य विवरणं शास्त्रेणेति। यत्तु प्रयोगसंपादने उपकारक इति कैयटानुरोधेन व्याख्यानं तच्चि एम ७

न्त्यम्। प्रत्ययादेरपि प्रकृत्युपकारकत्वात्तद्ग्रहणेन तद्विशिष्टस्यापि ग्रहणापत्तेः स्पष्टमभिधानात्। मुग्विधानसामर्थ्यादिति। न
नु पच आन इत्यवस्थायां सवर्णदीर्घइयादेशमुग्विधीनां मिथः कथं बाध्यबाधकभाव इति चेदित्थं सवर्णदीर्घस्य प्रतिपदोक्त
त्वेन ताभ्यां बाधः। न च सवर्णदीर्घोत्तरमचः परस्मिन्निति पञ्चमीसमासेन स्थानिवद्भावेनेयादेशस्य षष्ठीसमासेनानेमुकः प्राप्तेर्नि
रवकाशत्वाभाव इति वाच्यम्। स्थानिभूतादचः पूर्वस्य स्थानिभूतादचः पूर्वस्मात्परस्याचः स्थानित्वानाक्रान्तस्यैव ग्रहणात्तदप्र
त्तिरिति सूत्रस्योद्द्योते प्रामाण्यात्स्थानित्वाक्रान्तस्यापि तस्य ग्रहणे तु प्रत्ययलक्षणसूत्रस्थभाष्यस्वरोक्तरीत्या प्रसङ्गे तत्रातिरिक्तवचनस्य ष
ष्ठ्यर्थाभावेन पञ्चमीसमासस्यानित्यत्वेन च स्थानिवद्भावाप्राप्तिर्बोध्या॥ अथवा निरवकाशत्वाभावेपि प्रतिपदोक्तत्वस्य पूर्वप्रवृ
त्तिनियामकत्वात्ताभ्यामादौ भाव्यमेव। तयोस्तु द्वयोर्मध्ये इयादेशात्तरं सर्वे सर्वपदादेशा इति न्यायेन स्थानिवत्त्वेन मुग्विधेश्चारितार्थ्ये
यीयादेशस्य सत्यपि संभवे इति भाष्योक्तरीत्यापि ननाप्राप्तिन्यायान्मुग्विधिना बाधः॥ अत एव मुगुत्तरमियादेशोऽनयाप्राप्तोपि न
येन नाप्राप्तिन्यायेन बाधस्थलेऽपवादप्रवृत्त्युत्तरमुत्सर्गस्याप्रवृत्तेः। यत्तु मुगागमोत्तरमियादेशो न भवति तपरकरणादिति कैय
टस्तन्न। तपरसूत्रस्य विधायकत्वे तत्कालस्य सवर्णग्रहणविधानेप्यन्यनिवृत्तेरविधानान्नियामकत्वेप्यतत्कालस्य सवर्णस्यैव
व्यावर्तनान्न त्वेतत्परिभाषालभ्यस्याप्यत एवादुपदेशाप्रयुक्तस्वरसिद्धिरिति विवरणे स्पष्टम्। मुगागमोत्तरं सवर्णदीर्घस्तु प्राप्नोत्य

प.टी. ८ अप्रतिपदोक्तत्वेन बाधस्थले ऽपवादप्रवृत्त्युत्तरमुत्सर्गस्य प्रवृत्तेरत एवानयोः सवर्णदीर्घमात्रप्राप्तिमाशंकितेति ध्येयम्॥ न चै
वमपि नुगागमविशिष्टस्यानयोः वर्णत्वेन ग्रहणादाने परत आद्गुणप्रवृत्त्यौकाररूपगुणसम्पादनेन नुकश्चारितार्थ्याज्ज्ञा
पकत्वासंभव इति वाच्यम्॥ गुणस्य सवर्णदीर्घबाध्यत्वेनादोषात्॥ केचित्तु आगमविशिष्टे ऽवर्णत्ववत्कण्ठत्वस्यातिदेशेनौ
काररूपगुणस्य प्रतिबन्धः न च लृतिलृ वेत्यत्र शेखरोक्तरीत्या एकदेशमकारसादृश्यमानयौकाररूपगुणापत्तिरेवेति वाच्यम्॥ आम
लृग्रामादिवत्तत्र पूर्वभागस्य बाहुल्येन तत्कृतसादृश्यस्यैवागीकारेणौकारगुणप्राप्तेः॥ एतेन सवर्णदीर्घेणानुनासिकाकारस
म्पादनार्थं नुग्विधानमित्यपास्तम्॥ आने आ इति न्यासे नसिद्धे नुग्विधानसामर्थ्याच्चेत्याहुस्तदपरे नक्षमन्ते परिभाषया आगमवि
ध्युद्देश्यतावच्छेदकसमानाधिकरणकारणकार्य्यविध्युद्देश्यतावच्छेदकादिधर्मस्यैवातिदेशः॥ यद्धर्मावच्छिन्नमुद्दिश्याग
मो विहितस्तद्धर्मसमानाधिकरणधर्मावच्छिन्नस्य ग्राहकेण तद्बोधकशब्देनातिदेशस्य कार्य्यार्थतया कार्य्यविधावुपात्ते
नागमविशिष्टो गृह्यत इत्यर्थकपदागमपरिभाषया कार्य्यविधेरकृवाक्यत्वादिति कण्ठत्वादेरतिदेश एव न भवति॥ अन्यथा राम
कण्ठत्वस्येव सवर्णत्वस्याप्यतिदेशे ऽत्र कालस्य सवर्णस्यैव वर्णनादिति निरुक्तो दोषो न ग्रन्थासंगत्यापत्तेरिति दिक्॥ वस्तुतस्तु नु ८
ग्विधानसामर्थ्यादनित्यत्वपुरस्कारेण क्वचिद्वर्णग्रहणे ऽप्रवृत्तिरेव बोध्यते॥ न तु वर्णग्रहणे नेति परिभाषान्तरं ज्ञाप्यते येन मूलो

क्तभाष्याणां विरोधापत्तेरिति॥ अत एवानमुगिति सूत्रे ऽ उद्योते आदावन्ते चापि क्वचिद्वर्णग्रहणे यदागमाद्युत्पत्त्यस्याप्रवृत्तिरेवेत्यभिहि
तम्॥ एतेन परिभाषाया अनित्यत्वेपि नुग्विषये कुतो न प्रवर्तत इति नुग्विधानसामर्थ्यादिति चेत्तर्हि नुग्विषये परिभाषा अप्रवृत्तिकल्पनयैव
व निर्वाहेण सामान्यतो ऽनित्यत्वज्ञापनस्य निःप्रयोजनत्वात्॥ द्विदीये इत्यादावपि वस्तुतो विनिर्गुणः सिद्धत्वविधानसामर्थ्यात्परिभाषा
या अप्रवृत्तेः सिद्धत्वादिति शंकासमाहिता॥ जहार इत्यादेरनित्यत्वज्ञापनफलस्य सत्त्वाच्च न च प्रनिदारयतीत्यादावपरमतरीत्यादात्वस्याग
मविध्युद्देश्यतावच्छेदकाण्त्वसमानाधिकरण्याभावेनानतिदेशाद्दोषाभाववज्जहार इत्यादावप्याकारान्तधातुत्वस्य तादृशाण्त्व
समानाधिकरण्याभावादेवानतिदेशाद्दोषाभावात्प्राप्तेः फलाभाव इति वाच्यम्॥ आत औ णल इत्यत्र धातोरनधिकाराभावात्॥ अनुपप
त्त्यभावेन णलादेशाभावाच्च॥ अङ्गस्येति षष्ठ्यन्तानुरोधेनाक्षिप्तस्यापि षष्ठ्यन्तत्वेन दोषाभावाच्चेति गदायां विस्तरः॥ केचित्तु लक्ष्या
नुरोधेन व्यवस्थितमिति बोध्यम्॥ नन्वानेमुगिति सूत्रे पच्यमान इत्यादौ मुगागमो ऽन्तरंगतया प्राप्तस्य यादेशस्य न परकार्यत्वेन वारण
परप्रदीपेमुक्तरीत्या सन्दूष्यत्वपमनित्यत्वेन परिभाषायाः समाहितमुद्योते तदेतद्येन नाप्राप्तिन्यायेन मुक इयपवादत्वमिति प्रति
पादनपरेण लक्षःशान्तृशानचावितिसूत्रस्थशेखरेण विरुध्यत इति चेदत्राहुः॥ उपायस्योपायान्तरादूषकत्वादिति॥ अनया च परि
भाषयाऽऽगमानामिति॥ यत्विदन्द्विषन्त इति मिदचोन्त्यात्सूत्रभाष्योदाहरणाच्चिन्त्यमिति तन्नैव चिन्त्यम्॥ नुमो ऽभक्तत्वपक्षे तन्मध्यपति

श०टी० ६ न्यायेन नुम्विधिश्रुत्स्यद्विष तु ग्रहणे न ग्रहणेन स्य पदत्वात्संयोगान्तलोपे एकदेशविकृतन्यायेन द्विषमित्यस्य शान्त्पदत्वात्सिद्धो नु
स्वार इति प्रसङ्गोच्चारितमिदं भाष्ये इति प्रदीपोद्योतयोः स्पष्टमभिधानात् । परादित्यपक्षेपि नकारस्य मकारो भक्तः सकारश्च पदान्त इति म
कारोपि तद्भक्तत्वात्पदान्त इति सिद्धोनुस्वार इति भवदीयकैयटेनैवाभिधानान्मूलोक्तार्थे कैयटाभिमतत्वं भाष्यस्यैकदेशयुक्तत्वं च स
त्त्वमेवायत्तु कैयटेनान्ये तु परादित्यपक्षे तद्भक्तत्वान्नकारग्रहणे नास्य ग्रहणं भवतु न तु पदान्तत्वं न हि द्वयोर्मकारनकारयोः पदान्तत्वमु
पपद्यते इत्याहुरिति । स्वानभिमतमनान्तरमुपन्यस्तं तन्न कृतमित्या संयोगान्तलोपेः स्थेवमस्य पदान्तत्वमित्यनुस्वारसिद्धेश्चेन्त्यभि
नितन्त्रेवोद्योतेस्पष्टम् । यदपि पत्नुत घाभ्यां पदान्ताभ्यामिति सूत्रे पूर्वाविन्यस्य पूर्वावयवावित्यर्थं प्रकल्प्य इश्च अजश्च यजनस्या
पत्यमैयज इत्यत्रान्त्यस्य पदागमा इति न्यायेन वृद्धत्वाच्छैत्यजीय इति प्रमञ्जरीशेखरयोरुक्तं तत्राचः परस्मिन्नित्यत्रादेशात्पूर्व
त्वं गृह्यमाणे वैयाकरण इत्यत्रायादेशापादकभाष्यादिग्रन्थविरोधात् । आदेशोवयवस्यैकारस्यादेशग्रहणे न ग्रहणेपि ततः पू
र्वस्य विद्धि धरसंभवेन दोषस्येवाभावात्तौ ऐयजीय इति प्रयोगाभिधाने मानाभावाद्भ्रमकृत्वमेवैचोः सन्यभिधाने पूर्वौ अङ्गावयवौ राम ६
इत्यर्थान्नदोष इति तच्चिन्त्यम् । अस्यानिवत्सूत्रे आदेशग्रहणसामर्थ्येनादेशस्थानीयानुमानिकस्थान्योदेशस्यादेशग्रहणेन ग्र
हणेपि आगमस्थानीयानुमानिकस्थान्यादेशभावघटकस्यादेशग्रहणेनाग्रहणस्य भूलेएवप्रतिपादनाद्यचः परेति सूत्रेपि तथै

वस्वीकारात् । श्रोतस्थान्यादेशभावमादाय श्रौतादेशयकारात्पूर्वत्वस्यैकारे सत्वेन वैयाकरण इत्यादौ भाष्योक्तदोषदानस्योपपत्तेः
अचः पूर्वत्वविरहान्नादितिसिद्धान्तमते दोषाभावाच्चाङ्गावयवत्वकल्पनाव्यर्था गुरुभूता चेति दिक् । पूर्वसवर्णयतिरिति । यमुहि
श्येत्यर्थं स्य पूर्वमव्यवस्थापितत्वात् डागमविधायके ऽङ्गस्यादृश्यत्वेन तत्वस्यानयातिदेशेपि स्यात्त्वस्यानतिदेशात्कथं तयापत्तिरि
रितिशंका तु दतोत्तरा आगमविध्युद्देश्यतावच्छेदकधर्मस्यवानयातिदेशेन तकारथकारयोर्विधीयमानसुटितकारत्वादेरतिदेशेपि
आर्द्धधातुकत्वस्यानतिदेशेरडागमानायत्यागमविध्युद्देश्यतावच्छेदकधर्मसमानाधिकरणयावद्धर्मातिदेश इति न सम्यक् सवर्ण
त्वादेरतिदेश एवतावुक्तोद्योतविरोधापत्तेरार्द्धधातुकत्वस्य तकारत्वसमानाधिकरणत्वाभावाच्चास्याः कार्यविध्येकवाक्यतया
यावद्धर्मातिदेशासंभवाच्चेत्यलम् । निर्दिश्यमानस्यादेशाभवन्ति । व्यक्तिपक्षेप्याह । नभूसुधियोरितीति । नन्वस्य चाविन्त्यादेग्रहणक
शास्त्रप्रवृत्त्या सवर्णग्रहणाद्वर्णान्तस्येत्यर्थेनवकाशत्वेन निर्दिश्यमानपरिभाषया वाधकालोन्त्यपरिभाषयासर्वेष्टसिद्धेर्ज्ञापका
नुपयोग इति चेन्न । तथासति स्वबाधकवाधकस्य स्ववाधकत्वापत्तानुदस्थादित्यादौ पूर्वसवर्णापत्तेस्तत्रैतत्परिभाषयासमाधा
नपरभाष्यविरोधापत्तेश्च । नहि युज्यते न क्रमलोन्त्यपरिभाषया वेयं वाध्यते न तद्बाधिकया पाठेः परस्य नयेति । निचिंशतेरिति नितिसू
त्रे अथक्रियमाणेपि निग्रहणे अलोन्त्यस्येति अन्त्यस्यस्यानिर्दिश्यमानस्यादेशाभवन्तीतिभाष्येः लोन्त्यपरिभाषाविषयेमिदि

श्यमानपरिभाषासंचारात्स्वबाध्यत्वस्य सुतरां स्वबाध्यत्वाच्च। यत्तु साक्षादुच्चारितस्यादिविषये निर्दिश्यमानपरिभाषोत्थानमित्या
दानादेः परस्येत्यनेन बाधितानेनावैतत्तद्बाध्ययदागमा इतिन्यायलभ्यनिमित्तभावयोर्दः परस्येत्यनयोरस्थ्यादित्यादावपि साबाधनी
यतियुक्तमास्थ्यानुमितितच्चिन्त्यम्। निर्दिश्यमानस्यादेशभुशद्वादेः सकारस्य पूर्वस्य पूर्वसवर्ण इत्यर्थादादेः परस्येत्यस्यैतद्बाधस्या
पकत्वेन समावेशाद्बाधकत्वस्यैवाभावात्। नचैवमतिविंशतेरिति सूत्रस्य निर्दिश्यमानतिशब्दान्तस्येत्यर्थोऽलोन्त्यपरिभाषाप्र
याएतद्व्यवस्थापकत्वेसानन्तश्रोक्तभाष्यविरोधोलस्थ्यासिद्धिश्चेति वाच्यम्॥ विनादेशः शतिप्रत्यय इतिपक्षेऽव्युत्पत्तिपक्षे
चैतरनर्थकत्वेनालोन्त्यपरिभाषायाप्राप्तेः भाष्यनुर्विंशतेरिति प्रत्यय इतिपक्षेन योज्यम्। नन्वेवमप्युक्तभाष्यान्निर्दिश्यमानपरि
भाषाया अलोन्त्यपरिभाषाबाधकत्वावन्निरिष्टापत्तौ। नात्रपरिभाषाप्रवृत्तिरिष्टा नहि सा तयोर्बाधिका तयोर्निर्विषयत्वप्रसंगात्। अ
स्मान्निग्रहणसामर्थ्यादलोन्त्यपरिभाषाया अप्रवृत्ताववर्थात्सर्वस्य लोप इतिनिति विंशतेरिति सूत्रस्थप्रदीपविरोधानाप्यनयोरिया
मितिमूलाविरोधश्चेति चेदत्र गुरवः इयं परिभाषा येनविधिपदागमाद्यन्तयोर्विषये यथा विशिष्टस्यानित्वबाधिका। तथा
सामर्थ्यादिना बाधितालोन्त्यपरिभाषाविषयेप्यन्त्यस्य स्थानित्वबाधिकैव। तादृशविषये निर्विषयत्वहेतोरसंभवात्। ईदृशे विषये
तु समावेशेतिप्राप्याख्यमाहुः। त्यदादीनाम इत्यादावपि निर्दिश्यमानत्यदाद्यन्तस्येत्यर्थादलोन्त्यपरिभाषया निर्दिश्यमानह्रस्वाका राम
१°

रस्यैवेत्वविधानं स्यादिति ज्ञापकोपयोगः। एतेन यघस्यच्चावित्यादौ व्यक्तिपक्षे दीर्घदियोनर्निर्दिश्यन्ते तथाप्यलोन्त्यपरिभाषया
तत्रैष्टंनिवर्त्यते इत्यदोषः किं बहुना जातिपक्षे जात्याश्रयाणां सर्वेषां निर्दिश्यमानत्वेप्यलोन्त्यपरिभाषाऽनवकाशत्वादस्याबा
धो व्यक्तिपक्षे निर्दिश्यमानव्यक्तिषु परत्वादिति स्पष्टं षष्ठीस्थाने इतिसूत्रे प्रदीपे इत्यपास्तम्। अबाधकत्वेनैवोपपत्तौ बाधकत्वक
ल्पनाया अन्याय्यत्वात्। अलोन्त्यस्यादेः परस्येत्यनुवचनसामर्थ्यादेव बाध्यते इत्येव षष्ठीस्थाने इतिसूत्रे प्रतीचोक्तेश्च॥ स्प
ष्टार्थमिति॥ ननु तदोः सःसावित्यादावनुवृत्तत्यदादीनामित्यत्र इत्यादावधिकृताङ्गस्येत्यस्यापि निर्दिश्यमानत्वात्तस्यस्था
नितायाअनयावारणादन्त्यादेशार्थङित्वं सफलमिति चेन्न। तदन्तविधिम्विनास्वान्तेत्यणङ्गस्यातिप्रसङ्गात्स्थानित्वासंभवेना
वश्यवाच्यतदन्तविधावनया विशिष्टस्यस्थानित्वाभावबोधनेन्त्र कारस्यैव तत्वसंपत्त्याङित्वस्य व्यर्थत्वात्। तदोः सःसावित्या
दौ तु तदन्तविधिनाप्राप्तविशिष्टस्थानित्वानयावारणेप्यधिकृतस्यदादेरितिसंज्ञामादाय निर्दिश्यमानत्यदाद्यवयवतकारस्येत्य
र्थे नान्तिस्य इत्यादावतितकारे भाष्योक्तं सत्ववारणं मूले वक्ष्यमाणं नासङ्गतम्। एतेन निर्दिश्यमानत्वसाक्षादनुवृत्त्याचोपात्त
साधारणमेव। नचैवमचिश्नुधात्विति सूत्रे इउवर्णान्तधातुश्नुभ्रुवामित्यर्थयेनविधिरितिप्राप्ततदन्तस्यानित्वस्यानयावार
णादिकारोकारयोरेव स्थानित्वसंपत्त्याङित्वमप्यर्थमिति वाच्यम्। तदन्तविधाविति सूत्रोपात्तत्वेन धातोर्निर्दिश्यमानत्वात्स

प॰टी॰ त्रोपात्तस्य सर्वस्यानुवृत्तस्य त्वधिकारसूत्रान्यसूत्रस्थपदस्य निर्दिश्यमानत्वस्वीकारात्। अत एवामि पूर्व एत्येधत्यूठ्सु प्रथमयोः पू
११ र्वसवर्ण इत्यादावजाद्यवमिए जादावेधत्यावजाघोरप्रथमयोरित्यत्रो नाश्रितः अमादेर्विशेष्यस्य सूत्रोपात्तत्वेन धात्वोरिव निर्दि
श्यमानत्वेनानयापरिभाषयाऽवारणेन सर्वादेशप्रसङ्गात्। सूत्रोपात्तस्यापि तदादेर्विशेष्यस्य निर्दिश्यमानत्वाभावनिश्चितमभिधा
नंहि तुह्रुभ्य इति सूत्रे रुदिहीत्यादौ धादेशवारणाय हल्ग्रहणस्यानुवर्त्य हलादेर्हेरिति भाष्योक्तपक्षान्तरे हल एव निर्दिश्यमानत्वापत्तौ।
ण्वाधीत्याद्यसिध्यापत्तेः। एतेनाजादावमीत्यर्थे गव्यतीत्यादौ प्रत्ययलक्षणेन प्राप्तात्वातिप्रसङ्गस्य वारणाय मोऽवयवे चीत्यर्थस्योक्त
सूत्रस्थभाष्यप्रामाण्यात्कल्पनेपि एध्येधत्यूठ्सु इत्यादावेजादावित्यर्थे निर्दिश्यमानपरिभाषया दोषाभाव इत्यपास्तम्। हल्ग्रहणस्यान
नुवृत्तावपि निर्दिश्यमानपरिभाषया रुदिहीत्यादौ दोषाभाव इति भाष्ये पक्षान्तरमप्युक्तमित्यन्यदेतत्। तस्मात्फलितमेतत्सूत्रादनु
च्चारितविशेष्यकविशेषणोद्देश्यकतदन्तसञ्ज्ञाविधियदागमादूत्सन्यतरावोधितस्थानित्वाकत्वे सति उच्चार्य्यमाणत्वमत्र
निर्दिश्यमानत्वमचि श्न्विति संग्रहाय सूत्रानुच्चारितविशेष्यकेति विशेषणविशेषणम्। एतेन रिङ् शीङोर्ङित्वं सप्तार्थमित्य
पास्तमिति दिक्। विरोधाभावादिति। यद्यप्यलोन्त्यस्यादेः परस्यानेकाल्शित्सर्वस्येत्येनैरन्त्यादीनां कार्य्यबोधनमनयातु निर्दि शम॰
श्यमानस्येति विरोधस्तथापि मिदेर्गुण इत्यादौ तच्छेषपक्षे परिभाषाद्वयस्यैकवाक्यतयान्वये विरोधवदत्र तदभाव इति तात्पर्य्य ११

म्। एतेनानयास्वस्वनिमित्तेत्यादिसंचारितत्वादित्यन्यग्रन्थमनूद्य इति नव्यतराणां प्रदीपनिर्वापकः फूत्कारः प्रशमितो वे
दितव्य इति हेतुशून्यः प्रलापो निरसितो वेदित्यर्थः। अबाधकत्वेनैवोपपत्तौ बाधकल्पनाया अन्याय्यत्वात्। अकच्विष
ये नायमिति। अत्र च प्रमाणं किमः क इत्यत्र कादेशविधानमेवान्यथा किंसर्वनामेत्यत्र किमशब्दाकरणप्रत्लाघवानुरोधे
न द्विशब्दात्पूर्वं किमशब्दपाठे नत्यदादित्वात्तस्य त्यदादीनाम इति मकारस्यात्वे कृते किम अ इति न्यासेनैव सामर्थ्याद नत्यविका
र इत्यस्य देशस्येति परिभाषया चकारस्यात्वे कृते द्वयोरकारयोः पररूपे क इति रूपसिद्धेस्तदनर्थकमेव स्यात्क्रियमाणं तत्साक
ङ्क्षार्थमिति त्यदादीनाम इति सूत्रे भाष्यप्रदीपोद्योतेषु स्पष्टम्॥ सत्वत्र प्रमाणं तु किमः क इत्यादृत्या कादेशविधानमेवेति तत्तु कै
यटरीत्यानतुमूलकृद्रीत्यात एव शेखरे स्वरसूचकं कैयट इत्युक्तम्। यत्तु किमः क इत्यत्र निर्दिश्यमानपरिभाषाया अप्रवृत्तौ प्रमाणमि
मञ इत्येव सिद्धे किमः कादेशविधानमिति न तु कुतिहोः क्वातीत्युत्तरसूत्रयोः किम इत्यस्यावश्यकत्वप्रतिपादकत्यदादीनाम इतिसू
त्रस्थभाष्यकैयटविरोधाच्चिन्त्यम्। यदपि भाष्ये कादइति न्यासे दोषाभिधानपरमिति तदपि चिन्त्यम्। कादइतिन्यासोत्तरमेव तद्दो
षाभिधानेपि इम अ इति न्यासेपि तद्दोषस्य जागरूकत्वात्॥ इम अ इति न्यासस्य भाष्येऽकरणाच्च॥ यदपि इम अ इति न्यासेप्यु
त्तरसूत्रयोर्न दोषः॥ उक्तिहोर्वा तीति न्यासकरणात्क्व कुत्रेत्यनयोः सिद्धेरिति तदपि चिन्त्यम्॥ अर्द्धमात्रिककारस्य शकारेणानि

प·टी·
१२

मातव्यत्वात्किमङ्गित्न्यासादविशेषात्॥ नचैवमपि काद्देशे ककारस्याकरणाद्ईमात्रालाघवमेवेति वाच्यम्। एवमपि पद
लाघवाभावात्। अनचि चेति द्वित्वस्य वैकल्पिकत्वेपि भावकर्मस्य धर्माधिक्यफलकतया द्वित्वेः ईमात्रालाघवस्याप्यभा
वाच्च पाक्षिकदोषसत्वाच्च। सौत्रत्वाद्याश्रयणे तु स एव दोषः वोमीति न्यासेः ईमात्रालाघवसत्वेप्यादेशस्य सानत्वमपि संभा
व्येत वा तीति न्यासेप्यति उपादेशस्य विकल्पसंभावनास्यात्। एतदर्थं व्याख्यानाद्याश्रयणे तु स एव दोषस्तस्माद्यथोक्तमेव रम
णीयम्। सा कच्चात्किम् शब्दाच्च तसोः परयोः कुत्रेत्याद्यसिद्धेः कादेशस्यावश्यकत्वमिति तु न युक्तम्। एतस्यापि किम् शब्दविका
रत्वेन ज्ञापनात्पूर्वं निर्दिश्यमानपरिभाषासंचारात्किमशब्दे प्राप्तेः। एतेन किमः क इति कादेशः कर्तव्य इति शेषपूरणेन व्या
ख्यानमपास्तम्। किम् शब्दविषये इति वक्तुमौचित्यादेतेनेमश्च इति न्यासे उत्तरार्थं किम इति वक्तव्यमिति मनोरमाग्रन्थः॥ कुति
हो क्वातीत्यादेशे कद्वयश्रवणापत्तिः॥ उतिहोर्मीति न्यासे उकारस्यान्त्यादेशत्वापत्तिरेतदर्थं नानर्थक इत्यारम्भे गौरवमङ्ग
वृत्तपरिभाषया गुणवारणे च क्लेशः एतद्व्याख्यानपरः। शब्दरत्नग्रन्थश्चाप्ययुक्तः। उश्चिहोर्वोमीति न्यासे दोषद्वयस्याप्युद्धारात्॥ राम·
नच काद्देसेवं न्यासेपि तुल्यमेतदिति वाच्यम्। एकत एकत्रे सादौ दोषवारणाय तत्र गत्यन्तराभावादित्यपास्तमिति दिक्। येयं का १२
देशविधानसामर्थ्यादकज्विषये निर्दिश्यमानपरिभाषाया अप्रवृत्तिः। सा किंशब्दविषयिण्येव न सार्वत्रिकी भिन्धकी त्यत्राकवि

कृतेः अनयापरिभाषयाधित्वं न प्राप्नोतीत्याशंक्य परत्वान्तरङ्गत्वाभ्यां धित्वेऽकजितिहुझल्भ्योरिति सूत्रभाष्यात्। व्यक्तञ्चेदङ्गिमः
क इति सूत्रे शेखरे एव॥ यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः॥ यत्तु कश्चिद्वृद्धिरादैजदेङ्गुण इत्यादौ रत्परा ना
दृशानुच्चार्य्योरण्रपर इति सूत्रं न कार्य्यमिति प्रसङ्गागतमाशङ्क्यापतृन्ष्ट्धामीदित्यत्र दोषात्समाधायाह। यत्तु भृज्जामिदित्यत्र दोष
प्रसङ्ग इति शेखरस्तदशुद्धं कृत्वा कुचोद्यमिति तच्चिन्त्यम्॥ भृज्जामिदित्यत्र दोषाभाव इत्यस्मैवाप्तृ· धामित्यत्र दोषदानाद्भृज्जामि
त आप्तृन्ष्टधामिति पाठात्। गुरवस्तु सिध्यन्तेऽउरण्रपर इति सूत्रसत्वे भृज्जामिदित्येतद्विषये विभर्तीत्यत्रे दादेशस्य रपरत्वहला
दिश्लेषयोः प्रवृत्त्येदानीमपि साधुत्वबोधकप्रक्रियाऽभेदायतयोरावश्यकत्वेनेरेव कार्य्यः कृतेच तस्मिन्नाङो हाङोरपि न लसा
ङ्गः॥ नच हल्ङ्यादिः श्लेषेणानिस्तारः। एतदंशोपि तत्कल्पने प्रक्रियागौरवापत्तेः साधुत्वबोधकप्रक्रियाभेदेन तदभावापत्तेश्च रपरोच्चा
रणसामर्थ्याद्धल्ङ्यादिः श्लेषाप्रवृत्तेश्चात तस्तदर्थमकरपरोणीत्याद्य इति गौरवमेवेत्युक्तविपरीतपाठभङ्गीकृत्यापि योजयामासुः॥ अ
र्थवद्ग्रहणे नानर्थकस्य ग्रहणम्॥ तेनैषा परिभाषा सिद्धेति। यत्तु सीरदेवोक्तं ज्ञापकमुपपाद्य केचिदाहुः यत्तु शब्दरत्नकृतोक्तं त्र
श्वादिसाहचर्य्याद्धातुसन्नकराजेर्ग्रहणं स्यादिति भ्राजिग्रहणस्यावश्यकत्वमिति तन्मन्दम्· अतिव्याप्तिपरिहाराय पठनीय
स्य राज इति नकारस्यैवं सति वैयर्थ्यं स्यात्· किञ्च कुनातदभावेपि सिद्धान्तेति इत्यानिङ्गिरित्यधातोः षत्वमुदाहृतमभियुक्तैरिति

प॰टी॰ नरेवमन्त्रम॰ धातुसूत्रन्यासभङ्गः ननत्पाठस्यल्किषृत्वांत ऋकारादिभ्राजतिव्यावर्तनेन ऋकारस्यसार्थक्याच्च। भ्राजृइति ऋकारस्यस
१३ मुदायानुबन्धत्वेनसूत्रेराजृइतिपाठेपिऋकारावयवकराजृशब्दस्यैवग्रहणेनभ्राजतेरग्रहणाच्च नह्यसत्यामपिपरिभाषायामृका
रावयवकोराजृशब्दइत्यर्थोनाश्रयितुंशक्यतेइतियुज्यतेवक्तुमनर्थकागमविकरणादिशब्देषु अवयवावयविदर्शनात यदपिभ्रा
जतेर्नकारः समुदायावयवोभयोपकारकइतितदशुद्धम् महिङ्ओपिडि त्वावत्यासंप्रक्षिमहेइत्यादौसम्प्रसारणप्रापत्तेः अतएवत
स्यस्यामिपामित्यादौथसस्यकारान्मिपः पकारेणप्रत्याहारोनक्तः तत्रतथासमुदायोपकारकत्वेनमिपः रित्वानापत्तिरितिशेखरे
स्पष्टम् निडूभ्यामित्यादिप्रयोगाणामसाधुत्वस्यकेचिल्लिखादिनाकौमुदामेवोक्तत्वाच्च॥ सत्यपिवासाधुत्वेतद्दूषणेपात्तधातुष्वेव
साहचर्य्यलक्ष्यानुरोधान्नतुच्छशब्दवर्णेषुअनित्यत्वात् अतएवधातुग्रहणानुवृत्तिपरकेचिल्लित्यादिमतव्याख्यानेऽत्रभाष्यानुप
ह्लापिचार्य्यइत्युक्तंशेखरे तस्माद्धातुग्रहणाननुवृत्तावपिवर्णान्तरिक्तंत्रश्वादिषुसाहचर्य्याश्रयणेनकोपिदोषः यदपिफणादिप
ठितेनभ्राशतिशब्देनविभ्राडित्यस्यसिद्धत्वात् ज्ञापितपरिभाषायांचारितार्थ्यभावमाशङ्क्यास्मादेवभ्राजतिग्रहणात्फणादौभ्रा
सितिदन्त्यपाठंवृत्त्यादिसम्मत्याव्यवस्थाप्यएतेनवाभ्रासेतिसूत्रेभ्राशभ्लाशदीत्पौफणादिसप्तकेतालव्यान्तौपठिष्येतेइतिप्रकृत राम
सूत्रेपिश्यनविधायकेतथैववोपदेवखुदन्त्यान्तावाह भ्रावापितदेवानुसृतमितिमनोरमायांपठिष्येतेइतिप्रतीकमुपादायमाध १३

वादिभिरितितत्रशेषंपूरयित्वैवंचवोपदेवोवहुविरोधाद्धेयइतिप्रजल्पनशब्दरत्नकृतः प्रत्युक्तमित्युक्तंतद्भमसात् शब्दरत्नस्यसा
नभीप्सितवोपदेवइत्यादिपदगर्भितारुचिकमनोरमाशयप्रदर्शनपरत्वात् अतएवसीरदेवोक्तज्ञापकेएतद्दूषणानभिधानंशब्दरत्न
कृतइतिकेचित्तुविभ्राट्विभ्राशौविभ्राशइत्यभिप्रायेणप्रयुक्तस्यविभ्राडितिरूपस्यदन्त्यान्तत्वेऽसाधुत्वप्रसङ्गात्तालव्यान्तत्वावश्यकं
विभ्राट्विभ्राजौविभ्राजइतिभ्राजत्यभिप्रायेणप्रयुक्तस्यविद्यमानसाधुत्वप्रसङ्गात्सूत्रेभ्राजिग्रहणमप्यावश्यकमितिमनोरमाशब्द
रत्नयोराशयमाहुः॥एतन्मतेभ्रादिदिवाघोः इन्त्यान्तपाठेनभ्राशतेइतिप्रयोगसिद्धावपिभ्रेशतुरित्यादेरसिद्धिः॥दिवाघन्तर्गणस्य
फणादिष्वेवपाठंपरिकल्प्यफणांचाष्टानामितिन्यासेनपरिहार्य्याअन्येत्वस्मादेवभ्राजिग्रहणाद्दातः परशकारस्यषत्वाभावेऽनुभीय
तेकाशृधातौषत्वस्यप्रमितत्वेआकारः संयोगादित्वेनविशेषणीयइतिवर्णयन्ति। अत्रमतेकथंभाष्यानुग्रहः कथंचभ्राशृधातौषत्व
सिद्धिरितिविचारणीयमितिदिक्। यदपिसीरदेवोक्तज्ञापकेनवेतदयुक्तंफणादिनाराजिनासाहचर्य्यात्तथाभूतस्यैवषत्वार्थत्वपरि
भाषाफणादिरपिभ्राजेर्भागस्यराजित्वाविशेषाग्रहणेराजौफणादिनिर्णयात्कथंभ्राजौतत्साहचर्य्यात्फणादित्वनिर्णयइत्याशं
कनंपरस्परस्परसाहचर्य्येणोभयोः फणाद्योरेवग्रहणस्यविवक्षितत्वादितिसमाधानंचतदुभयमपिचिन्त्यम् भ्राजिग्रहणसामर्थ्ये
नत्रश्वादिसाहचर्य्येणचस्वतन्त्रधातोरेवप्रथमंवुद्ध्युपारोहेणपांकायानिरालम्वनत्वात्स्वातन्त्र्यास्वातन्त्र्ययोः परस्परसाहचर्य्यस्यांद

प॰टी॰ श्चरत्वादुत्तरस्यापि तथात्वात् मनोरमायां तु एवं चिन्त्या राजित्यस्य फणादिकत्वभाज्येकदेशस्यापि फणादिकस्यैव ग्रहणौचि
१५ त्याच्चिन्त्यमन्यत्र विस्तरः॥ गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः॥ अप्रसिद्धश्च संज्ञादिरपि तद्गुणारोपादेव बुध्यत इति। तद्गुणा
रोपपूर्वकं तद्धर्मारोपादित्यर्थः। एवञ्च गौर्वाहीक इतिवदाधुनिकगोविन्दादिसंज्ञाशब्देऽपि तद्गुणारोपपूर्वकशक्यतावच्छेदका
रोपरूपलक्षणयैव बोध इति मञ्जूषायामादावेव निरूपितम्। तथा च गम्याद्यन्तर्भावेनात्रोक्तरीत्यैव संज्ञाशब्दस्यापि गौणत्वप्र
तीतेः। प्रागेव मुख्यार्थोपस्थितिकाले प्रातिपदिककार्यं त्र्यादिरूपे सति पदस्यैव संज्ञात्वेन विनियोग इति संज्ञाभूतत्रिशब्दवि
षयेऽपि त्रयाणामित्येव रूपम्। एवं तर्हि गौणलाक्षणिकादयसिद्धस्याभेदेनोपादानं किमर्थमिति चेदर्थस्य गौणत्वेनैकोऽपि संज्ञा
दिर्बोधकोपस्थितिव्युत्पत्त्याः प्रसिद्धस्य संज्ञाशब्दबोध्यत्वगौणलाक्षणिकार्थस्य जात्यादिशब्दबोध्यत्वमपीति बोधकभेदार्थस्या
पि भेदेनोपादानमेतत्परिभाषाव्याख्याने परिभाषाभास्करेऽपि मुख्यं प्रसिद्धं तदन्यद्गौणम्। यदुक्तं हरिणा अभिव्यक्तपदार्थापि इ
त्याद्यभेदेन व्याख्या प्रातिपदिककार्ये तु नेयमत्र वर्तत इति अविशेषेणैवाह। एतेन परकार्यविषयकगौणमुख्यन्यायमूलक
स्याप्यभिव्यक्तपदार्थाये इति न्यायस्य गौणमुख्यन्यायादभेदेनोपादानात्प्रातिपदिकार्थविषयकत्वमवलम्ब्य प्रातिपदिकस्यै राम १५
वसंज्ञात्वेन विनियोगेऽपि संज्ञात्रिशब्दे हरदत्तसम्मत्या त्रयादेशाभावं वदन्तः परास्ताः। मूले वक्ष्यमाणभाष्यवार्त्तिकादिविरो

धेन हरदत्तस्य तिरस्कारात्त्वं गौणमुख्यन्यायमूलकत्वेनास्याभिप्रयुक्तोक्तश्लोकस्यापूर्ववचनत्वाभावात् द्वेदोक्तेरहेतुत्वाच्च यत्तु शे
खरे संज्ञाशब्दव्यावृत्तयेऽभिव्यक्तेति न्यायमूलकं प्रसिद्धेतीति सर्वनामसंज्ञासूत्रे भाष्ये उक्तं न त्वभिव्यक्तपदार्थाये इति न्यायमूलकं यत्प्र
सिद्धमन्यत्र दृष्टं तस्य सर्वनाम इत्यन्वर्थसंज्ञाबलेनैवात्र लाभो न त्वभिव्यक्तपदार्थाये इति न्यायेवारणेऽन्यर्थाद्दविरुद्धम्। एतेन सर्वनामस
ञ्ज्ञाप्रकरणे शेखरोऽप्येतदनुसारीः किन्त्वभिव्यक्तपदार्थाये इत्यस्य गौणमुख्यन्यायमूलकत्वं परकार्येष्विव प्रत्ययविधिसिद्धान्तयतस्तस्य कथं न
पूर्वापरविरोध इति विचारणीयमित्यपास्तमिति दिक्॥ अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति। तेन राज्ञा साम्ने
त्यादाविति। अल्लोपोन इत्यत्रादिति वर्णग्रहणेऽपि अनिनिति विशिष्टग्रहणमाद्यार्थवद्ग्रहणपरिभाषाप्रवृत्त्या राज्ञेत्यादावेव लोपस्यानन्तु
साम्नेत्यादौ परिभाषास्वीकारेण तूभयसिद्धिरेवमुत्तरत्रापि बोध्यम्। अङ्गादितिपरे इति। एवं च ज्ञापकत्वासङ्गत्या वचनरूपत्वमेवैतस्या इति
भावः। यत्वन्निति प्रकृतिभावबाधनाय क्रियमाणं कार्मस्ताच्छील्य इत्यत्र ष्टिलेऽनाताविति टिलोपनिपातनमेतत्परिभाषाज्ञापकमन्यथाम
निनन्तस्य कर्मन्शब्दादिनोऽनर्थकत्वेन प्रकृतिभावाप्राप्त्या न स्यादित इति टिलोपस्य सिद्धत्वाद्व्यर्थं स्यादिति तच्चिन्त्यम्। इनाद्यंशेन
स्य ज्ञापकत्वायोगादर्थवद्ग्रहणपरिभाषानित्यत्वस्य तेन ज्ञानेवितथैवेति बोध्यम्। व्याख्यातव्यं नाम्नोऽन्न वर्हिभ्याश्च लोम्नः स्यान्नेऽ
कार इत्यादिलक्षणनिर्दिष्टानामपि विशेषविषयकत्वेन सौत्रत्वेन वोपपत्तेश्चेति दिक्। एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा नि

प॰शे वृत्तिः क्वचिदेकदेशोप्यनुवर्त्तते अत्रैकयोगनिर्दिष्टानामित्यनुवर्त्तते एकस्मिन्नर्थे योगसम्बन्धे न निर्दिष्टानामित्यर्थः तत्फलि
१५ तमाह परस्परान्वितार्थकपदानामिति तेन द्वयोरपि परिभाषयोः समासनिर्देशः सेमासनिर्देशे च प्रवृत्तिः अत एव दामहा
यनान्ताच्चेति सूत्रभाष्ये संख्यादेरिति वक्तव्यमिति वार्त्तिकस्य प्रत्याख्यानाय संख्याव्ययादेर्ङीबित्यनुवर्त्तते व्ययादेरिति निवृत्त
मिति सिद्धान्तिनाभिहिते पूर्वपक्षिणा प्रथमपुरुषमादाय कथं पुनरेकयोगनिर्दिष्टानामेकदेशोनुवर्त्तते एकदेशेनेत्याशंकिते
सिद्धान्तिना एकदेशोप्यनुवर्त्तते तद्यथा तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ पक्षात्तिरित्यत्र मूले इत्यनुवर्त्तते पा
केति निवृत्तमिति सदृष्टान्तं द्वितीयमादाय समाहितम् पक्षात्तिरिति सूत्रे भाष्ये नूक्तविपरीतो दृष्टान्तदार्ष्टान्तिकभावः। यद्यप्येतत्सू
त्रस्थकैयटादुभयोः परिभाषयोर्द्वन्द्वसमासनिर्देश एव प्रवृत्तिरिति लभ्यते तथापि तस्य प्रकृताभिप्रायकत्वाद्विरोधः अत एवौ
तोऽम्शसोरिति सूत्रे भाष्ये ओतसिद्धि प्रतिषेध इति वार्त्तिकप्रत्याख्यानाय वासुप्यापिशलेरिति सुपीत्यनुवर्त्तते वेति निवृत्तमिति।
सिद्धान्तिनाभिहिते पूर्वपक्षिणा प्रथमामादाय कथम् पुनरेकयोगनिर्दिष्टयोरेकदेशोनुवर्त्तते एकदेशेनेति शंकिते एकयोगनिर्दि
ष्टानामेकदेशोप्यनुवर्त्तते यथान्यत्रालुगुत्तरपदे लुगधिकारः प्रागानङः उत्तरपदाधिकारः प्रागङ्गाधिकारादिति सदृष्टान्तं द्वितीय एम
मादाय समाहितमिति दिक्। भाष्यमाने न सवर्णानां ग्रहणं न प्रकारान्तरेणेति इकोहल्यचोरिति दीर्घनिर्देशाद्वृत्तौ वेति इको दीर्घविधाना १५

ज्ज्ञापकादित्यर्थः प्रत्ययांशे तु अवमिधानं भाष्ये उक्तम् तथाहि सन्नाशंस्भिक्षउः साम्प्रतिकपरिभाषायां निरूपयिष्यामः भाष्यमा
नोप्युकारः सवर्णान्न गृह्णातीति दिव उदिति ज्ञापिते [illegible] इति सूत्रे किद्ग्रहणं न तु वृत्तिपक्षे घुभ्यामित्यादौ पर
त्वाद्वृद्धिः पुनः प्रसङ्गविज्ञानाद्ध्रस्वस्यैव प्रवर्त्तते न तो ध्यम्। ङित्य [illegible] इत्याह ऋत उदिति यत्तु क्ङिद्ग्रहणं न तु वृत्तिपक्षे व्यञ्ज
नस्यानन्तरं तस्माद्ध्रस्वसिद्धेश्चारितार्थ्यस्य दुर्निरूपत्वात् तु नर्व्यर्थं [illegible] करणं यथा श्रुतरूपाश्रयणाद्वारा हलः इति दीर्घबाधनार्थस
म्यघत इति वक्तिन्यमः तत्र तद्भावितपक्षात्र यणो दीर्घस्याप्राप्तेरिति इग्यण इति सूत्रे शेखरे स्पष्टम्। गीः पूरित्यादावि दृदिति तपरक
रणं द्यौरिति दीर्घस्य सिद्धत्वे नावारणोपि स्यान्नाविन्यादावदिति तपरकरणात्सर्वनामस्थाने चेति दीर्घस्य वारणापत्तेश्च। पदप्य
द्सोसेरित्य उ इति ह्रस्वदीर्घयोः समाहारनिर्देशादूरूत्यादौ [illegible] नात्वाद्ध्रस्वस्य पूर्वनिपातेन नपुंसकह्रस्वदीर्घयोः प्राप्तयो
दीर्घस्य शब्दान्तरप्राप्त्याऽनित्यत्वेन पर [illegible] सवर्णदीर्घ [illegible] शेखरे उक्तेति वाच्यम्। समुद्राभ्राद्घ इति निर्देशा
त्पूर्वनिपातप्रकरणानित्यत्वे न दीर्घस्य [illegible] निपातादिति नन्वनिर्देश [illegible] त्वादुपपन्नत्वेन लाघवाद्द्वन्द्वजशीत्या उ काल इति
वक्तव्ये ऊकाल इति दीर्घनिर्देशो नो वर्णविषये पूर्वनिपातप्रकरणस्यानित्यत्वज्ञापनेन च उ इति रूपासिद्धेर्निर्विघ्नत्वात्। न च सनाशं
सेत्यादावनया सवर्णग्राहकतापत्तिः ऋत उदिति तपरकरणेन भाष्यमानेन सवर्णानां ग्रहणं नेत्यस्यानित्यत्वज्ञापनादिति कैयटे नै

प॰दी॰ वसमाधानात् नित्यत्वानित्यत्वयोश्च लक्ष्यानुरोधेन व्यवस्थितत्वात् उदुपधाया गोहः इत्यत्र लाघवादूत्वनिर्देशे एव कर्त्तव्ये दीर्घ
१९ निर्देशाद्भाव्यमानोप्युकार इति परिभाषाया अनित्यत्वाच्च धर्मिग्राहकमानाद्भाव्यमानादेशरूपोकारस्यैवानया सवर्णग्राहकत्व
बोधनाच्चेति संक्षेपः वर्णाश्रये प्रत्ययलक्षणन्नास्ति स्थानिवदित्यमुत्तरत्रैव सिद्ध इति मण्डूकप्लुत्या निषेधः विशेष्यतासम्बन्धेनेति
तथा च कार्य्यविधौ विशेषतया वर्णत्वसाधारणधर्मावच्छिन्नाश्रयणे प्रत्ययलक्षणं नेति फलितम् तेन श्वानूलेडग्निचिता
अचकाद चकाद्इत्यादीनां स्थानिवत्त्वप्राप्तावपि प्रत्ययलक्षणसूत्रस्य विधायकत्वात्सिद्धिः वर्णाश्रये इति निषेधस्तु कारीत्या वर्ण
भावान्न प्रवर्तते नन्वेवमग्निचिदित्यादौ क्विप उपदेशे यकारककारयोर्लोपे वशिष्टवकारमात्रस्यैवापृक्तस्येति लोपेऽचकादित्यादौ त्रि
पाद्या असिद्धत्वादितश्चेति तिप्सिपोरिकारलोपे हल्ङ्याविति सुक्तयोस्तिस्योश्च लोपे च कृते कृत्वति ह्यसिस्त्वानां कृत्वमिव स्थानिभूता
ल्वृत्तिधर्मत्वान्मूलकृन्मतेः नल्विधाविति निषेधात्स्थानिवत्त्वाभावेन ह्रस्वस्य पिति कृति तुगिति तुक् तिप्यनस्तेः सिपि धातो रुर्वेत्येतेषा
मप्राप्तेः प्रत्ययलक्षणसूत्रस्य विध्यर्थत्वावश्यकत्वे भाष्यकृतो नियमत्वे सङ्गतिमसङ्गइति चेन्न अल्मात्रवृत्तिर्यः स्थानितावरामः
च्छेदको धर्म आदेशविधावुपात्तस्तदवच्छिन्नस्थान्यल्वृत्तिधर्माश्रयविधौ स्थानिवद्भावो नेत्यनल्विधावित्यस्यार्थः अस्ति चस १९
त्वविधायके विसर्गत्वं तथेति तदवच्छिन्नस्थान्यल्वाश्रयविधौ णत्वे कर्त्तव्ये व्यूढोरस्केनेत्यादौ निषेधप्रवृत्तिः एवमन्यत्राप्यवधे

यमः प्रकृते चापृक्तस्य हल्ङ्यादिभ्य इत्यादावादेशविधायके ङ्यांद इत्यादावि वसमुदायरूपेणस्थान्यल्वोपादानात्स्थानितावच्छेदकधर्म
स्याल्मात्रवृत्तित्वाभावेन निषेधाप्रसक्तौ स्थानिवद्भावस्य सिद्धत्वात्प्रत्ययलक्षणसूत्रस्य नियामकत्वोपपत्तिः न चैवं कार्य्यविधावुपा
त्तनिमित्ततावच्छेदकधर्मको मुमकृदुक्तासाधारण्यनिवेशाद विशेष इति वाच्यम् स्थानिवदिति स्थानिपदश्रुत्या स्थानिताव
च्छेदकधर्मस्योपस्थितत्वेन धिन्वन्तीत्यादेरांजस्येन सिध्यनुरोधेनाग्रहणप्रत्याख्यानपरभाष्यप्रामाण्येन च स्थानितावच्छे
दकधर्म एवाल्मात्रवृत्तित्वरूपासाधारण्यनिवेशस्योचितत्वात् एतेन स्थानिस्थान्यवयवान्यतराल्वृत्तिधर्ममात्राश्रयेऽल्विधावि
ति निषेधस्य तन्त्र्यतरैरङ्गीकारादुक्तोदाहरणेषु स्थानिवत्त्वप्रशक्तौ प्रत्ययलक्षणसूत्रस्य विध्यर्थत्वसंभवे नियमत्वोक्तेरसंगतिप्र
सङ्ग इत्यपास्तम् एवं नपुंसकाच्चेति श्यादेशविधावुपात्तस्य स्थानितावच्छेदकधर्मस्यौङ्त्वस्य नाल्मात्रवृत्तित्वम् न च चतुष्टयी
शब्दानां प्रवृत्तिरिति पक्षे सञ्ज्ञाशब्दे शब्दस्य प्रवृत्तिनिमित्ततयौङ्त्वस्यौङ्शब्दरूपस्य वाच्यतासम्बन्धेनौविभक्तिवृत्तित्वेनाल्मा
त्रत्वमेवेति वाच्यम् सकलशब्दानां जातिरेव प्रवृत्तिनिमित्तमिति सिद्धान्तत्वात् सञ्ज्ञाशब्दनामोच्चारणभेदेन नानात्वाच्छब्दवृ
त्तिजातिरेव प्रवृत्तिनिमित्तं तस्याश्च परम्परासम्बन्धेन सञ्ज्ञानिष्ठत्वात् तस्त्वेऽधस्तथात्वप्रवृत्तिनिमित्तभूतनादृशजातेः सा
क्षात्सम्बन्धेन सञ्ज्ञाभूतशब्दवृत्तित्वादल्मात्रवृत्तित्वाभावान्निषेधाप्रसक्तात् श्यादेश औङ्दित्युपक्षुतवाक्ये नौङ्त्वस्याप

५ टी रम्परयातत्समानाधिकरणत्वादिप्रत्ययद्विवचनत्वादेश्चातिदेशात्साम्नी लोम्नी सुपथे कुले तिष्ठत लोम्नी रमे साम्नी इत्यादौ न दोषः ए
५७ नं ङे प्रथमयोरित्यम्विधावुपात्तस्य जातृत्वधर्मस्य प्रथमात्वस्य तन्मात्रवृत्तित्वमिति निषेधाप्रसङ्गादमादेशः प्रथमावदित्युपलक्षण
वाक्ये न प्रथमासमानाधिकरणद्विवचनत्वविभक्तित्वादेश्चातिदेशाद्युवांतिष्ठतः युवंवस्त्राणीत्यादौ न दोषः न चैवं ससजुषोरि
त्यादेशविधायके स्थानितावच्छेदकधर्मस्य सत्त्वस्य तन्मात्रवृत्तित्वेन निषेधप्रसरात् स्थानिवद्भावाभावेन रो सुत्वाभावात् पदान्त
त्वनिबन्धनो विसर्गो न स्यादिति वाच्यम् यथोद्देशपक्षे इह ससिनि सान्ते प्रवृत्तायाः परसंज्ञायाः कृतत्वं लौकिकैकदेशविकृतन्याये
नानुपायात्सर्वे सर्वपदादेशा इति न्यायेन ह्रस्वसिस्य स्थाने जायमानस्य ह्रस्वसिरित्यानुमानिकादेशस्य स्थानिवत्त्वेन पदत्वाद्वा विसर्गसि
द्धेः न चैवमप्यारेत्यादावादेशविधावुरदित्यत्रोपात्तस्य स्थानितावच्छेदकधर्मस्य ऋत्वस्य तन्मात्रवृत्तित्वेन निषेधात्स्थानिवद्भावात्रास्या
ऽभ्यासत्वनिबन्धनोऽत आदेरिति दीर्घो न स्यादिति वाच्यम् प्रक्रियाज्ञानवतां द्विरुक्तं धातुपूर्वभागत्वज्ञानस्य तस्मिन्सुलभत्वेन पु
नरभ्याससंज्ञाकरणेन दोषाभावस्य शेखरे एवोक्तत्वात् अनयादिशोक्तेभ्युदाहरणेषु पुनः संज्ञाकरणेनापि दोषाभावद्दर्शनमत्रोक्तं शेख
रे दोषाद्धौ विस्तरः एतेनानल्विधावित्यस्य नव्यतरोक्तेर्सिनार्थकत्वे इहसः ह्रस्वस इत्यादौ सोः सस्य रुत्वे रेफस्य स्थानिवत्त्वात्सुत्वेन तदन्तपदा १७
त्वात्तन्निबन्धनो विसर्गो न स्यात्साम्नी लोम्नी इत्यादौ प्रथमाद्विवचनस्य शी आदेशे कृते तस्य स्थानिवत्त्वादौ वृत्तिस्वादिप्रत्ययत्वमाश्रित्य भ

त्वाज्जायमानो विभाषा ङिश्योरित्यल्लोपो न स्यात् सुपथी कुले तिष्ठत इत्यादौ भसंज्ञे ल्लोपो न स्याद्युवांतिष्ठत इत्यादावमादेशे कृते प्रथमाया
श्च द्विवचने भाषायामित्यात्वं न स्याद्युवं वस्त्राणीत्यादौ विभक्तौ परतः शेषे लोपो न स्यात् तथा लोम्नी रमे साम्नी रमे इत्यादावीकाराने
द्विवचनत्वे स्थानिवद्भावेन न लभ्येते निष्ठुतप्रगृह्यत्वात् अ वीति प्रकृतिभावो न स्याद्दारत्नुरित्यादावुरतः स्थानिवद्भावेनाभ्यासत्वादत
आदेरिति जायमानोऽभ्यासदीर्घो न स्यादिति दूषणगणो निराकृतः अत एव धिन्वन्नीत्यादावुकारकृत्याद्धूधातुकत्वस्य वकारेऽति
देशादिणत अत्रे एलिङ्गन्तयेः परविधावितिन्यासे नल्विधावपि स्थानिवत्त्वस्य साधिकाभाष्योक्तिरेकदेशिन इति शेखरे एव स्पष्टमत
त एव च रेफस्थानिकविसर्गस्य हशब्दत्वं न स्थानिवत्त्वेनेति देवाः सन्नि ह्रस्वसत्रेत्यादौ यत्वातिप्रसंगाभावादशग्रहणं प्रत्याख्यातं भोभ
गोऽइत्यत्र भाष्ये॥ तत्र हि अन्यः षट्भवति तत्र पूर्वत्रासिद्धमिति यत्वस्यासिद्धत्वाद्विसर्जनीयेन भाव्यमित्यश्चेचरसीति कैयटप्रदर्शिता
शयेनाशग्रहणमनर्थकमन्यत्राभावात् न त्वत्र रुरस्त्यन्यदतोश इति सिद्धान्तिनाभिहिते रोः सुपीति विसर्गादेशविधायके रोरीति रेफानुवृ
त्तिमनभिसन्धायंशब्दत उपात्तस्य स्थानितावच्छेदकीभूतरुत्वस्य तन्मात्रवृत्तित्वाभावेन निषेधाविषयतया स्थानिवत्त्वेन रुत्वाच्छब्दः सुपयः
सु इत्यादौ यत्वं न स्यादित्याशयेनैकदेशिना ननु चायमस्ति छन्दः सुपयसिनीत्युक्ते रोः सुपीत्यत्रापि रेफानुवृत्तिमभिसंधाय निषेधविषय
त्वात्स्थानिवत्त्वाभावेन छन्दस्सु ह्रस्वसत्रेत्यनयोः साम्यमेवेति प्रायेण किम्पुनः कारणं सुपर एवोदाह्रियते न पुनरयं ह्रस्वसत्रेति सिद्धान्तिनाभि
हिते स्वरदसानयोरित्यत्रैव रेफानुवृत्तिसन्धानेन न ते नैवैकदेशिनाऽस्त्यत्र विशेषः ह्रस्वसत्र ह्रस्वसत्र विसर्जनीये कृते न भविष्यतीत्य

प॰टी॰ १८ मिहितेरोः सुपीत्यत्रापि रेफग्रहणानुवृत्तिमभिसन्धायानेनैव सिद्धान्तिने हापि विसर्जनीये कृते न भविष्यति छन्दस्युपयः सुरित्यादाव
भिहितेरेफाननुवृत्तिवादिनास्थानिवद्भावान्नाप्नोतीति स्वाशयं प्रकाशितेरेफानुवृत्तिवादिनानिरुक्तार्थानभिज्ञेन तेनैकदेशिना ननु चे
हापि प्राप्नोति हिस्सलत्वहस्सलत्वेत्याशंकितेरेफाननुवृत्तिवादिनानिरुक्तार्थाभिज्ञेनानल्विधौ स्थानिवद्भावद्रूनिसिद्धान्त्येकदेशिनाभिहि
तेरेफानुवृत्तिवादिनासिद्धान्तिनोक्तमथायमल्विधिः स्यान्नशक्यमशग्रहणमवक्तुं बाढं शक्यमल्विधिस्तर्हि भविष्यतिकथमिदमस्ति
शेषेति तेनोवक्ष्यामि खरवसानयोर्विसर्जनीयः रः तत्नोरोः सुपिविसर्जनीयः रः इत्येवेति तत्र उन रार्थन्नत्वं शग्रहणं कर्तव्यं हलि सर्वे
षां हलि अशीति यथा स्यादिह माभूद् वृक्षयतेरप्रत्ययः वृक्षवकरोतीत्युक्तं दृक्षवृक्षसतीत्यादौ दोषानुद्धारादेवमादेरनभिधानस्यैवाव
श्याश्रयणीयत्वेयमेकदेश्युक्तिः अनुबन्धैकानात्वानेकान्तत्वयोः वृक्षयोः साधारण्येनाशग्रहणप्रत्याख्यानपरं भाष्यमेतदित्सन्त्रा
याउभयथापिसत्वेनतन्तत्वविशेषस्याभावान्नकैयटेन तथाऽवर्णनीच्च यत्तु अनुबन्धानेकान्तत्वादिमतेः शग्रहणवैयर्थ्यमत्र निषा
धकिन्तु तन्नतेटकारोपलक्षितेटत्वरूपसकारमात्रवृत्तौ टत्वस्याप्यतिदेशो न प्राप्नोतीत्याशंका नमुने इतियोगविभागकल्पे कादेश
प्रतीवरीर्वृत्तमप्यपि सिजलोपस्यसिद्धत्वात्समादधुरलच्छिन्त्यम् आदेशविधौ ग्रहोलिटीत्यत्रस्थानितावच्छेदकधर्मस्येटत्वस्याल्मात्रे १८
वृत्तित्वाभावेन निषेधाप्रसक्त्या स्थानिवत्वेनेष्टसिद्धेः अत एव विशिष्टत्वेषोऽनलमाश्रयणे दृष्टं नामेतीतिभाष्योपपत्तिः नमुने इतियोग

विभागस्य भाष्ये दर्शनेनाप्रामाण्यं कल्त्वाच्च तत्त्वेमिः लोपएकादेशोसिद्ध इत्येवमादिवार्तिकस्यवैयर्थ्यापत्तेश्चेतिदिक् नन्वेवंप्रा
र्थविधौ निमित्ततावच्छेदकेदोषितोक्तासाधारण्यस्यानिर्वेशत्वान्निमित्तवैकल्यप्रयुक्तोपदेशप्रवृत्ताववजिदेशो मृग्यते तत्स्था
निमित्तस्यस्थान्यसाधारणधर्मत्वेएवनिषेधप्रवृत्तेर्वभूविवेत्यादौ न दोष इत्यग्रिमशेखरपंक्तिर्विरुध्यते इति चेन्नालम्; त्र वृत्ति
र्यः स्थानिसम्बन्धितावच्छेदको धर्मस्तदवच्छिन्नास्थानिसम्बन्ध्यत्वमिति धर्माश्रयविधौ स्थानिवत्त्वं नेति द्वितीयार्थाभिप्राये
णतत्पंक्ति प्रसरात्तत्फलकथनाव्यवहितोत्तरमेव तदुक्तेः द्वितीयार्थविषये च सर्वत्र स्थानिसम्बन्धितावच्छेदकस्याल्मात्र
वृत्तित्वोक्तेनसह निमित्ततावच्छेदकस्य स्वरूपेणासाधारणधर्मेण चाभेदस्यैव सत्वेन निमित्ततावच्छेदकेफलितमसाधा
रण्यमादाय तदुक्तोपपत्तिः यथाप्रदीव्येत्यादौ स्थानिसम्बन्धितावच्छेदकतत्वस्य निमित्ततावच्छेदकात्वेन सह साधारण
धर्मेणाभेदः प्रथमार्थविषये तु क्वचिन्न घुकामः करद्वह पादौ स्वरूपेणसाधारणधर्मेण च तयोरभेदेपि धिन्वन्ति देवाः स
न्तीत्यादाव तिदिष्यमाननिमित्ततावच्छेदकरुत्वाद्वंधातुकत्वयोः स्थानितावच्छेदकीभूतरेफत्वोत्वादिना स्वरूपसाधा
रणधर्माभ्यामभेदाभावात् न तथा सर्वत्र व्यवहार इति विस्तरस्तु मत्कृतशेखरोद्धारतोऽवधेय इत्यलम् चित्रायामिति चित्रा
रेवतीति वार्तिकेन सन्धिवेलेति विहितस्याणो लुकि लुक्तद्धितेति स्त्रीप्रत्ययस्य लुकि अणोयोः कार इति प्रत्ययनिरूपितविशे

प.टी. व्यनारूपप्राधान्यस्य वर्णे सत्वादनया प्रत्ययलक्षणनिषेधान्ङीवभावे दावित्यर्थः प्रत्ययलक्षणसूत्रस्य विधायकत्वाभिप्रायेणाह्येवम
१९ ल्विधाविति यथाकथंचिदल्विधावित्यर्थः निषेधिकेति वर्णत्वसाधारणधर्मावच्छिन्नस्य विशेष्यतया आश्रयणेनोहितमित्यादि
विषयकेण वोपयोत्यादावित्यर्थः तेनानृणेडित्यादौ नृण हरमभवत्येवेति भावः नृणा हरस इत्यत्र हलीतिनिवर्त्य तृणहानीत्यादौ प्रसक्त
मनचिनेत्यनुवृत्त्या तृणेडित्यादेरुक्तरीत्याऽल्विधाविति निषेधाप्राप्त्या स्थानिवत्वेन सिद्धिं सम्पाद्य प्रत्ययलक्षणसूत्रस्य नियामकत्व
माह भाष्यकारस्तेन सुदृषदित्यादिसिद्धिरित्यन्यत्र विस्तरः उणादयो व्युत्पन्नानि प्रातिपदिकानि इदमेवेति नन्वर्थवत्सूत्रस्यापि ज्ञाप
कत्वसंभवादिवोभंसङ्गतमितिचेन्न बहुपटवइत्याद्यर्थं तस्यावश्यकत्वात् नचवहुच्पूर्वइत्येववक्तव्ये सामान्यप्रणयनमन्यार्थसत्व
पकमेवेतिवाच्यम् तथासति समासग्रहणस्य नियमार्थत्वानापत्त्या मूलकेनोपदंशमित्यादौ कृद्ग्रहणपरिभाषया कृदन्तत्वेन प्रातिप
दिकत्वातिप्रसङ्गात् नचतेनप्रोक्तमित्यादिनिर्देशान्कृदन्तत्वेन प्रातिपदिकसञ्ज्ञायां कृद्ग्रहणपरिभाषाया अप्रवृत्तिरिति वाच्यम् नि
र्देशस्य सौत्रत्वेनाप्युपपत्तेः पुंयोगादाख्यायामिति सूत्रे उद्योतकृदुक्तरीत्या फलाभावाच्च एतेन प्रोक्तमित्यादिनिर्देशेन कृदन्तत्वप्रयुक्त
प्रातिपदिकसञ्ज्ञायां कृद्ग्रहणपरिभाषाया अप्रवृत्तिज्ञापनादुक्तोदाहरणे कृदन्तत्वेनातिप्रसङ्गाभाव इत्यपास्तम् सर्वत्र तत्तन्निर्देशेने राम:
वोपपत्तेः सूत्राणां वैयर्थ्यापाताच्च शब्देन्दुशेखरे निरूपितमिति उणादयो बहुलमिति सूत्रे तत्र उणादय इति सूत्रं व्याकरणान्तरस्यो १९

णादिव्यवस्थापकम् । उणाद्यन्ताः शब्दाये व्याकरणान्तरेण व्युत्पादिता स्तत्र बहुलमिति वक्तव्यं वर्तमानकालाधिकारे चतेवक्तव्याः
भूतेपीतिवाच्यमिति सूत्रार्थः स्वशास्त्रे त्वेषां साधुत्वबोधनं चैतावतैवेति तु आयामन्तात्वाय्येत्यादानुवादेषु नवैयर्थ्यशंकितं स्पष्
बायजुषेत्यादौ षत्वनुबहुलग्रहणादेवेत्यादेशप्रत्यययोरिति सूत्रे भाष्ये स्पष्टम् एतेन नावश्यं सर्वत्रा व्युत्पन्नत्वमेवांगीकर्तव्यमे
षाम् तितुत्रेत्यादौ केषांचिद्ग्रहणवैयर्थ्यप्रसङ्गात्सर्पिषा धनुषेत्यादौ प्रत्ययावयवत्वात्षत्वं भवतीत्यपास्तम् तुश्छन्दसि रिष्टमेयः
स्विनिचोभयोर्ग्रहणं यथास्यादिति तृचश्चकारप्रयोजनं ण्वुलतृचाविति सूत्रभाष्यादुणादीनां व्युत्पन्नत्वं प्रतीयमानमपि शाक
टायनरीत्या न पाणिनिरीत्या तस्याव्युत्पत्तिपक्ष एवेत्यायनेयीति सूत्रे भाष्ये स्पष्टम् अत एव मातयतीत्यादौ तृलोपवारणायात्राव्यु
त्पत्तिपक्ष एवावश्यक इतिक्तृत इति सूत्रे कैयटः प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम् सच शब्दरूपविशेष्यमा
दायेति यथावनोरचेत्यादौ वन्नन्तादितिप्रथमस्तदन्तविधिः सर्वनामाव्ययसञ्ज्ञायान्तदन्तविधिवत् येतु अनयापरिभाषया तद
धन्तस्यापूर्वबोधनवत्तदन्तांशस्यापि वाचनिकत्वं वदन्ति तेषां मते शब्दरूपविशेष्यानपेक्षैवं तन्मते सर्वनामाव्ययसञ्ज्ञायामपिवा
र्त्तिककृदुक्तेः पूर्वस्तदन्तविधिर्बाध्यः अत एव येनविधिरिति सूत्रे भाष्ये तदन्तविधिप्रयोजनप्रस्तावे प्रत्ययग्रहणे चापञ्चम्याः प्र
त्ययग्रहणं च प्रयोजनमिति भाष्यप्रतीकमुपादाय प्रत्ययग्रहणे यस्मात्स विहितस्तदादेरिति सिद्धे तदन्तविधावपञ्चम्या इति निषेधा

प.टी. र्थवचनमिति कैयटेन व्याख्यातं स्पष्टं चैतदुद्योते प्रत्ययनिषेधमुनात्र प्रस्तुतविशेष्यविषयकयेन विधिरिति सूत्रविहितन दन्तविधे
२० रेव तेन निषेधात्तस्य ग्रहणवत्प्रातिपदिकविषयत्वाच्चात एव प्रथमपक्षेपि न निषेधः विशेष्यप्रस्तुततानाच साक्षादुपात्तविशेष्याधि
कृतविशेष्यनियतत्वाक्षिप्तविशिष्येतदन्यतमत्वं पारिभाषिकं कैयटप्रदर्शितं बोध्यम् नियतत्वं वाव्यभिचारित्वरूपं यथेकोझलित्य
त्र सनाधातोरितीतिदिक् कौस्तुभोक्तिं खण्डयति यत्त्विति प्रत्यये च निपादिना ख्प्रत्ययः तस्य प्रत्ययस्य तादृशेति स्वप्रकृत्यवयवके
त्यर्थः व्यभिचारेणेति यत्तु प्रक्रियाज्ञानवतांव्यभिचाराभावान्न दोष इति तच्चिन्त्यम् प्रक्रियाज्ञानवतांना दृशसमुदायः पूर्वमा
सीदिति ज्ञानसत्त्वेपि स्वरूपसन्नादृशसमुदायस्य सम्प्रत्यभावेन व्यभिचारावारणात् तेषांतादृशसमुदायवुध्यातादृशसमुदाय
तदन्तसत्ताज्ञानस्यापि संभवे न तज्ज्ञानमादायसञ्ज्ञाप्रवृत्तेरानर्थक्याच्च आवधिषीष्टेत्यादौ तेषां हन्तिवुद्धिसत्त्वेनात्मनेपदस्सिद्धे
स्यानिवत्सूत्रव्यापारस्यानर्थक्यापत्तेश्च सर्वादीनि स्वरादिनिपातमित्यादौ प्रत्ययभिन्ने इकोयणचीत्यादौ कैयटोक्तरीत्या शब्दरू
पविशेष्यमादायतदन्तसञ्ज्ञाप्रवृत्तेरवश्यवक्तव्यतये हापि तदाश्रयणस्यैवौचित्याच्च किञ्च शब्दीसाकांक्षा शब्देनैव प्रपूर्यते इ रामः
तिन्यायविरोधेनाक्षिप्तस्य शब्देऽन्वयप्रतियोगित्वाभावात् शब्दवृत्त्युपस्थापितस्यैव तथात्वात् अन्यथा घटपटाकाशादेरपि वो २०
धापत्तिः यत्तु वृत्त्युपस्थापिततद्व्यभिचारिणोरुभयोरपि वृत्त्युपस्थापितत्वमङ्गीक्रियते अत एवेकोयणीत्यादाविकः वृत्त्युपस्था

पितत्वस्वेकारादिसञ्ज्ञिनां दीर्घादीनां तद्व्यभिचारितत्वाद्वृत्त्युपस्थापितत्वात्स्पष्टार्थान्वयप्रतियोगितेति सिद्धान्तः तात्पर्याभावादतिप्र
सङ्गभंगस्य सुशकत्वेन वृत्त्युपस्थापितस्यैव शब्देऽन्वयप्रयोगितायाअकल्पनाद्व्यक्तेराक्षेपाद्व्याभं संख्या कर्मादेस्तत्रान्वयं च वद
तां जातिवादिनां मनस्येवमेवव्यवस्थापनीयत्वादिति तच्चिन्त्यम् उक्तरीत्या तादृशसमुदायस्य प्रत्ययाव्यभिचारित्वाभावात् शब्दे विशब्दे
पिशब्दस्य वृत्त्यङ्गीकारमतेशक्यवृत्त्युपस्थापितशब्दव्यभिचारिगगनादेर्बोधस्य शब्दाद्वारवारणाच्च द्वितीयादिस्सलेणावच्छिन्नो घटः सु
न्दरः संपश्येत्यादौ घटपदवृत्त्युपस्थापिततादृशघटाव्यभिचारिणो रूपादेर्बोधापत्तेश्च इगादिपदे व्यक्तिपक्षे दीर्घादिप्लुतलक्षणयाः
स्वीकारेण वृत्त्युपस्थापितत्वाच्च जातिपक्षे जातितदाश्रयव्यक्त्योरभेदेनादोषाच्च मीमांसकानां जातिवादिनामाक्षेपस्य मञ्जूषादौ
दूषितत्वेन जातिव्यक्त्योरभेदस्य व्यक्तौ लक्षणाश्रयणे नादोषाच्चेति दिक् अन्वर्थसञ्ज्ञालभ्यः सञ्ज्ञी विशेष्य इति तु न युक्तमित्युद्यो
ते स्पष्टम् ननु सुपि चरोः सुपिकेण इत्यादौ सुवन्ते इत्याद्यर्थापत्तिः पञ्चम्यन्तस्य प्रत्ययविशेषणत्वाभावेनापञ्चम्या इति निषेधस्या
प्रसरादत आह यत्र प्रत्यय इति तस्मिन्निति परिभाषया सुपि परे इत्यर्थे नियमेन कस्मादित्यवधिकांक्षासत्त्वेनोपस्थित पूर्वस्ये
त्यस्याङ्गस्य तदादेर्वावधितत्वेनान्वयेन तस्य तासीत्यादौ मूले वक्ष्यमाणरीत्याऽपञ्चम्या इति निषेधादित्युद्योते स्पष्टम् इदं भाष्य
मेवमानमिति एवोप्यर्थे प्रसिद्धो वातेन वक्ष्यमाणभाष्यात्तर सङ्ग्रहः अन्यत्र विस्तर इति उद्योते शेखरादौ चेत्यर्थः यत्तु गार्ग्या

प॰टी॰ यत्तु इत्येनाबहुदाहृतं परमशब्दार्थस्य गार्ग्यापत्ये विशेषणमेवं च गार्ग्यस्य सापेक्षत्वेन तद्धितस्याभावप्रसङ्गात् वृत्तौ वा विशे-
२१ षणत्वाभावप्रसङ्गश्चेति कैयटमतयोर्बलं तच्चिन्त्यम् परमशब्दार्थस्य गार्ग्यापत्ये विशेषणत्वे परमगार्ग्यस्य प्रष्ठतित्वेसं-
भावनाया एवाभावात् परिभाषाप्रयोजनस्यासंभवापत्तेः गार्ग्यशब्दार्थस्य पकगार्थनिरूपितप्राधान्यसत्त्वेपि परमशब्दार्थनिरू-
पितप्राधान्यसत्त्वेन भवति विप्रधानस्य सापेक्षस्यापि समास इति समर्थसूत्रभाष्योक्तरीत्या तद्धितार्थसापेक्षत्वेपि परमगार्ग्ययोः
समासे सति समुदायात्प्रसक्ततद्धितस्यानयोः परिभाषया वारणे गार्ग्यशब्दात्प्रसक्तानां तद्धितानां मन्ते निर्विघ्नत्वात् समुदायेनैकार्थी-
भावेऽवयवे नैकार्थीभावसद्भावस्याभ्युपगमात् अत एवानुपसर्जनादिति सूत्रप्रयोजनकथनावसरे इदमेव हि प्रयोजनं प्रधा-
नेन तदन्तविधिर्यथा स्यात् कुम्भकारीनगरकारी इतरथा हि प्रत्ययग्रहणपरिभाषयाऽवयवात् ङीबुत्पत्तिः प्राप्नोतीति कृद्ग्र-
हणपरिभाषा नु नात्र प्रवर्ततेऽलिति कृद्ग्रहणात् ङीबन्तेन समासेऽपि गतिकारकोपपदानामिति परिभाषाया जागरूकत्वादव-
यवादुत्पत्तौ को दोषः कौम्भकारेयो न सिध्यति अवयवस्य वृद्धिस्वरौ स्यातामित्युक्तम् अनुपसर्जनादिति सूत्रे भाष्ये पृथगेकार्थी- एमः
भावस्य वृत्तिनिमित्तत्वे तु एतद्भाष्यासङ्गतिः स्पष्टैव अत एव पञ्चगवधनेत्यस्येति त्रिपदे बहुव्रीहौ समुदाये एकार्थीभावस- ३१
त्त्वाद्द्वयोरपि तत्सत्त्वाद्भवमात्रेणोत्तरपदे परतो द्वयोर्द्विगुसंज्ञा तद्धितार्थेत्यनेन न सिध्यति इति स्पष्टमन्यत्र। स्यादेतत् न समुदाये एकार्थी-

भावमाश्रित्य द्वयोर्द्विगुसंज्ञोत्तरं टचि तदन्तस्यार्थवत्सूत्रेण प्रत्ययान्तत्वात्प्रातिपदिकत्वाभावेपि तद्धितान्तत्वात्समासत्वा-
च्च प्रातिपदिकत्वापत्तौ टाबापत्तिः न च कृत्तद्धितेति सूत्रेप्यर्थवत्पदानुवृत्तेरर्थवत्समासस्यार्थवत्तद्धितान्तस्य प्रातिपदिकसंज्ञा-
विधानान्न दोषः तत्राप्युक्तरीत्याऽर्थवत्त्वस्य सत्त्वादिति चेदत्र शेखरकृतः एतत्संज्ञाफलीभूतविभक्तीतरसमभिव्याहारानपे-
क्षस्य लोकेऽर्थविषयकबोधजनकत्वरूपं पारिभाषिकमर्थवत्त्वं द्वयोः सूत्रयोर्गृह्यते तेषामयमाशयः तद्धितार्थोत्तरपदस-
माहारे चेति सूत्रस्थभाष्यादिप्रामाण्येन समुदाये एकार्थीभावस्यैकस्यैव स्वीकारेण तेनैवावयवानां तत्पुरुषादिसंज्ञोपकारे-
ण च पृथगेकार्थीभावाकल्पनात् पञ्चगवधन इत्यादौ पञ्चगवेत्यस्यार्थबोधने विभक्तीतरधनशब्दापेक्षणेन च न प्रातिपदि-
कत्वमतो न टाप् न चैवं टजपि न स्यात्तत्र प्रातिपदिकाधिकारादिति वाच्यम् स्वमते समासान्तविधौ प्रातिपदिकानधिकारस्य
शेखरे एवोक्तत्वादिति ननूक्तरीत्या पारिभाषिकार्थवत्त्वस्य प्रातिपदिकसंज्ञाविधावाश्रयेऽनुपसर्जनाधिकाराभावे द्वितीय-
तदन्तविधेरभावेन प्रत्ययग्रहणपरिभाषया कुम्भकारेत्यादौ कारशब्दावयवात् ङीबापत्तिप्रतिपदपरोक्तभाष्यविरोधः कारेत्यस्या-
र्थबोधने विभक्तीतरकुम्भपदसमभिव्याहारापेक्षणेन निरुक्तार्थवत्त्वाभावेन कृदन्तत्वप्रयुक्तप्रातिपदिकत्वाश्रयस्य ङीपोऽ-
प्राप्तेरिति चेन्नैवम् कुम्भकार इत्यादौ कुम्भकारयोः समासप्रयुक्ते एकार्थीभावे कः कारेति प्रकृतिप्रत्यययोः कृदन्तत्वप्रयुक्ते

प॰शे॰ कार्थीभावोऽपरस्तत्र समासप्रयुक्तैकार्थीभावमादाय कारेत्यस्यार्थबोधने कुम्भादिपदसमभिव्याहारापेक्षत्वेऽपि यः कृदन्त
२२ त्वप्रयुक्तैकार्थीभाववलमादाय कारेत्यस्यार्थबोधने विभक्तीतरकुम्भादिपदसमभिव्याहारानपेक्षणात् ननु विभक्तीतरसमभि
व्याहारानपेक्षत्वं विभक्तीतरप्रयोगानधीनत्वेन प्रयुज्यमानत्वमनधीनत्वं च तद्भिन्नाभूतत्वम् तथा च तत्रोपपदमिति सूत्रे तत्रग्र
हणात् प्रत्ययविधेरुपपदसन्नियोगशिष्टत्वात्कारेत्यस्य विभक्तीतरकुम्भोऽपि पदप्रयोगाधीनत्वेनैव प्रयुज्यमानत्वात्पारिभावि
कार्थवत्त्वाप्रसङ्ग इति चेत्सत्यम् उक्तरीत्या समभिव्याहाररूपस्योपपदप्रयोगस्य समासासमासयोर्नैयत्येऽपि हटरेकार्थीभावप्र
युक्तातिरिक्ताशक्तिमतः कारेत्यस्य नद्धिलाप्यर्थबोधकत्वानपायात् अत एवोपसमीपउच्चारितं पदमुपपदं सामीप्यं च सम्बन्धन
पदघटितसूत्रविधेयप्रत्ययप्रकृत्यर्थेऽन्वयित्वमात्रमित्युक्तं शेखरे न चैवमपि लोकेऽर्थबोधजनकत्वाभाव एवेति वाच्यम् स
मासस्य नित्यत्वेन लोके पृथक्प्रयोगाभावेऽप्यर्थबोधकत्वनिर्विघ्नत्वात् कथमन्यथा मूलकेनोपदंशं कारकोऽश्नातीत्यादावुपदं
शंकारकत्वादेः समासाभावेऽर्थवत्त्वोपपत्तिः णमुलन्तादेरर्थबोधने उपपदापेक्षणात् अत एव गतिकारकोपपदानामित्य राम॰
त्रोपपदग्रहणं तद्व्याख्यादिकं च संगच्छते अत एव चेहापि नहिंसाकूटिनंव्यावक्रोशी हे अत्र प्रातिपदिकसञ्ज्ञेऽवयवस्यापि स २२
मुदायस्यापि तत्रावयवस्य प्रातिपदिकसञ्ज्ञान्तराऽवयवादुत्पत्तिः असञ्ज्ञेतावयवादुत्पत्तौ को दोषः कौम्भकारेयो न सिध्यति

अवयवस्य वृद्धिस्वरौ स्यातामित्यनुपसर्जनादिति सूत्रभाष्यसमानाकारं पुंयोगादाख्यायामिति सूत्रभाष्यं संगच्छते न चै
वमपि प्रादीनां द्योतकानामितरधात्वादिसापेक्षतयैव बोधकानां प्रातिपदिकत्वानापत्तिरिति वाच्यम् कृत्तद्धितेति सूत्रेऽनुक्तसमु
च्चयार्थकचकारादधिपरीतिज्ञापकाद्धा तत्सिद्धेरतेनैश्च चकारेत्यादौ वामनस्य निरुक्तार्थकत्वाभावात्प्रातिपदिकत्वानापत्तिरिति शं
कापि समाहिता अन्ये तु विभक्तीतरस्योपपदातिरिक्तस्यैव विवक्षणान्न कुत्रापि दोष इति वदन्ति केचित्तु कुम्भकर्मकोत्पत्त्यनुकूल
क्रियाश्रयसम्बन्धित्वे विवक्षिते सामान्योत्पत्त्यनुकूलक्रियाश्रयसम्बन्धित्वविवक्षाया अप्यनपायेनावयवात्कारशब्दादुत्पत्तिरे
कार्थीभावेऽपि समुदायेनैकार्थीभावे प्रधानावयवार्थेनापि तस्य दुर्वारत्वादित्येकार्थीभाववादिन आहुः गुरवस्तु अनुपसर्जनाधि
कारेण तदन्तग्रहणे ज्ञापिते विकारशब्दस्य व्यपदेशिवद्भावेनाणन्तानन्तत्वान्नोपि कदाचिन्ङीपि कुंभकारेयो दुर्वारः किं च समुदाय
न्ङीप्यपि स्त्रीप्रत्ययेन तदादिनियमाभावेन केवलादपि कारीशब्दात्कदाचिड्ढक्किसद्दुर्वार इति प्रकारद्वयेनाशंक्यैतदधिकारादेव
ज्ञापकादसहायेऽव्यपदेशिवद्भावप्रवृत्तेः अर्थवत्सूत्रोक्तार्थवत्त्वाभावेनाणन्तस्याप्रातिपदिकत्वाच्च तदादिनियमाभावे नाधिक
स्य कार्य्यं बोध्यते न तु न्यूनस्येत्यदोषाच्चान्यथा तदन्तग्रहणे फलाभावेन तद्वैयर्थ्यस्पष्टमेवेत्यनुपसर्जनादिति सूत्रस्थशेखरस्याभि
प्रायेति प्रतीकमुपादाय एतदधिकारादेवेत्येवकारघटिताच्छेखरग्रन्थात्सर्वत्रान्यथेत्यादियुक्तेः श्रोतार्थके तदधिकारात्माकं यथाश्रुत

प.टी. र्थवत्त्वेनोक्तरीत्याऽणन्तात्प्राप्तिः अवयवादुत्पत्तिः प्राप्नोतीतिभाष्यमपि यथोक्तपूर्वपक्षाभिप्रायेणैव अधिकारसामर्थ्यं न पुनः पु
२३ नरुक्तत्रिनयबोधनेपारिभाषिकार्थवत्त्वस्यापि बोधनान्नावयवात्प्राप्तिः अत एवावयवादुत्पत्तिः प्राप्नोतीतिभाष्यप्रतीकमुपादाय
कृत्तद्धितेत्यत्र कृद्ग्रहणे गतिकारकेतिपरिभाषासंचारेण समुदायस्य प्रातिपदिकत्वेन तत एव ङीप्स्यादिति कैयटोक्ताशंकायां वस्तुतो
वयवस्य प्रातिपदिकत्वात्समुदायस्य वा नणन्तत्वान्ङीपोऽप्राप्तिरेवेति शंकितुमुचितमित्युद्योतकृदुक्तिः संगच्छते इत्याहुः वस्तुत
स्तु मदुक्तरीत्या भाष्यस्योपपत्तेः पूर्वपक्षाभिप्रायकत्ववर्णनं नोचितम् अत एवोद्योते शंकितुमुचितमित्युक्तम् शेखरे तु अर्थवत्सूत्रोक्तार्थ
वत्त्वाभावेनाणन्तस्याप्रातिपदिकत्वाच्चेत्यपपाठ एव जीर्णपुस्तकेष्वनुपलम्भात् यत्प्रकारद्वयक्रमेण प्रकरणं तत्प्रकारद्वयनि
राकरणद्वयक्रमौचित्येन सन्तोऽपि मध्ये पाठस्य प्रक्षिप्तत्वानुमानाच्चाव्यवहिततदग्रिमे तदेवाभिप्रेत्यादिनोपष्टंभकभाष्याभिधान
स्यासंगतिप्रसङ्गाच्चेति युक्ततरं प्रतीमः अथैवं देवदत्तो गार्ग्य इति समुदायस्य वक्ष्यमाणप्रकारेण निरुक्तपारिभाषिकार्थवत्त्वात्तद्धि
तान्तत्वाच्च कृत्तद्धितेति सूत्रेण प्रातिपदिकत्वापत्तौ सुब्लुगापत्तिः न च समासग्रहणकृतनियमेन निस्तारः यत्र संघाते पूर्वो भागः पद राम
न्तस्य चेत्संघातस्य प्रातिपदिकसंज्ञा तर्हि समासस्यैवेति दीक्षितोक्तनियमेन वारणसंभवेऽपि यस्य समुदायस्य पूर्वपरभागौ स्वातन्त्र्ये २३
णप्रयोगार्हार्थवन्तौ च तस्य चेत्समुदायस्य तर्हि समासस्यैवेति शेखरोक्तनियमेन देवदत्तो गार्ग्येति समुदायघटकपूर्वपरभागयोरर्थ

वत्तां च तस्य चेत्समुदायस्य तर्हि समासस्यैवेति शेखरोक्तनियमेन देवदत्तो गार्ग्येति समुदायघटकपूर्वपरभागयोरर्थवत्त्वेऽपि परभा
गस्य स्वातन्त्र्येण प्रयोगार्हत्वाभावादुद्देश्यतावच्छेदकतानाक्रान्तत्वान्नियमस्याप्राप्तेः न च स्वातन्त्र्येण प्रयुज्यमानत्वं विहाय तादृशप्रयो
गार्हत्वनिवेशेन तस्य गार्ग्येऽसत्त्वेनैतन्नियमेनापि वारणसंभव इति वाच्यम् वृत्त्याश्रयराजन्ङस्पुरुषसु इत्यलौकिकवाक्यस्य पूर्वप
रभागसंग्रहार्थमेवार्हपदोपादानेनात्र सुपः प्राग्भागस्य स्वातन्त्र्येण प्रयोगार्हत्वाभावात् न च सुबतिरिक्तशास्त्रीयकार्यरहितस्य राज
न्ङस्पुरुषसु इत्यस्यैव सुबरहितस्य गार्ग्य इत्यादेरपि प्रयोगार्हत्वमस्त्येवेति वाच्यम् परस्मै अर्थबोधनार्थं प्रयुक्तस्य स्वार्थपरिपूर्ण
स्यापदमिति निषेधाविषयस्यापरिनिष्ठितमिति निषेधमात्रविषयस्यालौकिकवाक्यस्य सुबन्तस्यैव प्रयोगार्हत्वेन सुब्रहितस्यो
क्तविशेषणवैपरीत्येन तदभावात् न च बहुपटकः पुत्रकाम्यत्यादौ बहुच्काम्यजादेरिव घटकतया गार्ग्यस्य प्रयोगार्हत्वमस्त्येवेति वाच्य
म् यस्य समुदायस्य प्रातिपदिकसंज्ञा चिकीर्षिता प्रयुज्यमानतत्समुदायघटकस्यैव घटकतया प्रयोगार्हत्वस्वीकारेण गार्ग्यांशे वि
भक्तिरहितस्य देवदत्तो गार्ग्य इति समुदायस्य प्रयुज्यमानत्वाभावेन तद्घटकस्य गार्ग्य इत्यस्य घटकतयापि प्रयोगार्हत्वाभावात् प्रयुज्य
मानत्वं च लौकिकालौकिकसाधारणं देवदत्तो गार्ग्य इत्यस्य घटकतयापि प्रयोगार्हत्वाभावात् प्रयुज्यमानं च न लौकिकं नाप्यलौकिक
म् न च कुंभकार इत्यादौ कार इत्यादेः सुबन्तत्वाभावेन प्रयोगार्हत्वाभावात् नियमस्य सजातीयत्वभङ्ग इति वाच्यम् अतिङ्ग्रहणेनताप

प॰दी॰ केनगतिकारकेतिवचनेनतत्रसुबुत्पत्तेः प्रागपिप्रयोगार्हत्वस्वीकारात् तस्माद्गार्ग्येत्यस्यप्रयोगार्हत्वाभावो देवानियमानुद्देश्य।
२४ त्वम् युक्तं चैतत् अन्यथार्थवत्त्वस्यैवप्रयोगार्हत्वस्यस्वीकारे देवदत्तोगार्ग्येतिसमुदायघटकपूर्वपरभागयोः परस्परानधीनत्वरूपम
स्वातन्त्र्यस्यापिसत्त्वेननियमोद्देश्यत्वप्रसंगः तस्माद्देवदत्तोगार्ग्येतिसमुदायस्यनियमोद्देश्यत्ववारणयोक्तरीतिः स्वरसमितिदिक्
नचैवंप्रयोगार्होर्थवदित्येवास्तु कृतं तेनेति विशेषणेनेतिवाच्यम् बहुपटवः पुत्रकाम्येत्यादौ प्रयुज्यमानसमुदायघटकतयाप्र
त्ययस्यप्रयोगार्हत्वात् नचतत्त्वेपिबहुजादेः प्रत्ययस्यनिरुक्तार्थवत्त्वाभावात्स्यात् एवेति व्यर्थमेवेतिवाच्यम् अर्थवत्सूत्रेभाष्यानुक्ता
दीक्षितोक्तप्रत्ययपर्युदासनिराकरणायपारिभाषिकार्थवत्त्वस्याश्रयणेपिनियमकुक्षिप्रविष्टार्थवत्त्वस्यकल्पितान्वयव्यतिरेककल्पित
स्यपूर्णस्त्रीयस्यापिग्रहणात् ततश्चघटकतयाप्रयोगार्हत्वशास्त्रीयार्थवत्त्वयोर्बहुजादौसत्त्वेननियमोद्देश्यतावच्छेदकाक्रान्ततयासमा
साभावेनसमुदायेप्रातिपदिकत्वानापत्तिरतः स्यात् एवेतिप्रयोगार्हविशेषणम् नन्वेवमपिपूर्वपरभागयोरर्थवत्त्वस्यैवस्यात् एवेनप्र
योगार्हत्वस्यलाभः समासग्रहणेनतनियमस्यसजातीयापेक्षत्वाद्यच्चः सचनसंभवतिखर्त्वरमरूत्याद्युपपदसमासेरमेत्यादेस्सम्बा राम
घुपपदस्यापेक्षतयैवप्रयोगात्परभागस्यस्यात् एवेनप्रयोगार्हत्वाभावेनव्यभिचारादितिचेदत्राहुः स्यात् एवेप्रधानभूतेतरानधीनत्वम् न २५
नुरूतरानधीनत्वमात्रमासाधीनेयिशत्रिखतन्त्रइतिव्यवहारात् अधीनत्वंचात्राविनाभूतत्वंतदभावोविनाभूतत्वमनधीनत्वंमध्य

मवर्तिनोपिनत्रोघटानधिकरणमित्यादाविवसमुदायान्वयित्वात्प्रधानभूतेतराधीनभूतेतराधीनत्वाभावः स्यात् एवेपर्यवसित
म् तथाचराजनङ्गसपुरुषसुइतिसमुदायघटकपूर्वभागस्यप्रधानभूतेतरभागाधीनत्वाभावेनप्रयोगार्हत्वंस्पष्टमेवपुरुषसुइतिपर
भागेपिपूर्वभागस्येतरस्यप्रधानीभूतत्वाभावेनप्रधानीभूतेतरत्घटपटादितदधीनत्वाभावः विशेषणाभावप्रयुक्तविशिष्टाभा
वः सुलभएवएवंराज्ञः पुरुषइतिवाक्येगौरइत्यादौचपूर्वपरभागयोः स्यात् एवेप्रयोगार्हत्वमूहनीयंपरविधेयभूतसमासाभावा
त्प्रातिपदिकत्वम् सन्विरमइत्यादावप्युपपदेप्रधानभूतेतरभागाधीनत्वाभावः विशेष्याभावप्रयुक्तः स्पष्टएवरमेत्युत्तरभागो
र्भागस्यप्रधानभूतत्वाभावेनोक्तरीत्याविशिष्टाभावरूपप्रयोगार्हत्वसत्त्वेपिपूर्वभागस्यप्रधानभूतेतरभागाधीनत्वमेवेतिननि
यमोद्देश्यतावच्छेदकाक्रान्तत्वम् नचैवम्पुत्रकाम्येत्यादौप्रधानभूतेतरपरभागाधीनत्वाभावेनविशेषणाभावप्रयुक्तः प्रधानभू
तेतराधीनत्वाभावोऽप्रतिहतएवेतिवाच्यम् इच्छाविषयस्यपुत्रस्योद्देश्यत्वरूपलक्षणार्थप्राधान्यसत्त्वेनप्रधानभूतेतरपूर्वभागाधीन
त्वमेवेतिननियमोद्देश्यतावच्छेदकाक्रान्तत्वमितिकोपिदोषः घटानधिकरणमित्यादेः प्रयोगस्यव्याकरणविरुद्धत्वाद्दृष्टान्तेन
नैवंनिर्वक्तुंशक्यम् वैयाकरणैरितिनुनवाच्यम् प्रकृतेस्यात् एवेपदनिर्वचनेनतथाप्रयोगाभावात् घटानधिकरणमित्यादि

प॰शे॰ प्रयोगस्यात्रत्र व्याकरणविरोधेनोपपादितत्वाच्चेति संक्षेपः एतेन स्वैरम् इत्यत्र सोपपदादेवाप्रत्ययविधानेन स्वैरमिति रूप
२५ नस्य सत्त्वत्र प्रयोगार्हत्वाभावान्नियमस्य सजातीयत्वभङ्ग इति दुर्वलोक्तमपास्तम् यदपि यत्र संघाते रूप्यादि दृष्टिस्तेनोक्तनिय
मेश्वरशब्दस्य लोकदूषणस्य दृषद एव सुरित्यादौ व्यभिचारान्नियमस्य सजातीयत्वभङ्ग रूपस्योद्धरणेनैवोक्तम् दृषणश्वर
मेश्वरशब्दस्य लोकदूषणस्य दृषद एव सुरित्यादौ व्यभिचारान्नियमस्य सजातीयत्वभङ्गः प्रातिपदिकसञ्ज्ञा प्रवर्त्तते न च तदानीं भसञ्ज्ञाप्रवृत्तिरस्तीति दृषनित्य
त्यत्र दृषन् सु अश्व सु इत्यवस्थायामेव समासप्रयुक्ता प्रातिपदिकसञ्ज्ञा प्रवर्त्तते न च तदानीं भसञ्ज्ञाप्रवृत्तिरस्तीति दृषनित्य
स्याश्वशब्दपरत्वाभावादिति तदपि चिन्त्यम् समासालौकिकविग्रहवाक्ये सामर्थ्याख्येण समाससञ्ज्ञासमकालं प्रातिपदिक
सञ्ज्ञाप्रवृत्तावपि राजपुरुष इत्यत्रेव दृषणश्व इत्यादौ समासत्वाव्याघातात्समासत्वावच्छेदेन तत्पूर्वभागस्य परत्वासंभवात्
वस्तुतो दृषन् शब्दस्य समासं विना न तत्राश्वपरत्वासंभवात्समासलाभेन तेन च पूर्वोत्तरपदयोरारोपेण तेपदसञ्ज्ञा वा
धिकाभसञ्ज्ञाप्रवर्त्तत इति पूर्वभागस्याभत्वात्साजात्यभङ्गो दुर्निवार एवातः प्रातिपदिकसञ्ज्ञायां विभक्तिलुकि एकदेश
विकृतन्यायेन नान्तेभत्वात्पदान्तस्येति णत्वनिषेधो न न च प्रातिपदिकसञ्ज्ञासमकालं नान्तेभत्वाभावात्णत्वनिषेधापत्तिः प
दान्तत्वस्याप्यभावात् तावपि पदमाश्रित्य पदान्तत्वमिति चेदुक्तन्यूहपरिभाषया विनाशोन्मुखनिमित्तकपदत्वस्यात्र दृष्टेरत २५
एव नलोपो नेति बोध्यम् यदपि नैवोक्तं वस्तुतस्तु प्रकृतिप्रत्ययभावानायन्नसंघातविषयकनियमाश्रयणान्न कोपि दोष इति तदपि चिन्त्य

म् डित्थ इत्यादौ प्रातिपदिकत्वानापत्तेः। अर्थवत्सूत्रन्तु बहुपटवाद्यर्थं स्यात्। बहुच्पूर्वं प्रातिपदिकमिति तु सूत्रयितुं न युक्तम् तथा सति
समासग्रहणस्य नियमकत्वानापत्त्या मूलकेनोपदंशमित्यादौ कृदन्तत्वेनातिप्रसङ्गादित्यवोचाम अर्थवत्पदं संघातविषयकत्वामपि नि
यमस्य नाश्रयितुं शक्यम् गोरतीत्यादेर्नियमोद्देश्यत्वाभावेन प्रातिपदिकत्वापत्तेः दृषद एव सुरित्यादौ नियमस्य साजात्यभङ्ग श्चेति भावप्रका
शो विस्तरः तस्माद्देवदत्तो गार्ग्य इति समुदायस्य समासकृतनियमेन वारणा ह्रस्यमाणरीत्या पारिभाषिकार्थवत्त्वात्तद्धितान्तत्वनिमित्तक
प्रातिपदिकत्वापत्तिरिति चेन्नैवम् प्रत्ययग्रहणपरिभाषया तादृशसमुदायस्य तद्धितान्तत्वाभावेन न प्रातिपदिकत्वमित्यङ्गसञ्ज्ञा
सूत्रे प्रत्ययग्रहणपरिभाषाप्रयोजनकथनप्रस्तावे भाष्यकृतैव समाधानात् न चैवमपि देवदत्तो गार्ग्य इति समुदायस्य प्रत्ययग्रह
णपरिभाषया प्रत्ययान्तभिन्नत्वादर्थवत्सूत्रेण प्रातिपदिकसञ्ज्ञा दुर्निवारा समासकृतनियमेनोक्तरीत्या निवारणादिति चेत्सत्य
म् यस्य यद्धर्मनिमित्तका प्रातिपदिकसञ्ज्ञा चिकीर्षिता तस्य तद्धर्मनिमित्तका प्रातिपदिकसञ्ज्ञाफलभूतविभक्तीतरसमभिव्याहारे
नयेस्या लोकेऽर्थबोधजनकत्वं पारिभाषिकमर्थवत्त्वं विवक्षितमस्ति चेदं घटपटेत्यादौ प्रकृते च देवदत्तो गार्ग्य इति समुदायस्यार्थव
त्वनिमित्तकप्रातिपदिकसञ्ज्ञा चिकीर्षिता तस्य तद्धर्मनिमित्तकप्रातिपदिकसञ्ज्ञाफलभूतविभक्तीतराया तद्धितान्तत्वनिमित्तकगा
र्ग्यशब्दप्रकृतिकविभक्तिस्तत्समभिव्याहारायेस्यैव लौकिकार्थबोधजनकत्वात्पारिभाषिकार्थवत्त्वाभावः गार्ग्यशब्दस्य प्रत्यया

प॰टी॰ न्तत्वेनाप्रत्यय इति निषेधार्थं वत्त्वनिमित्तकप्रातिपदिकत्वस्यार्थवत्सूत्रेण विहितस्यासमासे: ननु तद्युक्तरीत्या पारिभाषिकार्थ
२६ वत्त्वाभावेनैव प्रत्ययग्रहणपरिभाषाभावेपि तद्धितान्तत्वनिमित्तकप्रातिपदिकत्वाप्राप्त्या देवदत्तो गार्ग्य इति समुदायस्य प्रत्ययग्रहण
परिभाषाप्रयोजनत्वोक्तिर्भाष्यकृतामनुपपन्ना स्यात् सुप्तिङन्तमिति सूत्रभाष्यकैयटप्रामाण्येन कृत्तद्धितेति सूत्रे निरुक्तार्थकार्थवत्व
दानुवृत्तेरिति चेन्न गार्ग्यशब्दप्रकृतिकविभक्तेस्तद्धितान्तत्वनिमित्तकत्वेन तस्यास्तद्धितान्तनिमित्तकदेवदत्तो गार्ग्य इति समुदायप्रकृ
तिकविभक्तीतरत्वाभावात् यद्यपि तयोः प्रकृत्योर्भेदेन तत्प्रकृतिकविभक्त्योर्भेद एव तथापि विभक्तिप्रयोजकप्रातिपदिकसञ्ज्ञासम्बन्धि
तावच्छेदकतद्धितान्तत्वस्यैक्येन तयोरैक्यमिति तात्पर्य्यम् तथा च तदितरघटादिसमभिव्याहारानपेक्षया लौकिकार्थबोधजनकत्व
रूपपारिभाषिकार्थवत्त्वसत्वेन तद्धितान्तत्वेन च प्राप्तस्य प्रातिपदिकत्वातिप्रसङ्गस्य वारणपरतादृशसमुदायस्य प्रत्ययग्रहणपरिभाषा
प्रयोजनत्वोक्तेरुपपत्तिः सर्वोप्ययमर्थ एतत्पदघटितेनैतत्सञ्ज्ञाफलभूते निविभक्तिविशेषणेन शेखरकृता ध्वनित इति निपुणतरमालोच
नीयम् नन्वेवमपि प्रत्ययग्रहणपरिभाषाया अभावे राजनङ्सपुरुषस्वित्यस्य प्रत्ययान्तत्वादर्थवत्सूत्रेण सञ्ज्ञाया अप्राप्त्या समासग्र
हणस्य विध्यर्थत्वापत्त्या नियमस्यैवाभावेन देवदत्तो गार्ग्य इत्यादिप्रन्योत्तरं यथाश्रुतमूलोक्तनियमे तु नियमेनैव तत्र तादृशस्याभावात्सङ्ग- २६
तिः स्पष्टैवेति शेखरोक्तेरसंगतिरिति चेन्नैवम् कृत्तद्धितग्रहणस्य नियामकत्वं स्वीकृत्य प्रत्ययान्तपर्युदासभाष्यकृतामप्रत्याख्यातमभ्यु

पगम्यार्थवत्सूत्रेण समासेपि प्रातिपदिकसञ्ज्ञासिद्धेः समासग्रहणस्य नियामकत्वास्वत्या —

— तदुक्तेरेतेन प्रत्ययग्रहणपरिभाषाभावे प्रत्ययान्तत्वेनाप्राप्तौ
समासग्रहणं विध्यर्थमेव स्यादिति देवदत्तो गार्ग्य इत्यस्य प्रातिपदिकत्वं स्यादिति भाष्यस्याशय इति दुर्वलोक्तमपास्तम् अत एव तु प्रत्ययग्रह
णपरिभाषायाः सर्वथाभावस्तु न वक्तुं शक्यः देवदत्तश्चिकीर्षतीत्यादौ चिकीर्षेत्यन्तसमुदायस्य सन्नन्तत्वेन धातुत्वापत्तेस्तस्यास्तत्प्रयोज
नान्तरसिद्ध्यर्थमावश्यकमेवेदमुदाहरणमप्यन्यथासिद्धमिष्यते तत्र मनोरमोक्तनियमादरे प्रत्ययग्रहणपरिभाषया समासस्य प्रत्य
यान्तभिन्नत्वात्प्रातिपदिकसञ्ज्ञासिद्धौ तद्ग्रहणवैयर्थ्येन नियामकतया तेनैवैतत्समुदायस्य वारणं तत्प्रयोजनस्यान्यथासिद्धिप्रसङ्गः।
शेखरोक्तनियमे तूक्तरीत्या दृश्यतावच्छेदकानाक्रान्तत्वान्नियमेनावारणादनन्यथासिद्धपरिभाषोदाहरणत्वसिद्धिरिति शेखरोक्तेराशयं व
र्णयन्तीत्यलमनया प्रसक्तानुसक्तचिन्तया प्रकृतमनुसरामः ननु समुदायेनैकार्थीभावसत्वेऽवयवैकार्थीभावस्य पार्थक्येन तत्पनिमित्तत्वे
ऽपि परमगार्ग्यायण इत्यादौ षष्ठ्याः परमगार्ग्यशब्दाद्विधानात्प्रत्ययग्रहणपरिभाषया यत्र तत्स्य गार्ग्यशब्दस्य षष्ठ्यन्तत्वाभावान्न तद्धितप्रसङ्ग
एवेति चेन्न तत्सम्बन्ध्यपत्यमित्यर्थे प्रातिपदिकात्प्रत्ययविधानेन षष्ठ्यन्तत्वस्य निमित्तत्वाभावात् त्वकालतत्रेषिति ज्ञापकात्स्वार्थे परिपू
र्णमिति कुत्सिते इति सूत्रे भाष्योक्तन्यायाच्च ततः परत्वं सुपान्यविहितमपि गृह्यते सुप च तस्य सुपस्थितत्वषष्ठ्यावेत्यन्यदिति शेखरे एकस्य षष्ठ्म्

एतेन समुच्चयोत्तरपक्षाः समुदायाद्द्विधा नाम्नः र्याद्विहितत्वात्स्वकृतपरिभाषयाऽधिकस्यैव व्युदासो न तु न्यूनस्य अत एवाम्स्युवापत्यमि
त्यर्थे अण्शब्दादितियस्येति लोपे यत्रिञोश्चेति फक्सिद्धिरित्याकरोक्तरीत्या गार्ग्यशब्दस्य षष्ठ्यन्तत्वमस्त्येवेत्याहुः प्रत्ययग्रहणे चापञ्च
म्याः उभयोरेकविषयत्वमिति तथा च सति रदाभ्यां परो यस्तदादेर्निष्ठान्तस्य दीयतकारस्य तत्पूर्वदस्य नत्वमित्यर्थः स्यादिति दयतीर्लोत्या
दौ दोषापत्तिरितिभावः नियतावधीति ङ्याब्भ्यां प्रातिपदिकाक्षेपेपि नियमेन तदाकांक्षाया अभावादित्यर्थः प्रत्ययविशेषणत्वाभावा
दिति तथा चापञ्चम्या इति निषेधस्याप्रसरेण प्रत्ययग्रहणपरिभाषया तदादितदन्तोभयोरपूर्वत्ववादिनां मते विशेष्याभावेपि त
दन्तविधिर्भवत्येव अन्ये तु स्वादिप्रत्ययनिमित्तकतदंशमात्रोपस्थित्या तस्य विशेष्यत्वात् ङ्यन्तादावन्तादेरित्यर्थः स्वाद्यंशेन त
दन्तांशस्यानुपस्थितेः नयानिषेधात् दीर्घग्रहणं तु क्वचिदुपसर्जनेपि स्त्रीप्रत्यये तदादिनियमाभावज्ञापकमिति बहुश्रेयसीत्यादौ सुलो
पसिद्धिरित्याहुः द्वितीयतदन्तविधिमादायोक्तोदाहरणे सुलोपसिद्धिर्दीर्घग्रहणं च सार्थकमिति शब्देन्दुशेखरकृतः एतेन ङ्याप्सूत्रादौ तद
न्तविध्यभावेपि ङ्याब्भ्यां परस्य सोर्लोप इत्यर्थे दोषाभाव इत्यपास्तम् फलविशेषाभावेपि उक्तरीत्या परिभाषया प्राप्ततदादितदन्तविधे
र्वारयितुमशक्यत्वादित्यलमत्र उत्तमैकाभ्यामिति अन्यथा तस्याङ्गत्वाभावेन दीर्घो न स्यादिति भावः ननु कुमारी ब्राह्मणिरूपेति समानाधि २७
करणसमासप्रदर्शनार्थं वाक्यमिदमुपात्तं रूपं तु कुमारब्राह्मणिरूपेति तत्रैतत्परिभाषाया अभावे ब्राह्मणिशब्दे तसिलादिष्विति पुम्व

त्वं बाधित्वा ह्रस्वप्रवृत्तिरिव कुमारीशब्देपि पुम्वद्भावाद्ध्रस्वत्वं विप्रतिषेधेनेति परत्वाद्ध्रस्वप्रवृत्तिः स्यात्तस्यां च तस्यां सकृद्गतिन्यायेन पुम्वत्त्वाप्र
वृत्तौ कुमारिब्राह्मणिरूपेति स्यात्तस्यां च परिभाषायां ह्रस्वाप्राप्तेः पुम्वत्त्वमेवेति यथोक्तरूपसिद्धिः उत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तग्र
हणं नास्ति ननु सुपि चेत्यादावुक्तरीत्याऽऽपितस्मिन्निति परिभाषाप्रवृत्त्या घादिषु पदेष्वित्यर्थकस्मादित्यवधिसाकांक्षत्वेनोपस्थितङ्य
न्ततदादेरेवावधित्वेनान्वयादेपञ्चम्या इति निषेधप्रसरात् तदन्तविध्यभावः सिद्ध एवेतीयं परिभाषा व्यर्थेति चेन्न येन नाप्राप्तिन्यायेन प्र
त्ययग्रहणपरिभाषालब्धवाचनिकतदन्तविधेरेवाऽपञ्चम्या इति निषेधादिहनूत्तरपदस्य विशेष्यत्वेनयेन विधिरिति प्राप्ततदन्तविधिः
स्यादित्येतत्परिभाषारम्भ इत्युद्योतेस्पष्टम् प्रत्ययग्रहणपरिभाषायां तदन्तविधेरनपूर्वत्वपक्षे तु घरूपेत्यादेशविधानाङ्ग्यावंशेन तदन्तवि
ध्यनुरोधेनोपस्थिततदादेरित्यस्य षष्ठ्यन्तत्वेन पञ्चम्यन्तशब्दस्य प्रत्ययविशेषणत्वाभावात् न च परत्वेऽवध्याकांक्षा न शान्तेति वाच्यम्
तदर्थाक्षेपेणादिकृच्छब्दस्यान्वययोग्यावधिविशिष्टशक्तिस्वीकारेणवा तच्छान्तेः एवं सुपि चेत्यादावप्यादेशविधावधिकृताङ्गस्येत्यस्य तत्स
मानाधिकरण्याद्रुपस्थिततदादेरित्यस्य च षष्ठ्यन्तत्वेपि न दोषः उक्तरीत्याऽवध्याकांक्षाशान्तेः एतेनोपस्थितततः दादेरित्यस्य पञ्चम्यन्तत्व
कल्पनात्प्रत्ययग्रहणे चापञ्चम्या इति निषेधात्सुपि चेत्यादौ न दोष इत्यपास्तम् यत्र प्रत्ययो निमित्तत्वेनेति मूलस्वरसाच्च तदादेरित्यस्य ष
ष्ठ्यन्तत्वमेवस्य नासील्लुदोरित्यादावधिकृतधातोरिति पञ्चम्यन्तस्यापि उभयविशेषणान्न दोषः घपरित्यागस्तु सञ्ज्ञाविधौ प्रत्ययग्र

प॰टी॰ हलोऽन्तेति निषेधप्रवृत्तिसामर्थ्याद्ध्रस्वेत्यादौ तदन्तविध्यभावात्। गुरवस्तु धर्मिग्राहकमानाद् उत्तरपदाधिकारे प्रत्ययस्य विशेष्यत्वात्तद्रूपे
२८ णोपादाने तदन्तग्रहणं नेत्यर्थस्वीकारान्न दोष इत्याहुः नन्वेवं परमकारीषगन्धीपुत्र इत्यत्रैवेति ननु प्रत्ययग्रहणपरिभाषायाः पूर्व
मुपन्यासात्परमकारीषगन्धीपुत्र इत्यत्रैव ष्यङन्तत्वाभावेन सम्प्रसारणासिद्धत्वात्तस्य दृष्टान्तत्वेनाल्लोपो नोचित इति चेन्न
यदि प्रत्ययग्रहणे यस्मात्स विहितस्तदादेर्ग्रहणं भवतीत्युच्यते परमकारीषगन्धीपुत्रः परमकारीषगन्धीपतिरिति न सिध्यति प्रत्ययग्र
हणे यस्मात्स तदादेर्ग्रहणं भवत्यस्त्रीप्रत्यये नेति यद्यस्त्रीप्रत्ययेनेति उच्यते ऽतिक्रान्तः कारीषगन्ध्यामतिकारीषगन्ध्यस्तस्य पुत्रोऽतिका
रीषगन्ध्यपुत्रः अतिकारीषगन्ध्यपतिरित्यत्रापि प्राप्नोति अस्त्रीप्रत्ययेनानुपसर्जनेनेतीति ष्यङः सम्प्रसारणमिति सूत्रभाष्यादस्त्रीप्रत्य
येनेत्येतद्धि तत्प्रत्ययग्रहणपरिभाषायाः पूर्वम्बुध्यारूढत्वेन परमकारीषगन्धीपुत्र इत्यत्र सम्प्रसारणस्पष्टत्वात्तस्य दृष्टान्तीकरणं तथा री
त्याऽतिकारीषगन्ध्यापुत्रे सम्प्रसारणमिति प्रसङ्गेऽनुपसर्जनेनेत्येतावदेव नाप्यते तद्विशेष्यं यत्स्त्रीप्रत्ययेनेत्येव नु सोऽयं शेषोऽवतार्यतेऽ
त एव गोस्त्रियोरिति सूत्रे भाष्ये प्रत्ययग्रहणपरिभाषामुपन्यस्यास्त्रीप्रत्ययेनेत्येवं तद्दिष्येवोक्तमिति सम्प्रदायः अन्ये तु प्रत्ययग्रहणपरिभाषा २९
लब्धेन यस्मात्ष्यङ्प्रत्ययो विहितस्तदादितदन्तेन भाष्यकृता दर्शितपूर्वपदस्य विशेषणत्वे ष्यङन्तान्यस्य पूर्वपदस्येत्यर्थात्परमकारीष
गन्धीपुत्र इत्यत्रैवातिकारीषगन्ध्यापुत्र इत्यत्रापि स्यादित्यवतरणसंगतिः स्त्रीप्रत्यये चानुपसर्जनेनेत्यवतारितपरिभाषाया अनुप

सर्जनस्त्रीप्रत्ययविषये तदादिविधिनिषेधात्तदन्तांशमात्रोपस्थित्या द्वितीयतदन्तविधिं विनैव मुख्येप्रवृत्तिसंभव इति पूर्वपदस्य ष्य
ङन्तविशेषणत्वमेवोपसर्जनविषये तु तदादिविधेः सत्त्वेन सम्प्रसारणप्रवृत्तिर्नेति सम्पूर्त्तेस्तत्परिभाषावतरणं सम्यगेवेत्याहुः दृष्टा
न्तदार्ष्टान्तिकयोर्वैपरीत्येन योजनं केषांचिन्न युक्तं तथा सति न स्यादिति वक्तुमौचित्येन स्यादितिवाक्यशेषो विरुद्धस्स्यात् अन्वयि
दृष्टान्तस्थले उपमेये श्रूयमाणक्रियाया एवोपमानेऽप्यन्वयो वा हि भवति मथुराधिकरणकर्तृकसत्ताभावाभिप्रायेण मथुरायां प्राका
रवत्पाटलिपुत्रे प्राकारा सन्तीति लोके प्राश्च स्यादिति बोध्यम् स्त्रीप्रत्यये चानुपसर्जनेन तत्र तद्विषयकलक्षणे एवमग्रेऽपि नन्वति
राजकुमारिरित्यादावत्यर्थप्रतिराजकुमारीत्यस्योपसर्जनत्वेन तद्विषयकलक्षणे स्त्रीप्रत्यये चानुपसर्जनेनेति निषेधात्प्राप्त्या प्र
त्ययग्रहणपरिभाषया तदादिनियमाद्राजकुमारीत्यस्य स्त्रीप्रत्ययान्तत्वाभावात्तदन्तसमासरूपप्रातिपदिकान्तस्य विशिष्टेऽभावाद्ध्र
स्वो न प्राप्नोतीत्यत आह प्रत्यासत्त्येति यस्य समुदायस्येति यस्य राजकुमारीति समुदायस्य स्त्रीप्रत्ययान्तत्वं प्रार्थ्यते तस्यात्यर्थप्रत्युप
सर्जनत्वेपि राजकुमारीति शब्दार्थम्प्रति कुमारीति स्त्रीप्रत्ययस्यानुपसर्ज[illegible]नभेवेत्यनया तदादिविधिमात्रनिषेधाद्राजकुमारी
त्यस्य स्त्रीप्रत्ययान्तत्वात्तदन्तसमासरूपप्रातिपदिकत्वाद्विशिष्टस्य ह्रस्वसिद्धिरि[illegible]कारीषगन्ध्यापुत्र इत्यत्र तु विशिष्टस्य स्त्रीप्रत्ययान्त
त्वमानेयमिति तदर्थम्प्रति कारीषगन्ध्येत्यस्य स्त्रीप्रत्ययस्योपसर्जनत्वमेवेति तदादिनियमसद्भावान्न ह्रस्व इति दिक् स्यादेतत् उ

प॰ टी॰ उक्तरीत्या राजकुमारीपुत्र इत्यत्रापि ह्रस्वापत्तिः यद्राजकुमा।रीत्यस्य स्त्रीप्रत्ययान्तत्वमानेयं तदर्थमप्रतीतस्य कुमारीति स्त्रीप्रत्यय
२६ स्यानुपसर्जनत्वात् तदादिनियमाभावेन स्त्रीप्रत्ययान्तत्वादिति अत्र शेखरकृतः उपसर्जनमिति महासञ्ज्ञाकरणघेन शब्देन।
समासविधौ यत्प्रथमानिर्दिष्टं तस्य तत्प्रत्ययेनाप्रधानत्वेनोपसर्जनत्वात् ... तदन्तसमासस्य प्रातिपदिकस्यैव ह्रस्व इत्य
र्थस्य भाष्यकृता स्वीकारान्न दोष इति समादधुः यत्राहुः गोस्त्रियोरुपसर्जनस्येति सूत्रस्थभाष्यकैयटयोस्तु परिभाषायां स्त्री
प्रत्ययविशेषणार्थमनुपसर्जन इति विशेषणं प्रायोवादः हल्ङ्याब्भ्य इति सूत्रे दीर्घग्रहणात् अन्यथा निष्कौशाम्बिरित्यादावुपस
र्जनत्वादङ्याबन्तत्वात्सुलोपो न भविष्यतीति किं दीर्घग्रहणेन कौशाम्बीति ङ्यन्तात् सोः परत्वेपि प्रत्ययात्स्त्रीमप्रकृतेर्हल्ङ्याबि
त्यनेन विशेषणाद्दूरङ्याबन्तप्रकृतेः परत्वाभावात् गोङ्गति राजकुमारीरित्यत्र समुदायार्थमनुपसर्जनस्त्रीप्रत्ययेनापि तदा
दिनियमाभावात् स्त्रीप्रत्ययान्तत्वाद्ध्रस्वः सिध्यतीत्युक्तमिति अत्रोच्यते प्रत्ययग्रहणपरिभाषया शब्दरूपविशेष्यमादायवालघ्ये
नङ्यन्ताबन्तेन स्वादिसमभ्यपास्तिप्रकृतेः प्रत्ययग्रहणपरिभाषयालब्धस्य तदादेर्वा विशेषणान्ङ्यन्तादाबन्तादित्यर्थे बहुश्रेय॰ २६
सीत्यादौ सुलोपार्थमावश्यके न निष्कौशाम्बिरित्यादौ प्राप्तस्य सुलोपस्य वारणार्थं दीर्घग्रहणस्य कृतार्थत्वात् अविष्टासुजातः अवि
ष्ट इत्यादौ नद्धितलुकि स्त्रीप्रत्ययलुकि प्रत्ययलक्षणेनाबन्तत्वादतिमा...वारणाय दीर्घग्रहणस्यावकत्वाच्च प्रश्लेषमाश्रित्य दी

र्घग्रहणस्य प्रत्याख्यातत्वाच्चातिराजकुमारिरित्यादेरुक्तरीत्या ग्रमसत्वाश्रयणेन सिद्धत्वाच्च स्त्रीप्रत्यये नेत्येवं तदिति भाष्य।
नुष्य उ स्सम्प्रसारणमिति सूत्रभाष्यविरोधेनैकदेशयुक्तिरित्युपोत स्पष्टम् यदप्युपसर्जनस्येति तु कस्य विशेषणं स्यात् लौकि
कशास्त्रीयोभयविधोपसर्जनत्वस्य ह्रस्वोदेश्य स्त्रीप्रत्ययान्तसमुदायप्रातिपदिके संभवादिति चेत्स्त्रीप्रत्ययस्य विशेषणं भ
विष्यतीति ब्रूमः लौकिकमेव चोपसर्जनत्वमाश्रयिष्यत इति तदपि न गोन्तस्य स्त्रीप्रत्ययान्तस्य प्रातिपदिकस्योपसर्जनस्य ह्र
स्वो भविष्यतीति भाष्यविरोधापत्तेः गोन्तस्त्रीप्रत्ययान्तप्रातिपदिकावयवस्योपसर्जनस्य स्त्रीप्रत्ययरूपस्येति वैयधिकरण्ये
न व्याख्यानं तु मतोश्च बह्वजङ्गादिति सूत्रस्थाङ्गग्रहणमूलकं संभवतीति न्यायविरुद्धमुपसर्जनग्रहणेन गोस्त्रियोर्विशेष्ये त
स्त्रीशब्देन स्त्रीप्रत्ययान्तं ताभ्यां प्रातिपदिकमिति तदन्तविधिरिति प्रदीपोद्योतविरुद्धं च गोशब्दान्तगोशास्त्रीयलौकिकोभयवि
धोपसर्जनत्वस्य सम्बन्धे न स्त्रीप्रत्ययं प्रत्येकस्याप्यतथाविरुद्धस्यैव त...हानुमीयेत्याच्च स्त्रीप्रत्ययस्य गोनकत्वे न गोता
कस्य चोत्यार्थद्वारा विशेषणत्वेनाप्रधानत्वाद्व्यभिचाराभावेनोपसर्जनत्व...मि... विशेषणं देयर्थ्याच्च। यदपि शास्त्रीयोपसर्जने
प्रहणे हि शोभना गौः सुगौः न पूजनादिति समासान्ताभावः परमः सुगौर्यस्य स परमसुगुरित्यादौ गोशब्दस्य शास्त्रीयोपसर्जन॰
त्वाभावात् ह्रस्वो न स्यादिति तदपि न गोन्तं यदुपसर्जनं तदन्तस्य प्रातिपदिकस्य ह्रस्वविधानादिष्टसिद्धेः चित्रगुरित्यादौ व्यपदे॰

१·टी· शिवद्भावोः प्रातिपदिकेनेत्यस्यतुनप्रवृत्तिः तस्यप्रत्ययविधिविषयत्वात्सूत्रोपात्तत्वादिशब्दविषयत्वाच्चेतियेनविधिस्समासे
१९ निष्कादिभ्यइतिसूत्रयोर्भाष्येस्पष्टम् किञ्चह्रस्वविधौलौकिकोपसर्जनग्रहणेपञ्चगुःप्राप्तजीविकइत्यस्यैकविभक्तिर्भाष्यकृतो
विरुद्धःस्यात् गार्गीचासौवृन्दारिकाचगार्ग्यवृन्दारिकेत्यादौवृन्दारिकाशब्दस्यगुणशब्दत्वेनाप्रधानत्वात्तदन्तस्यसमासस्यप्रा
तिपदिकत्वेनह्रस्वापत्तिश्चगोवक्षयणीत्यादौवक्षयणीशब्दस्यजाति [illegible] समवधानेगुणशब्देनाप्रधानत्वात्तदन्तसमीपस्यप्रा
तिपदिकस्यह्रस्वापत्तिश्च यद्यपिगौणमुख्यपरिभाषायामुपपादितापायामान्महतइतिसूत्रीयप्रदीपप्रदर्शितदिशावक्षाव
क्षयणप्रातिपदिकार्थस्योपसर्जनत्वेपिस्त्रीप्रत्ययार्थस्यतदभावादितिनदपिन आन्महतइतिसूत्रेऽमहतीमहतीसंपन्नामहद्भू
ताब्राह्मणीत्यत्रगौणार्थवृत्तित्वान्महच्छब्दस्यकथंपुम्वद्भावइत्याशंक्यामहत्यांस्त्रीत्वस्यसत्वेनतदारोपेप्रयोजनाभावात् म
हत्वमात्रमुपचरितन्तुतद्विशिष्टस्त्रीप्रत्ययार्थोपीतिविवक्षयापुम्वद्भावसिद्धः प्रदीपकृताऽभिधानोपिगुणवाचकस्त्रीप्रत्ययान्त
स्यसामानाधिकरण्येनजातिशब्दविशेषणत्वंतूदाहृत्यनभिधानाद्दूषयणप्रातिपदिकार्थस्यविशेषणत्वंनस्त्रीप्रत्ययार्थस्येतिव
क्तुमशक्यंदन्तोनरत्वात् विवक्षयेत्युक्त्याऽमहतिमहत्वविशिष्टस्त्रीप्रत्ययार्थारोपस्यस्वीकाराच्चोररीकृतंचैतत्स्वयमपिलिङ्गवि ३
शिष्टपरिभाषायाम् किञ्चलौकिकोपसर्जनत्वस्यग्रहणेकुमारीमिच्छन्ब्राह्मणःकुमारीहरीतक्याःफलानिहरितक्याइत्या

दौह्रस्वापत्तिरितिशेखरेस्पष्टम् यत्तुकौमुदीविवरणेसंमत्यागोस्त्रियोरित्यत्रस्त्रीप्रत्ययान्तस्यलिङ्गविशिष्टपरिभाषयाप्रातिपदिक
त्वातिदेशोस्त्यपिप्रातिपदिकस्येत्यनुवर्त्यतेनसामानाधिकरण्येनत्वस्यैवप्रत्ययलक्षणेनतद्धितान्तत्वप्रयुक्तस्यलिङ्गविशिष्टप
रिभाषयावातिदिष्टस्यतस्याप्यभावाददोषः एतेनव्रजन्तान्क्विपिकुमारीशब्दस्यह्रस्वापत्तिमुद्भावयन्तोनव्यतरास्समाहिताइ
तितच्चिन्त्यम् इद्गोण्याइतिसूत्रेभाष्येनस्वस्यानेगोऽप्यानेतिवक्तव्यंपञ्चगोणिरित्यादौक्रीतार्थेतद्धितस्यलुक्तद्धितेतिप्राप्त
स्यङीप्लुकोनेननिषेधेगोस्त्रियइतिह्रस्वेनसिद्धिंसम्पाद्येतन्न्यासेलाघवाभावमुक्त्वाअथवामात्रार्थमित्यंवक्तव्यंगोणीप्रमितं
गोणिरित्युक्तंतत्रगोणिरितिप्रतीकमुपादायपदमात्रंचोलुक्क्रियतेतदागोण्यानेतिन्यासेपिलुकिप्रतिषिद्धेसिद्ध्यत्येवह्रस्व
त्वमितित्वच्छिरोमणिभूतेनकैयटेनाभिहितंविरुध्येतानिष्टप्रातिपदिकत्वमलेनत्वन्मतेह्रस्वप्राप्तेः यद्यप्ययमप्यभ्युपगमवा
दस्तर्हिलौकिकस्यैवोपसर्जनत्वस्यग्रहणेद्वितीयंविभावयास्मन्मतेतुअ [illegible] पश्चिन्त्यएवशास्त्रीयोपसर्जनग्रहणात् अनए
वकुक्कुटमयूर्य्याविन्यादौसमासार्थसमाहारेऽवयवार्थस्याप्राधान्यादनेकामत्यःयानुवृत्त्याप्रथमानिर्दिष्टत्वाच्चमयूरीशब्दस्योप
सर्जनत्वमित्येवंलौकिकोपसर्जनत्वसमानाधिकरणशास्त्रीयोपसर्जनत्वमादायैवह्रस्वप्राप्तिरुद्भाविताकैयटेनैवस्पष्टञ्चेदं
सर्वंगोस्त्रियोरित्यादिसूत्रत्रयेभाष्यकैयटोद्योतेषु नन्वेवमपिराजकुमारीत्यस्यैकविभक्तौत्युपसर्जनत्वसत्वेनतदादिनियम

प॰टी॰ सद्भावादेवाप्तत्वस्य एवात आहात एवेति प्रत्यासत्त्याश्रयणादेवेत्यर्थः असंभवादिति राजकुमारीति विशिष्टैकविभ-
३१ क्तौति शास्त्रीयोपसर्ज्जनत्वसत्त्वेपि परिभाषाघटकस्त्रीप्रत्ययनिष्ठस्य तस्योपसर्ज्जनत्वस्यासंभवादित्यर्थः ननु स्त्रीप्रत्यया
प्रत्ययग्रहणे इति अन्यथा राजकुमारीपुत्र इत्यादौ राजकुमारीशब्दस्याति [illegible] जकुमारिरित्यादौ ह्रस्वसिद्ध्यर्थमावश्यकत्वात्प्र
त्यासत्त्यानुपसर्जनत्वादनुपसर्जनेस्त्रीप्रत्यये तदादिनियमाभावात्य [illegible] चना प्रत्यय इति निषेधात्समासग्रहणस्य नियमा
र्थत्वात्तत्राप्य प्रत्यय इत्यनुवृत्तेश्च प्राप्तिः यदि कत्वाभावाद्ध्रस्वाप्राप्तेस्तद्वारणाय पूर्वपदस्य च प्रतिषेधो गोसमासान्निवृत्त्यर्थमिति
वार्त्तिकस्य यत्त्वेति पदप्रधानेन तस्य चेत्सान्तो भवतीति प्रत्यासत्त्याश्रयणेन त्वस्यैकभाष्येऽस्य च निरालम्बनत्वापत्तेः स्त्रीप्रत्यय
मात्रे परिभाषाप्रवृत्तौ तु अप्रत्यय इति प्रत्ययांशे परिभाषाया अप्रवृत्त्या तदादिनियमसत्त्वेन प्रत्ययान्तत्वाभावात्प्राप्तिः यदिकत्वा
दुक्तवार्त्तिकभाष्ययोरुपपत्तिः ह्रस्वविधौ शास्त्रीयस्यैवोपसर्ज्जनत्वस्याश्रयणेन तस्य च राजकुमारीत्यादौ सत्त्वेन ह्रस्वप्राप्तिर्बा
ध्येति गोस्त्रियोरिति सूत्रे उद्योते विस्तर इति दिक् इयं च वाचनिकैवेति केचित्तु प्रत्ययग्रहणे यस्मादिति परिभाषाग्राहके भा
ष्योक्ते यस्मात्प्रत्ययविधिस्तदादि प्रत्यये इति विभक्तयोगेनेयङुवङिन्त्यतोः स्त्रीत्यनुवर्त्यशब्द्याधिकाराश्रयणेनार्थपरत्वं स्त्रीकृत्य ३१
स्त्रीप्रत्यय इत्यर्थे पूर्वस्मात्स्याविन्यतः स्त्याख्यन्यनुवर्त्यतेन स्त्रीप्रत्ययस्याविशेषणं प्रधानस्त्रीप्रत्ययभिन्नप्रत्ययग्रहणे तदादि

विधिरित्यर्थादियं लभ्येत्याहुः अन्ये तु प्रत्ययग्रहणे इति परिभाषार्थसङ्ग्राहके यस्मात्प्रत्ययभिन्नप्रत्ययग्रहणेन तदादिविधिरित्य
र्थादियं लभ्येत्याहुः अन्ये तु प्रत्ययग्रहणे इति परिभाषार्थसङ्ग्राहके यस्मात्प्रत्ययविधिस्तदादिप्रत्यये इति विभक्तयोगेनेयङुवङि
तोः स्त्रीग्रहणं वामीन्यतोन्यवस्थितविभाषार्थकं वा ग्रहणं चानुवर्त्यैतत्परिभाषार्थलाभ इत्याहुस्तत्रोभयत्रापि भाष्यानुग्रहो विचा
र्य इत्यलम्‌ संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति अत्र संज्ञाया विधाविति तृतीयासमासो न तथा सति तरतमपौ घः कृ
कृवतू निष्ठेति वैयर्थ्यप्रसङ्गात्‌ अनुपदं वक्ष्यमाणदोषप्रसङ्गाच्च सम्बन्धसामान्यषष्ठ्या समासेन संज्ञाया विधौ कृतायां प्रत्य-
यग्रहणाभावात्तदन्तविध्यप्रसङ्गे न निषेधवैयर्थ्यप्रसङ्गात्‌ अनुपदं वक्ष्यमाणदोषप्रसङ्गाच्च सम्बन्धसामान्यषष्ठ्या समासेन संज्ञाया
विधौ संज्ञाया विधौ च निषेधाङ्गीकारे निष्ठेति निष्ठान्तस्योपसर्ज्जनस्य बहुव्रीहौ विधीयमानः पूर्वनिपातो न निष्ठामात्रस्य स्यात्‌ अस्मि
न्पक्षद्वयेपि उत्तरपदाधिकारे इति परिभाषावैयर्थ्यं न ह्रस्वचादौ कृतार्थत्वा [illegible] भावकिं प्रत्ययान्तविधिशब्दस्य कर्मषष्ठ्यन्तस
ंज्ञाशब्देन समासात्संज्ञाकर्मकविधावित्यर्थः न चैवं तरतमपौ घ इत्या [illegible] विधावनयास्तदन्तविधिनिषेधेपि घरूपेत्यादिवि
धिप्रदेशे प्रत्ययग्रहणात्तदन्तग्रहणं दुर्वारमिति वाच्यम्‌ संज्ञाविधौ निषेधप्रवृत्ति [illegible] सामर्थ्यादुत्तरपदे इति परिभाषया च प्रदेशेघादौ
न तदन्तविधिरिति शेखरे परमगुरुभिरेव समाधानात्‌ यत्तु दीपकृता दूषणविस्मरणमूलकत्वाद्धि संज्ञायातिधौ चोभ

प॰टी॰ यत्रापि तदन्तविधिः स्यात् इत्वा न्तान्तेपरतो गौरीपरमब्राह्मणितरेत्यत्र ह्रस्वः प्रसज्येत समाभूत्सञ्ज्ञाविधावेव तु तदन्तविधिनात
३२ रवन्तेपरतो गौरीब्राह्मणितरेत्यादौ ह्रस्वार्थो निषेधस्य सार्थक्येन सामर्थ्याभावा[illegible]दिति तच्चिन्त्यम् सञ्ज्ञाविधौ तदन्तस्य सञ्ज्ञाया
मपि विधिप्रदेशे घग्रहणेन तदन्तस्योपस्थितस्य विशेषणविशेष्यभावे का[illegible]दुत्तरपदे न विशेषणत्वात् द्वितीयतदन्तविधेरयो
गात्कुमारीपरमब्राह्मणितरेत्यत्र दोषाभावाद्ध्वसञ्ज्ञाविधौ तदन्तविधिनिषेधस्यानुपयोगेन तद्दूषयत्यात् न च पदाङ्गाधिका
र इति वार्त्तिकादुत्तरपदस्य विशेष्यत्वात्तदन्तविधिरिति वाच्यम् उत्तरपदाक्षिप्तपूर्वपदस्य विशेष्यत्वेन स्यादिति एवं तस्याः प्रव
त्तेरत एव तस्य तदन्तस्येति षष्ठीनिर्देश उपपद्यत इति निमित्तांशेनोपस्थितिरन्यथा पादस्य पदाज्यातीत्यादावुत्तरपदेपि प्रवर्त्त
ति इत्याकरे स्पष्टम् न चैवं सिद्धान्तेपि घरूपकल्पानामुत्तरपदे न विशेषणात्तदन्तविधेरप्राप्तावुत्तरपदाधिकार इति परिभाषाव्य
र्थेति वाच्यम् घादीनाम्प्रत्ययानामुत्तरपदत्वासंभवात् घादिभिरेवोत्तरपदस्य विशेषणाद्येन विधिरिति सूत्रप्राप्ततदन्तविधिनि
विधाय तस्या आवश्यकत्वात् एवञ्च लुडादिष्वेवोत्तरपदे इत्यस्य सम्बन्ध इति सुप्तिङन्तमिति सूत्रे उद्योते स्पष्टम् न चैवमपि चारि
पुपरे क्विन्यर्थोपि कस्मादिति नियतावध्याकाङ्क्षा पातदादेर्डन्तस्यैवावधित्वेनान्यथात्सुपि चेत्यादाविव प्रत्ययग्रहणे चापञ्चम्या ३२
इति निषेधे न सिद्धौ तुत्तरपदाधिकार इति परिभाषाव्यर्थेति वाच्यम् तथा प्रत्ययग्रहणपरिभाषालभ्यवाचनिकतदन्तविधेरेव

निषेधेन तूत्तरपदस्य विशेष्यत्वे न येन विधिरिति प्राप्ततदन्तविधेरिति येन विधिरिति सूत्रे प्रदीपोद्योतयोः स्पष्टत्वात्ति रूपितं चैतत्प्रा
क् किञ्चोत्तरपदाधिकारे प्रत्ययग्रहणे चापञ्चम्या इति निषेधस्यानिमित्तांशेपि प्रवृत्तौ ल्हृदयस्य ल्हृदिति सूत्रस्थलेखग्रहणस्यात्त
रपदाधिकारे इति परिभाषाज्ञापकत्वपरभाष्यविरोधापत्तिरणिपरे इत्सर्थकस्मादिति नियतावध्याकाङ्क्षा न तदादेर्हृदयस्यैवा
वधित्वेनान्यथात्प्रत्ययग्रहणमिति परिभाषया तदन्तविधिनिषेधेन लेखग्रहणस्यापक्षीणत्वात् एतेन तर्हि कस्मान्न भवति घा॰
न्तोत्तरपदे ह्रस्वः सत्यपि सञ्ज्ञाविधौ तदन्तप्रतिषेध इति चेत्प्रत्ययग्रहणे चापञ्चम्या इत्यस्य वैयर्थ्यप्रसङ्गः इष्टापत्तिरिति चेन्नू
र्वनिपातदोषस्य प्रागुक्तस्यकागतिरिति तच्चिन्त्यम् हल्ङ्याब्भ्यो दीर्घादित्यादौ तदादितदन्तस्यलोपः स्यात् प्रत्ययग्रहणे चापञ्चा॰
म्या इति निषेधे तु तदादिविधेरुपस्थित्या ख्यन्तात्तदादेर्लोप इत्यर्थे नेष्टसिद्धेः [illegible]प्रत्ययग्रहणमिति मिपरिभाषाया वैयर्थ्याभावात् ड्यावं
त्तु नियतावध्याकाङ्क्षाया अभावेन निषेधाविषयत्वात्तदादितदन्तविध्यो[illegible]स्थितिरित्यन्यत् निष्ठेति पूर्वनिपातविधौ सञ्ज्ञाविधौ
निषेधसामर्थ्यात्तदन्तविध्यभावप्रसङ्गरूपो दोषः परमवशिष्यते सोप्यदोषः निष्ठामात्रेण बहुव्रीहेरसंभवेन तत्सामर्थ्याद्धाहितास्या
दिषिनिनिर्देशाद्वा तदन्तविधिस्वीकारात् यथा सुप्तिङन्तमित्यादावन्तग्रहणेकृतेपि व्यपदेशिवद्भावात्सुपोपि पदसञ्ज्ञायां हरिषि
त्यादौ सान्यदाघोरिति पत्वनिषेधप्रसङ्गरूपो दोषो हलिसर्वेषामिति निर्देशेन वार्यत इत्यदित्युद्योते स्पष्टम् ननु क्तक्तवतू निष्ठेति सञ्ज्ञावि

धायकेसञ्ज्ञाविधाविति निषेधसामर्थ्याद्द्रदाभ्यामित्यादौ तदन्तविध्यभावस्य सिद्धत्वात्प्रत्ययग्रहणे चापञ्चम्या इति निषेधो दा
हरणत्वोक्तिर्येन विधिरिति सूत्रभाष्यस्यासङ्गतेति चेन्न उपायस्योपायान्तरादूषकत्वेनादोषात् एतद्भाष्यैकदेश्युक्तत्वस्यानुपदं व
क्ष्यमाणत्वाच्च॥ न चैवं रदाभ्यामित्यादौ पदस्येत्यधिकारात्तेन पदस्य विशेषणाद्येन विधिरिति सूत्रप्राप्ततदन्तविधेः प्रत्ययग्रहणमि
तिपरिभाषया कथं निषेधस्तस्याः प्रत्ययग्रहणपरिभाषालभ्यवाचनिक[illegible]विधिनिषेधकत्वादिति वाच्यम् न लोपः प्रातिपदि
कान्तस्येत्यन्तग्रहणेनाधिकृतपदस्येत्यस्यावयवषष्ठीत्वज्ञापनेन सामानाधिकरण्याभावाद्येन विधिरिति तदन्तविधेरप्राप्तेः प्र
त्ययग्रहणपरिभाषाप्रसक्तवाचनिकतदन्तविधेरेवानया निषेधात् सतेन रदाभ्यामित्यत्रापि पदस्येत्यनुवृत्तस्य विशेष्यस्य सत्त्वादु
त्तरपदाधिकारे निषेधस्तु अपञ्चम्या इति निषेधस्यैकदेशानुवाद इत्यपास्तम् उक्तरीत्या द्वयोः परिभाषयोरसंकीर्णफलत्वेनानुवा
दत्वस्यान्याय्यत्वाच्च वस्तुतस्तु येन विधिरिति सूत्रस्थभाष्यमेकदेश्युक्तिः रदाभ्यामिति सूत्रस्थभाष्यविरोधात् तत्र हि रदाभ्यामिति कि
मर्थं चरितमुदितम् ननु च रदाभ्यामित्युच्यमानेऽप्यत्र प्राप्नोति अत्रापि रदाभ्यामपरा निष्ठेति निष्ठेत्यसमस्तत्वाभिप्रायेणाशंकायां रेफ
दकाराभ्यां निष्ठा विशेष्यते किं तर्हि तकारो विशेष्यते रेफदकाराभ्यामुत्तरस्य तकारस्य नो भवति स चेन्निष्ठाया इत्युक्तं निष्ठान्त इत्युक्ते ३३
निष्ठान्त इति समासनिर्देशस्तत्र निष्ठाया उपसर्जनत्वाद्विशेषणेन पञ्चम्यन्तेनासम्बन्धः प्रधानस्य तु तकारस्य सम्बन्ध इति कैयटे

नाप्युक्तं तथा च रदाभ्यामिति पञ्चम्यन्तस्य निष्ठारूपप्रत्ययविशेषणत्वाभावात्प्रत्ययग्रहणे चापञ्चम्या इति निषेधस्याप्राप्तेः तस्मा
त्सञ्ज्ञाविधायके सञ्ज्ञाविधाविति निषेधसामर्थ्यात्तदन्तविध्यभाव इति परमगुरुचरणोक्तिरेव न्याय्यसीति दिक् एतेन यदि तु परस
प्तमीनिर्देशेऽपि षष्ठीनिर्दिष्टकार्यिणो वाकांक्षानिवृत्तेः पञ्चम्यन्तावधेराक्षेपाभावः सुपि चेत्यादौ त्वङ्गस्येत्यनेनान्वयापत्तेर्न तदन्तवि
धिस्तदापद्यस्येत्यत्रोत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तविधिनिषेधः अत एव लेखग्रहणेन ज्ञापकअपवाद इति न्यायेन तदादिविध्युत्त
रं सामानाधिकरण्येनान्वययोग्यतास्थलेऽपि पूर्वमेव प्रवृत्तेर्बलित्वस्य विभिन्नविभक्तिकत्वेऽपि षष्ठीकल्पनपूर्वकं सामानाधिकरण्या
वागमप्रतीक्षाया अभावात् तदादिविध्युत्तरं विशेष्यषष्ठ्यन्तानुरोधेन सामानाधिकरण्याय षष्ठ्यन्तत्वकल्पनं व्यत्ययेनेत्यन्य त
तस्मिन्नित्यस्यं तु उपश्लिष्टपदानि षसहेत्यादाविवात्रापि धातोरिति पञ्चम्या वलीत्यस्य षष्ठ्यन्तत्वकल्पनेन सामानाधिकरण्याव
गम इति तु न सम्यक् आर्द्धधातुकग्रहणसत्त्वे धातोरित्यनुवृत्तौ प्रयोजनं नास्ति भाष्यकृता तु अत इद्धातोरित्यतः षष्ठ्यन्तधातु
ग्रहणमनुवर्त्य लूभ्यामित्यादौ दोषं निर्वार्य्यार्द्धधातुकग्रहणं प्रत्याख्यातमित्यन्यत् यदपि न चैवं सति कारनाम्नि च प्राचां हलादावि
त्यत्रादिग्रहणवैयर्थ्यप्रसङ्गः क्वचिद्धल्ग्रहणे सप्तम्यन्तस्य विशेष्यतायी त्यर्थान्यपर्यग्राहकत्वादत एवैतो म्प्रासोरित्यादावमोऽ
वयवेचीत्यर्थो न त्वजादावमीति गामिच्छति गव्यतीत्यादौ वर्णप्राधान्येन प्रत्ययत्वस्य लक्षणाभावादत्वं न यत्वेवमादौ तदादिविध्या

प॰टी॰ अयणलकादेशः सर्वस्यप्रसज्येतेति शेखरस्तन्न तत्र निर्दिश्यमानपरिभाषयाभावादिति तच्चिन्त्यम् अमादेनिर्दिश्यमानत्वेन
३४ त्यास्थानित्वाभावारणोत्त्वन्मते आदेः परस्येति परिभाषाबाध्यत्वेन तस्या अप्रवृत्तेश्चेति मत् शेखरदोषोद्धारे विस्तरः नन्वजादिग्रह
णं कर्तव्यं पञ्च गार्ग्यरूप्यं पञ्च गार्ग्यमयमित्यादावनजादेर्लुङ् माभूदिति द्विगोर्लुगनपत्ये इति सूत्रभाष्ये द्विरथ इत्यत्र तस्येदमित्य
धिकारविहितयञोपि लुक् येन विधिस्तदन्तीति सूत्रस्थभाष्यसंमतो न सिद्ध्यदित्याशंक्याजादिग्रहणं कर्तव्यमिति भाष्यस्य गो
त्रे लुगचीत्युत्तरसूत्रादचीत्यपकृष्य वाक्यभेदेन व्याख्यानाद्बलादेरपि कस्यचिल्लुगिति तात्पर्यं लाघवादित्युद्योते समाहितत्वादेत
द्ग्रन्थविरुद्धम् विशेषणविशेष्ययोरुभयोः सप्तम्यन्तत्वाभावेन तदादिविधेरप्राप्तेरिति चेन्न सप्तम्यन्तं शब्दस्वरूपमध्याहृत्य तदादि
धिप्रवृत्तेरिति केचित् अपरे त्वजादिग्रहणं कर्तव्यमित्यस्यादिग्रहणमात्रं कर्तव्यम् अचीत्यपकृष्याजादावचि सति तद्धितस्येत्यर्थेन
फलितस्याजादेस्तद्धितस्येति वाक्यभेदेन व्याख्येयमिति विवरणतात्पर्यान्न काचित्क्षतिः नागेशोद्योते तात्पर्येणोक्तम् अन्ये तु प्रा
तिपदिकान्तरस्मिन् तद्धितावयवेऽचि सति प्रत्ययस्य लुग्विधीयमानः प्रत्यासत्यात्तस्यैवाजादेस्तद्धितस्येति व्याख्यानान्न दोष इत्याशि
ग्रहणमपि न कर्तव्यमिति उद्योते तात्पर्यमाहुः नन्वेवमपि हुझल्भ्यो हेर्धिरिति सूत्रस्थभाष्यविरोधस्तत्र हि रुदिहि स्वपिहीत्यादौ ३४
झल इति धित्वं प्राप्नोतीत्याशंक्य घसिभसोर्हलीत्यनुवर्त्य हलादेर्हेरित्यर्थेन परिहृतं तत्रोभयोर्विशेषणविशेष्ययोः सप्तम्यन्तत्वा

भावाद्धिरेव धइति चेन्न प्रत्यये इति सप्तम्यन्तमङ्गं नाक्षिप्यत तदादिविधिरिति केचित् अत्रापि लोपस्येष्टत्वेन पूर्वसूत्रे हलीत्यस्याभिरूपयुक्ते
त्वेन हार्थत्वं वाच्यमिहापि चेद्धेर्हलन्तत्वासंभवाद्विशेष्यस्य सप्तम्यन्तत्वाभावेन तदादिविधेरप्राप्तत्वाच्चासमन्वयः तर्हि व्यर्थमेव तदेत
त्सामर्थ्याद्विशेष्यस्य सप्तम्यन्तत्वकल्पनादित्याहुः वस्तुतो निर्दिश्यमानपरिभाषया भाष्यकृतैव तत्र दोषवारणात्पूर्वसूत्रे हलीत्य-
स्यानन्वाख्यानाच्चैतद्भाष्यमेकदेश्युक्तिरिति बोध्यम् एतेनैतदुभयविरोधाच्चिन्त्योयं ग्रन्थ इत्यपास्तमिति दिक् सर्वो द्वन्द्वो विभाषैक
कवद्भावति द्वन्द्वश्चेति द्वन्द्वश्चेत्यादिप्रकरणविषयस्याप्यनयैवैकल्पिकत्वबोधने उभयरूपस्य प्रयोगस्य चार्थे द्वन्द्व इत्यनेन
सिद्धत्वात्प्रकरणवैयर्थ्यापत्तिरतस्तद्विषयत्वम् न च प्राण्यङ्गादीनामेव समाहार इति नियमेन सार्थक्यं प्रकरणस्येति वाच्यम् त
था सति तिष्यपुनर्वसूनी प्राणित्वाद्बहुत्वाच्चोक्तनियमादितरेतरद्वन्द्वेन बहुवचनस्यैव सत्वादुद्दिष्टं तिष्यपुनर्वस्विति प्रयोगस्यैवा-
भावेन व्यावर्त्याभावाद्बहुवचनग्रहणवैयर्थ्यापातात् तेन च व्यर्थेन बहुवचनग्रहणेन प्राण्यङ्गादीनां समाहार एवेति नियमाबो
धनद्वारा तद्व्यतिरिक्तसर्वद्वन्द्वस्योभयरूपताबोध्यत इति तेषां भाष्योक्तप्राणित्वपक्षे बहुवचनग्रहणसार्थक्यम् नन्वेतेषामथ
वेत्यादिभाष्यसम्मतेः प्राणित्वपक्षे प्राणिजातिवाचकत्वेन प्राण्यङ्गादित्वा[illegible]स्य च समाहार एवेति नियमेन नित्यैकवचनान्त
त्वाद्बहुवचनाभावेन सूत्रस्य निर्विषयत्वमित्याशङ्क्य ते नचैवमिति न हीति जातिप्राधान्यविवक्षायामयं नियमो व्यक्तिप्राधान्यविव

प॰टी स्थायांतरभावइत्येवंफलितंवैकल्पिकस्येत्यर्थः तत्फलन्तुतस्यादिति इतिसूत्रस्थक्षीरोदके इतिभाष्यप्रयोगेएकवद्भावाभावस
३५ थाचात्रव्यक्तिप्राधान्येनतद्भावादेकवचनान्तप्रयोगसत्त्वेनसूत्रंसविषयंव्यावर्त्यलाभेनवहुवचनग्रहणंसार्थकंचेतिभावः
प्रकारान्तरमप्युक्तमित्यादोस्पष्टम् अतएवेति वहुवचनग्रहणादेवेत्यर्थः अन्यथोक्तरीत्याव्यावर्त्याभावेनवहुवचनग्रहणंव्यर्थमे
वस्यादितिभावः स्पष्टञ्चेदंसर्वंतिष्यपुनर्वस्वोरितिसूत्रेभाष्यप्रदीपोद्योतेषु सर्वे विधयश्छन्दसि विकल्प्यन्ते छन्दसि दृष्टानुविधा
नादितिभावः योगविभागेनेति अन्यथाप्यन्यत्रेयेएववहुलंस्यादितिभावः इषडितिपरिभाषाभावान्सन्स्यादितितन्निर्देशोऽस्या
अनित्यत्वज्ञापकः तेनहि पचन्तित्याहैत्यादौ चनैत्तिरीयाणांतिङ्तिङ इतिनिघातस्तथैवनैत्तिरीयाणाम्याद्युदात्तश्चनित्यत्वानि
त्यत्वाभ्यांसिद्धः अस्यवार्मीयार्मीयमित्यादौविभक्तेर्लुगभावश्चानित्यत्वेनसिद्ध इत्यन्यत्रविस्तरः॥ एकदेशविकृतमनन्यवत् पूर्वप
रनित्यान्तरङ्गापवादानामुत्तरोत्तरम्बलीयः पुनःप्रसङ्गविज्ञानात्सिद्धम् सकृद्गतौ विप्रतिषेधेयद्बाधितंतद्बाधितमेव कचिच्चरिता
र्थयोरित्यनेनापवादविषयपरत्वंमुक्तम् मः कार्य्यंकरोतीति सकृद्गतिन्यायसाधको दृष्टान्तः पूर्वान्वयीयदानमित्यादि पुनःप्रसङ्ग
विज्ञानन्यायसाधकमग्निमान्वयि विनिगमकाभावइति ननुजातिपक्षेजातौशास्त्रप्रवृत्तेर्बाधितत्वाद्व्यक्तिद्वारासावाच्याद्वारभूता
चव्यक्तिः शास्त्रान्तरप्राप्तिविषयत्वेनयत्रयुगपदुभयासंभवरूपवाधसद्भावनानन्तरव्यक्तिरेवेति विनिगमकसत्त्वाद्विरोधा ३५

धारभूतव्यक्तिविषयकत्वंनशास्त्रस्येत्युभयोरप्रवृत्तौ परविध्यर्थंविप्रतिषेधसूत्रमिति पुनःप्रसङ्गन्यायसिद्धिरिति कैयटोक्तंयुक्तमे
वेतिचेन्न व्यक्तिपक्षेव्यक्तीनामानन्त्यात्तत्रशक्त्यग्रहीतुमशक्यत्वेनजात्युपलक्षितव्यक्तौ तद्ग्रहोवाच्यस्तादृशीचव्यक्तिर्विरोधाधारभू
तापिव्यक्तिरितितत्रशास्त्रद्वयस्योद्देश्यतयायुगपदसंभवेपिशास्त्रस्यावृत्त्यापर्य्यायेणप्रवृत्तिरित्यवदभिहितरीत्याजातिपक्षेपिएका
र्थास्तुविकल्परन्तितिन्यायेनयुगपदसंभवावपल्खुलतृजादिपर्य्यायेणविनाप्याप्तिविरोधाधारभूतव्यक्तिष्वेवउद्देश्यतावच्छेदका
क्रान्तविरोधाद्देवविज्ञायतेयथाग्निरानीयतामित्युक्तेरचोदितपात्रद्वारैवाग्न्यानयनप्रवृत्तिस्तत्रापियथातृणादिपात्रालंनद्वारतावाधि
तत्वादेवंशास्त्रान्तरप्राप्तिविषयत्वेनयत्रयुगपदुभयासंभवरूपवाधसद्भावकेरपितद्वारतेनितत्रतदितरव्यक्तिषुचरितार्थेनशास्त्र
द्वयेनलक्ष्यसंस्कारंकुर्य्यादित्यपास्तम् तृणादिदृष्टान्तस्यव्यक्तिपक्षविषयकत्वमेवेत्यत्रमानाभावात् युगपदुभयासंभवरूपवा
धेपिपर्य्यायेणकार्य्यप्रवृत्तिसंभवात् पात्रदृष्टान्तस्यवैषम्याच्च दृष्टान्तमात्राश्रयणेनपुनःप्रसङ्गन्यायादिसाधनेसर्वाशासमभा
व्याकृदूतदृष्टान्तेनैवतत्सिद्ध्याजातिव्यक्तिपक्षयोरुपादानस्यव्यर्थत्वाच्च तेसाञ्छास्त्रीयतृणादिदृष्टान्ताश्रयणेनसकृद्गतिन्याय
सिद्धः लौकिकदूतदृष्टान्ताश्रयणेनपुनःप्रसङ्गविज्ञानसिद्धिरितिमूलोक्तमेवयुक्तमितिविप्रतिषेधसूत्रेभाष्येस्पष्टतरम् तत्रलक्ष्या
नुसारादिति यत्तुयत्रपरशास्त्रप्रवृत्तौपूर्वशास्त्रंप्रवर्तमानंपूर्वप्रवृत्तपरशास्त्रप्रवृत्तिंवाधनेनतत्रजातिपक्षेपिसकृद्गतिन्यायाश्रय

प॰ टी॰ णमेवनपुनः प्रसङ्गविज्ञानन्तेनशिश्वियतुरित्यादौपरत्वाद्विभाषाश्वेरितिसम्प्रसारणविकल्पेवचिस्वपीतिनभवतिस्पष्टञ्चेदमचश्चे
३९ त्यत्रप्रदीपइतितच्चिन्त्यम् साक्षात्प्रभृतीनिचेतिसूत्रस्थभाष्यविरोधापत्तेः तत्रहिमन्तप्रतिषेधोवक्तव्यः लवणीकृत्यनवापूर्वेणकृत
त्वात् नवावक्तव्यंपूर्वेणकृतत्वात् अस्त्वनेनविभाषापूर्वेणनित्याभविष्यतीतिभाष्येउक्तः पूर्वेणेतिप्रतीकमुपादाययपुनः प्रसङ्गवि
ज्ञानादितिभावइतिकैयटेनोक्तम् त्वदुक्तरीत्यासकृद्गतिन्यायविषयतायाः सत्वेनविरोधस्यस्पष्टएव यदपिप्रदीपाभिप्रायवर्ण
नेलवणशब्देमान्तत्वसन्नियोगेनवैकल्पिकीगतिसञ्ज्ञोच्यतइतितदभावेउर्यादिच्वीतिनित्यायामपिगतिसञ्ज्ञायांमान्तत्वसन्नियो
गशिष्टायागतिसञ्ज्ञायाअभावः परत्वात्पूर्वप्रवृत्तापिनबाधितोभवतीतिशिश्वियतुरित्यत्रोक्तन्यायाद्विशेषइतितदपिचिन्त्यमग
तिसन्नियोगशिष्टत्वस्यमान्तत्वेसत्वेपिमान्तत्वसन्नियोगशिष्टत्वस्यगतिसञ्ज्ञायामभावात् अतएवभाष्येलवणशब्देमान्तत्वंगतिस
ञ्ज्ञासन्नियोगेनवक्तव्यमित्युक्तमयेचानेनविकल्पेगतिसञ्ज्ञासन्नियुक्तंमान्तत्वंचप्राप्नोतीत्युक्तम् लवणीकृत्येत्यत्रलवणीश्रु
वस्यलवणमितिमान्तादेशविधानेनपरिहृतमितित्वन्यत् सन्नियोगशिष्टत्वंचाविधेयतयाप्राकरणिकप्रत्ययादिविधेयाद्यनुवा
देनविधिविषयत्वमेवप्रधानभूतविधेयस्यसन्नियोगशिष्टोविहितसमाख्यापि अत्रोर्थः नुगुणेतिसन्नियोगशिष्टपरिभाषायांव्या
ख्यातः नचमान्तत्वेगतिसञ्ज्ञासन्नियोगशिष्टत्वेगतित्वेपिमान्तत्वसन्नियोगशिष्टत्वमस्त्वेवेतिवाच्यम् तथासतिमान्तत्वभावाभावप्र ३९

युक्तौगतित्वभावाभावौस्यातान्नौचनसंभवतः अनुवृत्तविभाषापदस्यगतिसञ्ज्ञयासबन्धारूपमान्तत्वेविभाषापदसम्बन्धेतुवि
भाषापदस्यक्रमसम्बन्धयोरापत्तिः वाक्यभेदस्योभयवादिसिद्धत्वेपिसाक्षात्छन्दादीनांमान्तत्वविधानाभावेनतत्रगतिसञ्ज्ञा
यांविकल्पार्थंविभाषापदस्यगतित्वेपिसम्बन्धायत्तिश्च तस्माद्वैकल्पिकगतिसञ्ज्ञाभावपक्षेनित्यायांगतिसञ्ज्ञायांपूर्वप्रवृत्त
परशास्त्रस्याभावांशमादायवाधसत्वात्सकृद्गतिन्यायविषयतायाः सत्वेनपुनः प्रसङ्गविज्ञानस्वीकारपरभाष्यकैयटविरोधा
पत्तिर्दुष्परिहरा अचश्चेतिसूत्रभाष्यानुयायाश्चतेपिसुयोजनत्रत्यकैयटस्तुविन्त्यएवेत्यन्यत्रविस्तरः यत्वेतेनसकृद्गतिन्यायाश्र
यणेसिद्धिरत्यत्रपरत्वात्तानङ्वाधितोधित्वंनस्यादितिशेखरोक्तमिष्टापत्तिग्रासात्स्यानिवत्सूत्रभाष्यानानुगुणत्वाच्चवालप्रतारण
मात्रमितिमन्तव्यंमिन्धीत्यादेस्तानङभावपक्षेसिद्धत्वादितिनतच्चिन्त्यम् मिन्धकीतिपाठसत्वेनतथापाठस्येवाभावात् अतएवाचश्चे
तिसूत्रेभाष्येयत्रहिपूर्वोविधिः पूर्वप्रवृत्तिः परविधिंनबाधते तत्रपुनः प्रसङ्गविज्ञानमितिकैयटमुपादाययथामिन्धकीत्यत्रपरा
त्वाद्धौकृतेपुनः प्रसङ्गविज्ञानादकच् इत्युद्योतः सङ्गच्छते सत्यपितथापाठेदोषाभावस्यगदाग्रंगुरुचरणैः प्रतिपादितत्वाच्चेतिदि
क् विकरणेभ्योनियमोबलीयान् शवादिभ्यस्तुपूर्वमेदेति कर्मशैसार्वधातुकेपदेतद्विधानात् नियमत्वेनान्याभिमतोवाक्येक
वाक्यतयाविधिरित्यर्थः अस्मिन्पक्षेएवमेवव्याख्येयत्वात् पूर्वमनेनतुस्यादेः परत्वात्तद्वादेशेगुणकृतेनेनुनियमात्पूर्वस्यपरत्वेनस्यादेरेव

।.दी. श्यादिष्वा मत्वादिरिति बोध्यम् एकवाक्यतया विधानपक्षे एव स्यादिभ्यो लादेशानामन्तरङ्गत्वमाश्रयणे न पक्षान्तरमाह यद्वेति
३७ एकवाक्यतया विधानपक्षे निबन्धे द्विविधेपि सन्ज्ञाया आदेशानां विधानाद्विहितानां च सन्ज्ञाविधानात्मतमन्याश्रयदोषं परिह
रति आत्मनेपदेष्वन्यतरस्यामिति एकवाक्यतया विधानवादी विहितानां यम इति प्रागुक्तपक्षद्वयं दूषयति भिन्नवाक्येति गौरवमिति
गौरवत्रयमित्यर्थः यदि तु लुगादिनैव नियमे नाप्यनुत्पत्तिरेवान्वाख्यायते तदोक्तपक्षयोरपि दोषाभाव इत्यत आह अन्यत्र विस्त
र इति कृताकृतप्रसङ्गि नित्यन्तदुदाहरति अत एव तुदतीति तद्विपरीतमनित्यमित्यस्य प्रपञ्चमाह यद्यपीति शब्दान्तरस्य प्राप्नु
वन्विधिरनित्यो भवति इदानीं तुदतीत्यस्य नित्योदाहरणत्वासंभवेपि गुणान्नित्यैकादेश इत्याशयेन सार्वधातुकमपिदिति सूत्र
भाष्योदाहृते च्यवते इत्यादौ प्रयोजनम्बोध्यम् प्रथमोदाहरणं तु तुदतीत्यादौ एतत्तुल्यन्यायेनेति शब्दान्तरान्प्राप्नुवतः शब्दान्तरे प्रा
प्नुवतश्चानित्यत्वम् प्रथमोदाहरणं तु तुदतीत्यादिगुणे कृते शब्दान्तरान्प्राप्तेः लक्ष्यानुसारात्तु क्वचिन्न कृताकृतेनित्वस्य मानत्वा बाधर
त्यन्यत् द्वितीयोदाहरणं करिष्यतीत्यादि स्लादेशे कृते स्यादीनां शब्दान्तरे प्राप्तत्वेनानित्यत्वात्परत्वान्निवादय एव लक्षणान्तरेण प्राप्नुव
न्विधिरनित्यः असिद्धवत्सूत्रे इति तत्र हि कुर्व इत्यादौ लघूपधगुणोकारलोपयोः प्राप्तौ नित्यत्वादुकारलोपः गुणस्तु लोपे कृते प्रत्य
लक्षणेन प्राप्नोतीत्यनेन न्यायेनानित्य इत्युक्तम् क्वचित्कृताकृतप्रसङ्गित्वमात्रेणापि नित्यता यस्य च लक्षणान्तरेण निमित्तं विहन्य ३७

ते तस्य नित्यम् लक्षणान्तरेण शास्त्रेण न तु लक्षणान्तरेण प्राप्नुवन्निति वदति देशशास्त्रेणेति सप्तमे इति स्वमोर्नपुंसकादिति सू
त्रे इत्यर्थः तत्र हि तत्कुलमित्यत्रान्त्यलुकोः प्राप्तयोः परत्वान्नित्यत्वाल्लुगित्युक्तेः नित्यो लुग्न हि कृतेऽम्प्राप्नोति अमा वाधात् इति भा
ष्यमुपादाय कैयटेनोक्तम् एवं च पूर्वोक्तचिदित्यस्याः प्रपञ्चभूता अपरा तु यद्यपीत्याद्यर्थक कृताकृतेत्यस्याः प्रपञ्चभूता शब्दान्तरा
दित्यस्यामात्रेः क्रमेण नद्वापष्ठमकमाह वलीति लुङः प्रथमस्येति तत्र हि श्वः कर्तेत्यादौ तासस्तु दात्तेदिति निघातडादेशयोः
प्राप्तौ डादेशस्यानित्यत्वमुक्तम् स्वरभिन्नस्य च प्राप्नुवन्विधिरनित्यः नयेत्यन्यत्र विस्तरः असिद्धं वहिरङ्गमन्तरङ्गे अन्तः पदार्थमा
हमध्ये इति मध्ये इत्यस्य सापेक्षत्वादाह वहिरङ्गशास्त्रीयेति अन्तर्भूतानीति शेषपूरणं लभ्यम् परिभाषास्थान्तः शब्दस्यान्तर्भूता
नीत्यर्थकत्वमन्तर्भूतत्वस्य साकांक्षत्वादुहिरङ्गशास्त्रीयेत्यादिशेषपूरणं लभ्यमिति सूचितम्वहिरङ्गपदे तथैव प्रतिपादनात् तेना
र्थनिमित्तकस्येति ननु समानाधिकरणसमासाद्बहुव्रीहिर्विप्रतिषेधेनेति वार्त्तिकस्य खण्डनायान्तरङ्गः कर्मधारयः कान्तरङ्गता
स्वपदार्थे कर्मधारयोन्तरङ्गः अन्यपदार्थे बहुव्रीहिर्वहिरङ्ग इति वर्णाद्वर्णे नेति सूत्रभाष्यविरुद्धमेतदर्थकृतवहिरङ्गत्वस्याश्रय
णादिति चेन्न तस्यैकदेश्युक्तित्वेनादोषात् तथा हि शेषो बहुव्रीहिरिति सूत्रे समानाधिकरणानां बहुव्रीहिरिति वदतो वार्त्तिककार
स्य वर्णाद्वर्णे नेति सूत्रे समानाधिकरणसमासाद्बहुव्रीहिर्विप्रतिषेधेनेति कथनं व्याहतमनेकमन्यपदार्थे इति बहुव्रीहेः कर्म

प.टी. धारयाप्राप्तिविषयेऽचारितार्थ्यात् विप्रतिषेधप्रतिपादनावसरे कण्ठेकालइत्यादौ बहुव्रीहित्वव्यवकाशप्रदर्शनपरभाष्योक्तिर
३८ पि एकदेशिन एव स्त्रीविशेषणे इति ज्ञापकात्तत्र व्यधिकरणविषये बहुव्रीहेस्सिद्धत्वात् अग्रे चैनद्युक्तो विप्रतिषेधोन्तरङ्गः स
मानाधिकरणसमासः बहिरङ्गो बहुव्रीहिरिति विप्रतिषेधखण्डकभाष्योक्तिरप्येकदेशिन एवोक्तरीत्या बहुव्रीहेर्निरवकाशत्वे
न बाधकत्वात्तद्विषयेऽन्तरङ्गत्वेऽपरत्वेऽल्पाद्विप्रतिषेधासंभव एव वक्तव्ये दृष्टान्तस्य वक्तान्तरङ्गत्वकथनस्यानुचितत्वाच्च अग्रेऽर
ष्ट्रप्रतिपादनमपि सिद्धान्त्येकदेशिनः दृष्टसाधकत्वेन सिद्धान्तितत्वात्रिरवकाशत्वे न बहुव्रीहेः सिद्धौ विष्टेरनुपयोगेनैकदेश्यु
क्तत्वादित्याहुः वस्तुतस्त्वर्थनिमित्तकान्तरङ्गत्वसर्वथा नाश्रीयते इति नादित्यप्रसिद्धभाविनावेतावर्थाविति स्वरवसानयोरिति सू
त्रभाष्यादन्तरङ्गबहिरङ्गयोस्तुल्यवदाश्रयणेनानन्तर्भूतार्थनिमित्तकान्तरङ्गत्ववन्निरूपितं बहिर्भूतार्थनिमित्तकबहिरङ्गत्वमा
श्रीयते एवानादेशान्तरङ्गनिरूपितमर्थकृतं बहिरङ्गत्वं तु नाश्रीयते यथाप्रकृते उक्तभाष्यादन्तरङ्गशब्दयोर्घटकस्याङ्गत्वमाश्री
यत एवानादेशान्तरङ्गनिरूपितमर्थकृतन्बहिरङ्गत्वं तु नाश्रीयते यथाप्रकृते उक्तभाष्यादन्तरङ्गशब्दयोर्घटकस्याङ्गशब्दस्य समा
नार्थकस्यैव ग्रहणे न शब्दनिमित्तकस्य बहिरङ्गस्य तादृशान्तरङ्गनिरूपितस्य बहिरङ्गत्वमिति अर्थनिमित्तकस्य बहिरङ्गस्य तादृश ३८
न्तरङ्गनिरूपितस्यैव बहिरङ्गत्वमिति च स्वीकारात् अन्यथा शब्दनिमित्तकान्तरङ्गस्यार्थनिमित्तकबहिरङ्गेन विरोधस्यैवाभावेन भा।

ष्योक्तप्रतिद्वन्द्वित्वानापत्तेः अत एव बहिर्भूतकर्मादिसाधनार्थकप्रत्ययापेक्षत्वादित्यादि अन्तरङ्गनरार्थोपसर्गनिमित्तकसुयोऽन्तरङ्ग
त्वमूलकनैव वस्यतिवस्यतिचात्कःपरस्मिन्नितिसूत्रस्थभाष्यस्थितमनुष्योपमितिलोकन्यायसिद्धत्वमस्याः अर्थानामयौत्यादिना तत्रापि
पूर्वोपस्थितजात्याद्यर्थनिमित्तकान्तरङ्गत्वस्य परोपस्थितलिङ्गाद्यर्थनिमित्तककार्य्येषु सत्वात् विशेषापेक्षात् सामान्यापेक्षमन्तरङ्ग
मित्यस्य खण्डनप्रस्तावे समुद्भूतमनुप्सूत्रस्य भाष्यविरोधापरिहारायतस्यैकदेश्युक्तत्वान भ्युपकत्वे तेनैवार्थकृतबाहिरङ्गत्वाश्रय
णप्रयुक्तविरोधस्यापि परिहारः संभवतीति स एव कृतः नतूक्तसूक्ष्मेक्षिकाकृतेति न तद्विरोध उद्भावनीयः एकाजिति कर्मधार
योन बहुव्रीहिर्विर्जिपदार्थप्रधानत्वेनान्तरङ्गत्वादिति निपातएकाजनाङिति सूत्रस्थशेखरोपि व्याख्यात इति दिक् एतेन वर्णो
वर्णेनेति सूत्रभाष्यविरोधमस्याल्लोकन्यायसिद्धत्वप्रतिपादकाचःपरस्मिन्निति सूत्रभाष्यविरोधं चापादयन्कश्चित्रानुमन्तव्यः
प्रयोजनाभिन्त्यम् अत्र बहिरङ्गपरिभाषाशास्त्रे शब्दनिमित्तकान्तरङ्गशास्त्रे तस्यैव शब्दस्यैव तेन प्राधान्येन तत्रैतिशेषःश
ब्दनिमित्तकान्तरङ्गशास्त्रस्थले इति तदर्थः तेनार्थकृतान्तरङ्गस्थलेऽर्थकृतबहिरङ्गत्वमस्त्येवेति बोध्यम् अत एव शब्दकृतान्त
न्तरङ्गनिरूपितार्थकृतार्थबहिरङ्गत्वस्यानाश्रयणादेव अन्यथा तदसङ्गतिः स्पष्टैवेति नतिस्त्रितिनिषेधासङ्गतिरित्यर्थः यत्तु त्रि
शब्दार्थसमवेतसंख्यासमर्थके आमि त्रयादेशइत्यर्थकस्यनेत्स्वय इत्यस्य साधवमते गौणः प्रवृत्त्या प्रियत्रिसृणामित्यादौ निषेधस्या।

प·टी चरितार्थत्वादन्तरङ्गप्रवृत्तमुत्तरं त्वबहिरङ्गप्रवृत्तेः सर्वसंमतत्वेनात्र यादेशोत्तरं तस्यानिवृद्धावपि तस्यादेशे दोषाभावाच्च वस्तुतस्तु षष्ठी बहु
३९ वचनरूपाविशेषसापेक्षत्वात्त्र्यादेशस्य नान्तरङ्गत्वमिति तच्चिन्त्यम् एतत्तदोरित्यादावर्थकारकसम्बन्धाश्रयणेऽ नञ्समासग्रहण
सलिङ्गत्ववदत्र तथार्थाश्रयणे प्रमाणाभावात् षड्भ्यो लुगित्यादाविव बहुवचनादेरभावाच्च स्थानानिरूपितसम्बन्धस्यान्तरङ्गत्वा
त्षष्ठीस्थाने इति परिभाषाबाधे मानाभावाच्च षष्ठ्याद्यन्तात्परस्यैव कार्यं तथार्थाश्रयणे च लक्षणपत्तेश्च उक्तरीत्यान्तरङ्गबहिरङ्ग
भावस्यैवाभावेनान्तरङ्गप्रवृत्तमुत्तरमित्यस्यासंगतत्वाच्च। त्र्यादेशकर्तव्ये स्वतन्त्रस्य स्थानिवद्भावप्रतिषेधरूपत्वार्थकस्यात्र यादेशोत्तरन्त
स्यप्रतिषेधरूपवार्त्तिकस्यासङ्गतिप्रसङ्गाच्च। इदृशो विषयेऽर्थकृतबहिरङ्गत्वाश्रयणं कुर्वता त्वयापि। त्र्यादेशेनत्रं स्थानिवद्भावा
तिस्मादेशोपितस्य नामीति दृष्टया बहिरङ्गत्वेनासिद्धत्वान्नतिस्त्रिनितिनिषेधससार्थक्यं वक्तुमशक्यत्वाच्च विशेषापेक्षासामान्यापेक्षम
न्तरङ्गमित्यस्य मूले एव दूषितत्वेन वस्तुतस्त्वित्यस्यासङ्गतत्वाच्च। यत्तु तन्त्रेतावदादरणीयम्पूर्वप्रदर्शितानाचः परस्मिन्निति सूत्रभा
ष्यान्तरङ्गवर्त्तिलोकन्यायसिद्धोयमर्थ इति यच्च युगपत्प्रत्यङ्गलत्रैव प्रवर्त्तमानो वाह ऊठसूत्रीयासिद्धपरिभाषाया न सङ्ग्राहकः ३९
जातस्य बहिरङ्गस्य पश्चात्प्रवर्त्तमानेऽन्तरङ्गेऽसिद्धत्वमिति हि तदर्थो धर्मिग्राहकमानसिद्धत्वादिति तच्चिन्त्यम्। लोकसिद्धान्तर
ङ्गन्यायस्य वाह ऊठसूत्रीयासिद्धपरिभाषार्थसंग्राहकत्वाभावेपि असिद्धपरिभाषाया जाततत्कालप्राप्तिकबहिरङ्गासिद्धत्वबो

धनेन लोकसिद्धान्तरङ्गन्यायसङ्ग्राहकत्वात्। अत एव विप्रतिषेधे परं कार्यमिति सूत्रे भाष्येऽन्तरङ्गस्त्वेति वार्त्तिकस्य चवदूनिजा
ततत्कालप्राप्तिकबहिरङ्गविषयाण्युदाहरणानि दत्तान्येतस्याः परिभाषायाः प्रयोजनानि यदर्थमेषा परिभाषा कर्त्तव्या यानि प्रयोजनानि
प्रयोजनानि सैषा परिभाषा क्रियते। ननु चेयं च कर्त्तव्या। असिद्धं बहिरङ्गमन्तरङ्गे किं प्रयोजनम्। पचावेदं पचामेदम्। असिद्धत्वाद्बहिरङ्ग
लक्षणस्यान्तरङ्गलक्षणमैत्वं माभूदिति उभे तर्हि कर्त्तव्ये नेत्याहानयैव सिद्धमिहापि स्योनः स्योनेत्यसिद्धत्वाद्बहिरङ्गलक्षणस्य गु
णस्यान्तरङ्गलक्षणो यणादेशो भविष्यतीत्युक्तम्। कैयटेनापि पचावेदमित्यन्तरङ्गबलीयस्त्वेनैतन्न सिध्यति बहिरङ्गे कृते आद्गु
णे एतदैत्वमाप्नोति। अनयैवेति। इयं हि व्यापिका पूर्वोक्तप्रयोजननिष्पादाच्छास्त्रासिद्धत्वाश्रयणाद्बहिरङ्गो न तावत्प्रवर्तते। अन्त
रङ्गलक्षणे तु प्रवृत्ते यत्र निमित्तसद्भावस्तत्र बहिरङ्गलक्षणप्रवृत्तिरित्युक्तम्। न चैवं कुत्र योग्यं शास्त्रासिद्धत्वाश्रयणादनयोन्तरङ्ग
श्चेत्यपूर्ववचनार्थ एव गृह्यते न लोकसिद्धन्याय इति अविशेषेण भाष्यकैयटप्रवृत्तेरेकदेशविकृतमनन्यवदित्यादिवल्लौकिका
र्थस्यैव वार्त्तिके न प्रतिपादनाल्लौकिकन्यायाद्वार्त्तिकस्याभेदाभावाच्च। तस्मादसिद्धपरिभाषयैव तत्स्यक्रोडीकारः। तेन त्रैपादिके
न्तरङ्गे कार्येऽसिद्धपरिभाषायाः पक्षद्वयेप्यप्रवृत्तेर्मूलकृतैव वक्ष्यमाणत्वात्तदेकतान्तरङ्गन्यायस्याप्यप्रवृत्तिः। अत एवास्सो
मादित्यत्र मान्यगृहस्य सन्नतायां तस्यासिद्धत्वाद्यावेकादेशप्रतिषेधो वक्तव्य इति भाष्येऽन्तरङ्गबलीयस्त्वाद्यावेकादेशोऽप्यपू

प.टी. र्वमूलमीत्वेन भवतः नाजानन्तर्य्ये इति निषेधाद्बहिरङ्गत्वयादिषु अजानन्तर्य्याश्रयणादिति कैयटे वक्ष्यमाणरीत्याजानन्त
४. र्य्य इति परिभाषाविषयत्वं मनसि निधाय यत्रैयादिके न्तरङ्गबहिरङ्गपरिभाषाया अप्रवृत्तिरिति कैयटोभिहितं तस्य चोक्तमा
प्रायः यत्तु क्रियाधीन्यायप्रवृत्तेरनिराकरणाद्वृत्तौ तरमिति तच्चिन्त्यमाशास्त्रीये कार्य्ये परिभाषाया अप्रवृत्तौ नकोडीकृतन्यायस्या
प्यप्रवृत्तेरुक्तत्वात्। अत एव गतिबुद्धीत्यादावकर्मकत्वरूपान्तरङ्गद्रव्यकर्मण एव निषेधः प्रत्याख्यानबहिरङ्गकालादिकर्म
ण इति संगच्छते। संगच्छते च ल्यब्लोपे कर्मण्यधिकरणे चेत्यादौ प्रत्यासत्त्याल्प्यप्रकृत्यर्थक्रियानिरूपितकर्माधिकरणयोरे
व पञ्चमीत्यर्थः। अत्र शास्त्रीयकार्य्यस्यान्तरङ्गस्य कस्यचित्कर्त्तव्यस्याभावेनासिद्धपरिभाषाया अप्रवृत्तावपि लोकसिद्धान्त
रङ्गन्यायेनैव लोके इवात्रापि वाक्यार्थसाधने बाधकाभावात्। प्रत्यासत्तिश्चान्तरङ्गत्वमेव। यत्तु वाक्यार्थसंस्कारकस्य लोकसि
द्धान्तरङ्गन्यायस्य त्रियाधामपि प्रवृत्तौ फलोपवर्णनं धिचभ्रूलोभ्रूलीत्यादौ पदस्येत्यनुवर्त्य प्रत्यासत्त्या निमित्तनिमित्तिनोरेकपदस्थ
त्व एव लोपविधानात्पयोधावनि सोमसुत्स्यानेत्यादौ न दोष इति सङ्गीतितत्र न कर्त्तव्यमित्याकर इति तत्रैवमपि पयोधावनं सोमस एम
मासे निमित्तनिमित्तिनोरेकपदस्थत्वेन प्रामस्य लोपस्य वारणात्। अखण्डैकपदग्रहणे तु प्रमाणाभावः। रषाभ्यामित्यादौ तु पदे इ ५
ति निमित्तनिमित्तिनोरेकपदस्थत्वलाभे सिद्धे समानग्रहणसामर्थ्यात्तदर्थला[hole]ः न च पदस्येत्यनुवृत्तिसामर्थ्यात्तदर्थलाभ इति वाच्यं

अनुवृत्तेरुक्तरीत्यार्थत्वात्। सोमसुत्स्यास्वतिपयोधावनीत्यादौ सलोपवारणे न चा[hole]र्थत्वाच्च। तस्माज्झलोझलीति लोपे नोत्यानभि
त्यादेः सिद्धावुदः स्थास्तम्भोरिति पूर्वसवर्णविधौ नाज्ञापकाज्झलादौ प्रत्यये झलोझलीति लोपविधानात्सोमसुत्स्यानेत्यादौ लो
पाभाव इति शेखरोक्तो वा समाधेयम्। यत्तु झलोझलीति लोपाभावपक्षे प्यस्यैव श्रवणं न तु खसि चेति चर्त्वे चर्त्वमप्रतिथ।
स्यासिद्धत्वादिति [hole]दित्तादसम्भनस्य थकारश्रवणस्याप्रसङ्गादिति तच्चिन्त्यं हलो यमामिति सूत्रोक्तभाष्यसम्मतापाठाध्या
यीपाठपक्षे प्यस्यासिद्धत्वाभावेन चर्त्वप्रवृत्त्या तकारस्यैव श्रवणात्। यद्यप्यस्मिन्पक्षे त्रितकारस्य सिद्धिप्रसङ्गो न झलोझली
ति लोपस्य पाक्षिकत्वं येन तदभावे सकारस्य तकारे तथा स्यात्। वस्तुतस्तु एतदपि नव्यकृतां शाक्यं सकारस्य चर्त्वे प्यान्तरतम्यात्स
एव न तु तकारः ल्यप्राणतया प्रयत्नभेदात्सः सीति तादेशविधानाज्ञापकादिति तदपि चिन्त्यम। व्यञ्जनान्त्यरस्यैकस्यानेक
स्य वोच्चारणे विशेषाभावेन श्रुतिश्चापि भिद्यत इति धि चेति सूत्रभाष्यप्रामाण्ये न च त्रितकारत्वे द्वितकारत्वे वा विशेषाभावा
त् लक्ष्ये रामरणाभूतेन नपरे श्चवाङ्कयोरिति सूत्रे कैयटेनाप्युक्तरीत्या ज्ञापकस्यैव वर्णनाच्च नन्वेवमनोरोरप्सुनाद्स्नुत इति
सूत्रभाष्ययोः ऽट्पयोदित्यादौ पूर्वत्रसु तेऽप्सुनाद्स्नुत इति निषेधप्राप्तिमाशङ्क्य न वा बहिरङ्गलक्षणत्वादिति समाधानवाक्यप
दान्तस्य पदादावुत्वमन्तरङ्गे कैयटमते दूराप्यर्थापेक्षत्वेन मूलकृन्मते वाक्यत्वसम्पादकपदान्तरसापेक्षत्वेन त्वं सुनो बहिरङ्ग इति

प॰टी॰ तस्यासिद्धत्वान्निषेधाप्राप्त्यात्वं संसाध्येष्टापि तर्हि प्राप्नोतीति सुस्थोता अत्र त्वमसीत्याशङ्क्य परित्वतमन्तरङ्गेः त्रप्लुतः वहिरङ्गमु
४१ त्वं वाक्यान्तस्य वाक्यादाविति तदेतद्विरुध्यते॰ नान्तरङ्गस्य प्लुतस्य त्रैपादिकत्वेन परिभाषायामलक्रोडीकृतान्तरङ्ग न्यायस्य च शास्त्री
य कार्य्यस्य कर्त्तव्यत्वेनाप्रवृत्तेरिति चेन्न खरवसानयोरिति सूत्रस्याभाष्यप्रामाण्येन त्रैपादिकेऽन्तरङ्गे वहिरङ्गपरिभाषाया
सत्त्क्रोडीकृत न्यायस्य चाप्रवृत्तेरेतद्भाष्यस्य च पूर्वप्रान्ते ढुण्ढितयाएकदेशिनोक्तत्वादविरोधः अतएव प्लुतप्रगृह्या इति सूत्र
भाष्ये देवदत्ता ३ अत्र त्वमसीत्यत्रासिद्धमिति प्लुतस्यासिद्धत्वादर्थेन प्लुतप्रकृतिभावप्रवचनेन तस्यासिद्धत्वज्ञापनद्वारा कोदे
शानप्लुतो विप्रतिषेधेनेत्युक्तमन्यथा सुस्थोता इत्यत्र त्वमसीत्यत्रोक्तरीत्यात्रापि प्लुतस्यान्तरङ्गत्वेनैकादेशस्य वहिरङ्गत्वेन न त
योर्विप्रतिषेधस्यासङ्गत्यापत्तेः प्रयोः द्वयोर्दशाल्लेन्द्र इत्यादौ च त्रैपादिकयारुत्वैकादेशयोरन्तरङ्गयोः सम्पादिकानवावहिर
ङ्गलक्षणत्वादित्यभिभाष्योक्तिसुपुक्तैव कैय्यटस्तु देवदत्ता ३ अत्र त्वमसीत्यत्र प्लुतस्यान्तरङ्गत्वमभिधाय भाष्यं दूषयन्न चिन्त्य
एव परिभाषायासत्देकोक्तेन न्यायस्य च त्रैपादिकेऽन्तरङ्गेऽप्रवृत्तेः वाक्यत्व सम्पादक एही त्यादिपदान्तरसापेक्षत्वेन प्लुतस्यैका
देशसमन्तत्वादित्युद्योतकृता समाधानाच्च ननु तदपेक्षयाप्लुतादपि अत्र त्वमसीति वाक्यान्तरसापेक्षैकादेशस्य वहिरङ्गत्व ४१
मितिचेदत्राहुः प्रकृते दूराद्धूते चेति प्लुतविषये एकादेशस्यात्वस्य चोक्तरीत्या परम्परया वाक्यसापेक्षत्वेपि गुरोरनृत इति प्लुतविष

येनदनपेक्षणाद्वाक्यापेक्षणस्य वैषम्याभावान्नत्परिहारान्तपदापेक्षत्वान्नु प्लुतविषये एकादेशादेः सर्वत्रैवेति प्लुते वाक्यद्वारकत्व
द्वारकपदापेक्षासवर्णेजद्वारकतया पदापेक्षाएकादेशादेरिति साम्यमित्याशयात् यद्वैकादेशे सवर्णेजद्वारकपदद्वारकवाक्या
पेक्षेति द्वान्तरितपरम्परया अग्रहणन्न वाक्यापेक्षत्वमपि तु सवर्णेज द्वारकपदापेक्षमेव प्लुतोपि वाक्यद्वारकपदापेक्षत्वमेवे
तिसाम्यमेवेत्याशयान्न चैव सुस्थोता ३ अत्र च सीत्यत्राप्युक्तरीत्या साम्यापत्तौ प्लुतस्यान्तरङ्गत्वप्रतिपादकोक्तभाष्यविरोधापत्ति
रितिवाच्यम् तस्यैकदेश्युक्तित्वेनादोषात् एतेन प्लुतस्यापि वाक्यत्वसम्पादकपदान्तरसापेक्षतयैकादेशसमत्वमेवेतिचिन्त्यमि
त्यभिनवविवरणकाराय दत्तस्तदशुद्धं देवदत्ता ३ अत्र त्वमसीत्यत्र वाक्यस्य टेः प्लुतसिद्धये एहीत्यादिवाक्यशेषस्य प्राक्पूरणा
त्तदपेक्षप्लुतादपि अत्र च सीति वाक्यान्तसापेक्षैकादेशस्य वहिरङ्गत्वमित्यपास्तमिति यत्तूक्तभाष्यदूषककैय्यट इति तच्चिन्त्य
मित्युक्तं तत्त्वशुद्धमिति तत्र चिन्ताबीजं नाजानन्तर्य्य इति निषेधाद्देवदत्ता ३ अत्र च सीत्यादौ एकादेशात्प्लुतो विप्रतिषेधेनेति
भाष्योपपत्तिरिति तच्चिन्त्यम् नाजानन्तर्य्ये इति परिभाषाया असत्वात्॥ सत्वे तया जातवहिरङ्गासिद्धत्वस्यैव निषेधो न समान
कालप्राप्तिकवहिरङ्गासिद्धत्वस्येति निखिलवैयाकरणसिद्धान्तविरोधाच्च सुस्थोता अत्र वसीत्यत्र प्लुतोत्वयोरन्तरङ्ग वहिरङ्ग
भावप्रतिपादकस्यानोरिति सूत्रभाष्यविरोधाच्च इ ण् उ ण् पूर्णनामादुग्धः सवर्णे दीर्घत्वात्प्राचः नस्यान्तरङ्गलक्षणत्वादिति

प॰टी॰ त्तिकविरोधाच्च यत्तु पचष्यपजे रुन्द्रमित्यादावयज रुन्द्रमिति स्थिते उत्तरोपस्थितिनिमित्तनिमित्ते सवर्णदीर्घे ऽजानन्तर्य्यसद्भा
४२ वसम्पादितस्य निमित्तविनाशसंभावनामादाय कृतव्यूहपरिभाषया निषेधादविधेयत्वेनाजानन्तर्य्यपरिभाषा न प्रवर्त्तते इत्य
न्तरङ्ग आद्गुणेनिष्पन्नव्यूहस्तथा चेणडि श्रीनामाद्गुणः सवर्णदीर्घत्वादिति वार्त्तिकप्राप्तिकल्पद्वयोदोषः प्रत्युक्त इति तच्चिन्त्य
म् अकृतव्यूहपरिभाषायामूलकृत्स्नत्वेनः सत्वान्सत्वे वायादिगुणस्यान्तर्हि सवर्णदीर्घो न स्यादिति निमित्तविनाशसंभावनामादा
य तथैव सवर्णदीर्घवारणस्य सिद्धत्वादन्तरङ्गत्वाभिप्रायेण ङ श्रीनामाद्गुणः सवर्णदीर्घत्वादिति वार्त्तिककृदुक्तिवैयर्थ्यापाता
च्च ननु तया परिभाषया संभावितनिमित्तविनाशमादाय सवर्णदीर्घाप्राप्तौ नाजानन्तर्य्य इति परिभाषानिमित्तस्यत्वदुक्तविधेय।
स्यतिष्ठत्या नाजानन्तर्य्य इति परिभाषाया अप्रवृत्तौ वार्त्तिककृदुक्तमन्तरङ्गत्वयुक्तमेवेति चेन्न एवन्तर्हि नाजानन्तर्य्यपरिभाषाया भा।
व्याक्तमूर्द्धाभिषिक्तोदाहरणे स्वधूर्हि रथ्यधूरित्यादौ यणादेशः जानन्तर्य्याश्रयणे पूर्वापेक्षयोत्तरोपस्थितिमन्निमित्तकत्वाभावा
त् ऊठि परत्वेक्षयोत्तरोप[illegible]तिमन्तिमन्निमित्तकत्वेप्यजानन्तर्य्योनाश्रयणाद्भाष्यासङ्गत्यापत्तेः अधीत्यप्रेत्येत्यादौ सवर्णदीर्घे
ऽजानन्तर्य्यसत्वेपि तुगपेक्षयोत्तरोपस्थितिमन्निमित्तकत्वाभावात्॥ तुकि दीर्घापेक्षयोत्तरोपस्थितिमन्निमित्तकत्वेप्यजानान्त। ४२
र्य्यानाश्रयणं ज्ञापकपरविप्रतिषेधसूत्रभाष्यासङ्गत्यापत्तेश्च धर्म्मिग्राहकमानाज्ज्ञातवहिरङ्गासिद्धत्वस्यैवानयानिषेधाच्च एतेनस्व

दन्ता ३ अत्र च सीत्यत्र स्तुते कृते पश्चादेकादेशं बाधित्वा प्राप्तेप्रकृतिभावे ऽजानन्तर्य्याश्रयणे ऽन्तरङ्गपरिभाषा न प्रवर्त्तत इति नाजा
नन्तर्य्यपरिभाषार्थनिष्कर्षस्य वक्ष्यमाणत्वात् सुस्त्री ना ३ अत्र च सीत्यत्र तु स्तुते स्तुते स्तुते स्तुनादिति निषेधाद्गतोरोरित्यस्य तदुपजी
वकस्याभावान्नाम्न्[illegible]जानन्तर्य्याश्रयणमिति विशेषादित्यपास्तम्॥ उक्तभाष्यविरोधादेवं परिष्कारस्य एवकर्त्तुमशक्यत्वादिति ना।
जानन्तर्य्यपरिभाषायां विशेषेणेव वक्ष्यामः एवं सञ्ज्ञाकृतान्तरङ्गवहिरङ्गभावस्थलेपि अन्तरङ्गवहिरङ्गयोरुभयोरङ्गशब्देन स
ञ्ज्ञारूपनिमित्तग्रहणेनान्तर्भूतसञ्ज्ञाकृतान्तरङ्गवहिरङ्गभावस्य लेपि अन्तरङ्गवहिरङ्गयोरुभयोरङ्गशब्देन सञ्ज्ञारूपनिमित्तग्रह
णेनान्तर्भूतसञ्ज्ञानिमित्तकान्तरङ्गनिरूपितत्ववहिर्भूतसञ्ज्ञानिमित्तकवहिरङ्गत्वस्य स्वीकारान्न दोषः सञ्ज्ञयोरन्तर्भूतत्वं च लक्ष्य
स्थितसञ्ज्ञिद्वारकं यथा स्योन इत्यत्र गुणादेशो भवत्यन्तरङ्ग इति विप्रतिषेधसूत्रभाष्ये प्रदर्शितम् तत्र सिऊन इति स्थिते यस्त्रो
पात्तानि सञ्ज्ञावोध्यपूर्वस्थितसञ्ज्ञ्युकारनिमित्तकपरमपेक्ष्य या गुणविधायकसूत्रोपात्तार्द्धधातुकसञ्ज्ञावोध्यपरोपस्थितिनिमित्त
स्यय निमित्तकगुणस्य वहिरङ्गत्वाद्यण्सिद्धिः सञ्ज्ञाकृतान्तरङ्गवहिरङ्गभावस्य सर्वथा ऽनाश्रयणे तु एतद्भाष्यविरोधापत्त्या वहू।
पन्नवप्रसङ्गः पूर्वोपस्थितान्तरङ्गत्वमादाय भाष्ययोजनन्तु न संभवति। पूर्वपरोपस्थितयोर्निमित्तयोः सूत्रस्थितसञ्ज्ञावोध्यत्वा
त् अनीदृशसञ्ज्ञाकृतान्तरङ्गभावस्तु नाद्रियते॥ यथा गोधेरः यचेरन्नित्यादौ वलं सञ्ज्ञावोध्यरेफलकाररूपसञ्ज्ञिनिमित्तकत्वा

प. टी. पापेक्षयाङ्गसञ्ज्ञाबोध्यप्रकृतिस्थसञ्ज्ञिनिमित्तकैयादीनांपरोपस्थितसञ्ज्ञानिमित्तकत्वाभावेनतदघटितत्वेनचवहिरङ्ग
४३ त्वाभावान्नासिद्धत्वमायेनविधिस्तदन्तस्येतिसूत्रस्थमिकोयणचीत्यत्रतदन्तविधौतदादिविधौचसतिऊनशब्दमाश्रित्यगुण
देशोनशब्दमाश्रित्यगुणइतिप्रतिपादकभाष्यमपिनास्माकंप्रतिकूलमजादीतिसञ्ज्ञाशब्दबोध्यलक्ष्यस्थितऊनशब्दसापे
क्षयणआर्द्धधातुकसञ्ज्ञाशब्दबोध्येनसापेक्षगुणेनान्तरङ्गत्वाभावात्। नह्यूठकनशब्दमात्रापेक्षत्वेनगुणस्यैवान्तरङ्गत्वाच्च
गुणापेक्षयोठोऽन्तरङ्गत्वप्रतिपादकः कैयटस्तुचिन्त्यएव वकारान्तमङ्गमनुनासिकादिंचप्रत्ययमपेक्षमाणस्योठउक्तसञ्ज्ञा
बोध्यलक्ष्यास्थितप्रकृतिप्रत्ययनिमित्तकतयागुणादन्तरङ्गत्वाभावात् अङ्गसम्बन्धिनीमिग्लक्षणंलब्धोपधामार्द्धधातुक
ल्वप्रत्ययमपेक्षमाणस्याप्युक्तसञ्ज्ञाबोध्यप्रकृतिप्रत्ययोभयनिमित्तकतयावहिरङ्गत्वाभावात् वल्प्रत्ययापेक्षत्वरूपवहिरङ्गत्वे
तुनशब्दमाश्रित्येत्यादिभाष्यविरोधादिदूषणेनमूलेएवदूषितम्॥ नित्यत्वात्तुगुणात्पूर्वमूठ्गुणस्तुननित्यः उक्तरीत्यान
रङ्गत्वेनयणाबाधितत्वात्॥ यद्यपियस्यचलक्षणान्तरेणनिमित्तंविहन्यतेतदनित्यत्वस्यपाक्षिकत्वंप्रागुक्तंतथापिप्रयोगभे ४३
दनपाक्षिकत्वस्वीकारेणान्तरेणचक्षणान्तरेणनिमित्तंविहन्यतेतदन्यतेतदनित्यत्वस्यपाक्षिकत्वंप्रागुक्तंतथापिप्रयोगाभे
दनपाक्षिकत्वस्वीकारेणान्तरेणचलक्ष्यानुरोधेनानित्यत्वस्यैवस्वीकारान्नदोषः एतेनैतेननित्यत्वादगुणात्पूर्वमूठ्गुणस्तु

ऊठियणाबाधितत्वादनित्यइतिशेखरोक्तिः प्रत्युक्ता। लक्षणान्तरेणनिमित्त[illegible]घातेनित्यत्वाभाववैकल्पिकत्वस्यप्रागुक्तत्वादि
त्यपास्तम्। लक्ष्यानुरोधिनयापिप्रागभिधानेनपूर्वग्रन्थविरोधाच्च सञ्ज्ञिद्वारकपूर्वपरोपस्थितसञ्ज्ञान्तरङ्गवहिरङ्गभाव
स्यस्वीकारादेववृत्रहभ्यामित्यादिसञ्ज्ञाबोध्यसञ्ज्ञिसापेक्षतुगपेक्षयानलोपस्यपदसञ्ज्ञाबोध्यलक्ष्यस्थितसञ्ज्ञिसापेक्ष
त्वेपितस्यपूर्वोपस्थितत्वान्नवहिरङ्गासिद्धत्वेननिर्वाहइतितुग्ग्रहणमितिवक्ष्यमाणमूलग्रन्थसङ्गतिः अतएवचसंख्या
सञ्ज्ञाबोध्येननकारान्तसञ्ज्ञिसापेक्षषट्सञ्ज्ञापेक्षयापदसञ्ज्ञाबोध्यनकारान्तसञ्ज्ञिसापेक्षनलोपस्यवहिर्भूतसञ्ज्ञानि
मित्तकत्वाभावान्नवहिरङ्गासिद्धत्वमितिचवक्ष्यमाणमूलसङ्गतिः अतएवचत्वत्कृतमित्यादौविभक्तिसञ्ज्ञाबोध्यतृतीयैकव
चनमात्रसञ्ज्ञिसापेक्षत्वाद्यपेक्षयासमाससञ्ज्ञाप्रयोज्यप्रातिपदिकसञ्ज्ञाबोध्यतद्धितसमुदायरूपसञ्ज्ञिसापेक्षलुकोव
हिरङ्गस्यापिप्राबल्यबोधकभाष्येणनविरोधः नाप्यन्तरङ्गानपीतिन्यायोनल्यपः प्राबल्यप्रतिपादकभाष्येणविरोधः नन्वेवं
वाहऊठित्यत्रऊठ्ग्रहणस्याप्रकृतपरिभाषाज्ञापकत्वासङ्गतिः ज्ञापितायांपरिभाषायामङ्गस्यार्द्धधातुकेइत्यादिसञ्ज्ञाशब्दबो
ध्यलक्ष्यस्थितविप्रत्ययादिनिमित्तकगुणापेक्षयाभसञ्ज्ञाशब्दबोध्यलक्ष्यस्थितवाहरूपसञ्ज्ञिसम्प्रसारणस्यपूर्वस्थि
तनिमित्तकत्वेनसम्मतत्वेनवावहिरङ्गत्वाभावादसिद्धत्वाभावेनचारितार्थ्याभावादिति चेदेवन्तर्हि ज्ञापकपरभाष्य

प॰टी॰ प्रामाण्येन आश्रयत्वेनैव निरूपकतयापि संज्ञाबोध्योयस्तन्निमित्तकत्वस्यापि वहिरङ्गत्वप्रयोजकत्वस्वीकारात्। तादृशव
४४ हिर्भूतप्रसारादिप्रत्ययनिमित्तकत्वेन सम्प्रसारणस्य वहिरङ्गत्वादसिद्धत्वापत्त्या वूठ्ग्रहणस्य चारितार्थ्यात् अत एवैयादेशादे
रपरनिमित्तकत्वेनान्तरङ्गत्वाच्चेति मूले हेत्वन्तरोपन्यासः अत एवैङ्ह्रस्वादिति सूत्रे शेखरे हरे विष्णो इत्यादावङ्गाधिकारस्था
न्यरनिमित्तापेक्षत्वाद्गुणात्पूर्वं ह्रस्वान्तत्वेनैव सिद्धे रेङ्ग्रहणं व्यर्थमिति प्रश्नः प्राग्वर्णनं सङ्गच्छते अत एव चाभ्यासस्यास
वर्ण इति सूत्रे शेखरे उवोखेत्यादावङ्गसंज्ञासापेक्षोवङपेक्षयान्तरङ्गत्वात्सवर्णे दीर्घः स्यादित्याशंका संगच्छते अत एव ह्र
स्व इति सूत्रे शेखरे ऽभ्यासस्यावयवस्याच इति वैयधिकरण्येनान्वयस्येच्छाशब्दस्य द्वित्वे कृते ऽभ्याससंज्ञासापेक्षह्रस्वापे
क्षयान्तरङ्गत्वान्न किं भजन्जनस्यापि ह्रस्वसिद्धिः फलमुक्तम् अत एव च उस्य पदान्तान्नदीर्घो ऽकित इत्यादिसूत्रस्य शेखरा
ग्रन्थसङ्गतिः न चैवं कृति तुग्ग्रहणं व्यर्थं नलोपस्यापि पदसंज्ञानिरूपकभ्यांसापेक्षत्वेन वहिरङ्गत्वादनया ऽसिद्धत्वसिद्धे
रिति वाच्यम् राजेत्यादौ सुप्तिङ्भिसुवनस्यापि पदत्वात्पदत्वस्य सर्वथा निरूपकसापेक्षत्वाभावेन वहिरङ्गत्वाभावात् कृति
तुग्ग्रहणेन निरूपकतया संज्ञानिमित्तकत्वेन वहिरङ्गत्वस्य क्वाचित्कत्वबोधनाच्च तेन वत्वसंज्ञाबोध्यरेफनिमित्तकलोपापे ४४
क्षया संज्ञानिरूपकप्रत्ययसंज्ञाश्रयरूपसमुदितप्रत्ययापेक्षत्वेप्ययादेशादीनां न वहिरङ्गत्वप्रयुक्तासिद्धत्वमिति गुरवस्तु

वहिर्भूतप्रत्ययनिमित्तकसंज्ञाकृतं वहिरङ्गत्वं नाश्रीयत इति कृति तुग्ग्रहणेन। तेन तादृशाङ्गसंज्ञासापेक्षस्याप्ययादेशादेर्न
वहिरङ्गासिद्धत्वम् गुणस्य तादृशाङ्गसंज्ञानिमित्तकत्वेन वहिरङ्गत्वाभावेपि यस्य पूर्वोपिणः पूर्वोपस्थितनिमित्तत्वेन ततो ऽन्तरङ्ग
त्वाद्विप्रतिषेधसूत्रभाष्यप्रदर्शितस्योनद्वत्यत्र यणसिद्धिः यणि तदन्तविधौ तदादिविधौ च सति यावतः शब्दसमुदायत्वनिमित्त
त्वं तद्घटकोकाराघटितत्वेन तो गुणस्यान्तरङ्गत्वात् न शब्दमाश्रित्य यणादेशो न शब्दमाश्रित्य गुण इति भाष्यस्यापि नानुपप
त्तिः ऊढो ऽन्तरङ्गत्वप्रतिपादकः कैयटस्तु न युक्तः गुणस्यान्तरङ्गतादृशाङ्गसंज्ञानिमित्तकत्वेनं वहिरङ्गत्वाभावात् न च तदना
श्रयत्वेपि अङ्गसंज्ञाकृतान्तरङ्गत्वसत्त्वात्प्रदीपोपपत्तिरिति वाच्यम् वहूपेक्षत्वेन वहिरङ्गत्वस्य समाख्याविरुद्धत्वान्मूले एव दू
षितत्वाच्च पदुं न माश्रित्य यणादेशेन तु संज्ञादिरूपनिमित्तस्यापीति नव्योक्तिर्नयुक्ता तथा ग्रहणे मानाभावात् गुणो वाधक इ
त्यचान्तरङ्गत्वादिति हेतोर्भगवतो ऽनुपन्यासस्तत्त्वाख्येति तच्चिन्त्यम्। ऊनशब्दमाश्रित्य यणादेशो न शब्दमाश्रित्य गुण इति भाष्यो
क्तिस्वारस्येनान्तरङ्गत्वहेतोरेव प्रत्ययात्। यदप्येतद्भाष्यस्य समानवर्णसमुदायनिमित्तकत्वे तात्पर्यमिति तन्न अन्तरङ्गलक्षणत्वे
नाभिमतस्य यणादेशस्य वहिरङ्गलक्षणत्वेनाभिमतो गुणो वाधकः प्रसज्येतेति पूर्वभाष्यस्यैव परत्वेन गुणस्य यणवाधकताया उ
पपत्तेरूनशब्दमाश्रित्य यणादेशो न शब्दमाश्रित्य गुण इति तदुत्तरभाष्योक्तेरानर्थक्यप्रसङ्गात्। एतेन परत्वाद्गुणो वाधक इति

टी. कैयटोक्तमपास्तम्। यत्तु प्राथम्यात्तदेव वाधकमुचितमिति मूलमनूद्य दूषणाभिधानं प्रत्यासन्नशब्दरूपनिमित्तोदाहरणोपन्यास-
७५ मेण तथोक्तेरनुक्तोपलक्षकत्वादिति तन्न स्योनः स्यानरङ्गं चेति वार्त्तिकप्रथमोदाहरणत्वेन तथोपक्रमाभावादिति यत्किंचिदे-
तन्न न त्वेतन्मते ऊठ्ग्रहणस्य ज्ञापकत्वासङ्गतिः सम्प्रसारणस्य वहिर्भूतप्रत्ययनिमित्तकभसंज्ञासापेक्षत्वेनैव वहिरङ्गत्वादिति
चेन्न ज्ञापितायामपि परिभाषायामचरितार्थत्वेनोठ् परेनयावता विनानुपपत्तिरिति न्यायाद्वहिर्भूतप्रत्ययनिमित्तकसंज्ञाकृत
वहिरङ्गस्यापि कचिद्ग्रहणज्ञापनात्तेनोक्तशेखरादिविरोधेनेत्याहुः एवन्तु वहिर्भूतप्रत्ययनिमित्तकसंज्ञाकृतं वहिरङ्गत्वमप्याश्र-
यितुं शक्यमुक्तरीत्योठ्ग्रहणज्ञापकात् हतितुग्रहणस्य तु एतत्काचित्कत्वज्ञापनेन चारितार्थ्यसंभवात् ज्ञापकद्वयकल्प-
नि तूक्तरीत्यैव बोध्यानीत्यपि केचित् एवम्प्रकारेण मूलस्योपपत्तौ येन दूषयन्ति तान्प्रति किं वदाम इति संक्षेपः नाजानन्तर्ये वहिष्ट्व-
प्रक्लृप्तिः। येन नाप्राप्ते यो विधिरारभ्यते एतस्य बाधको भवति न लक्ष्यसिद्ध्युपयोगीति अत एवासंभवे एव बाधकत्वमिति वार्त्तिकमता-
नुसरणेन रामादित्यत्र जश्त्वं वावसाने इति चर्त्वमिति क्रमस्य दीक्षितैः कौमुद्यां प्रदर्शितत्वे सत्यपि सम्भवे बाधनमिति सिद्धान्तभूत-
भाष्यविरोधादसङ्गतत्वेन बाधित्वेति शेषपूरणेन जश्त्वं बाधित्वा चर्त्वमिति शेखरोक्तिस्सङ्गच्छते न च पूर्वत्रासिद्धमिति चर्त्वस्यासि- ७५
द्धत्वाज्जश्त्वे न भाव्यम् अपवादोऽवचनप्रामाण्यादिति भाष्यादपवादविषयेऽग्निमथ अग्निमत् भुतमुद इत्यादावि पूर्वत्रासिद्ध-

मित्यस्य बाधकत्वनयाऽसिद्धत्वाभावादिति तच्छिवदतिप्रतीके शब्दरत्ने स्पष्टम् न च पूर्वत्रासिद्धमिति प्रवर्त्य चर्त्वस्यैव बाधक-
त्वनयादीक्षितोक्तक्रमोपपत्तिरिति वाच्यम् गुणत्वन्याप्यकत्वेनेतिन्याये न साक्षाल्लक्ष्यसंस्कारत्वात् प्रधानस्य चर्त्वविधेर्बाधक-
त्वनायोगात् पूर्वत्रासिद्धमित्यस्य तु तत्र तत्र शास्त्रे स्वोपस्थित्या संस्कारकत्वेन गुणत्वाद्बाधकत्वनायुक्तेव नन्वेवं रत्नमुडित्यादौ
जश्त्वापवादत्वेन चत्वं प्रवृत्त्यानन्तरं तस्याद्भकारः स्यादिति दोष एवेति चेदत्राहुः गुणस्य फलविशेषवदुत्सर्गप्रवृत्तिसम्पादकत्वे
प्रधानस्यतूत्सर्गप्रवृत्त्यभावमात्रफलकत्वे गुणस्य प्रधानात्यावल्यम् अपवादो यद्यन्यत्र चरितार्थ इति न्यायादिति सदस्थिमाभ-
लायां स्पष्टम्। यथा रत्नमुडित्यादौ पूर्वत्रासिद्धमिति गुणशास्त्रप्रवृत्त्या चत्वस्यासिद्धत्वान्डकारस्य डकारः। आदावपवादत्वेन च-
त्वं प्रवृत्तौ तु पकारस्य पकार एवेति रामादित्यादौ तु पञ्चम्यादेशस्य दकारान्तत्वाद्विपरीतमित्यसिद्धत्वबाधाच्चर्त्वस्यैव प्रवृत्तिरि-
ति दूनादेशप्रत्याख्यानपरभाष्यकैयटयोरपि दकारान्त एव पाठ इति न तत्र विप्रतिपत्तव्यम्। क्रुधेर्धस्येति प्रतीकस्थशब्दरत्नो-
क्तिस्तु पूर्वत्रासिद्धीये इति परिभाषाप्रवृत्त्यप्रवृत्त्योर्विशेषाभावदेव चर्त्वे प्रवृत्त्यप्रवृत्त्योर्विशेषाभावेन चर्त्वाप्रवृत्त्याऽनयेति ननता-
द्विरोध इति दिक्॥ एतेन रामादिति प्रतीके शेखरं दूषयन्कश्चिन्नानुमन्तव्यः अनवकाशत्वादेव बाधकत्वमिति संज्ञानामपि भ-
यसदीनामाकडारीयाणमाकडारादेका संज्ञेति वचनान्निरवकाशत्वादिनाभवन्त्येव बाध्यबाधकभावः। तदन्यासां तु कृत्कृत्यप्रत्य-

प.टी यसञ्ज्ञानांव्याप्यव्यापकभावापन्नानांविभिन्नफलकत्वाद्विरोधाभावाच्चसमावेशएव आकडारीयाणामपिसञ्ज्ञानावसानस
४६ ञ्ज्ञानांसमावेशएवविसर्जनीयस्यसइतिसूत्रभाष्यप्रामाण्यात्॥ अतएवपरस्सन्निकर्षइतिसूत्रेसन्निकर्षश्चप्रायःपरेण
क्वचित्पूर्वेणापि अवसानकार्य्याणांसंहिताधिकारेपाठात्। अवसानसञ्ज्ञयापरत्वात्सावकाशयासंहितासञ्ज्ञाबाधः सत्यपिस
म्भवेबाधनंभवतीतिन्यायेनविषयभेदेपिबाधः स्यादितितदसङ्गतिरेवेत्याशङ्क्यसंहिताधिकारेऽवसानसञ्ज्ञाकार्य्याणांपाठेना
करसूत्रस्यस्वशास्त्रीयसञ्ज्ञामात्रविषयकत्वकल्पनात्संहितावसानयोर्लोकविदितत्वादितिवार्त्तिकान्तयोर्लौकिकत्वादितिशेखरे
उक्तम्। यत्तु तत्रान्तेऽर्द्धे अइत्येवभाष्यकृतामनुत्पादितस्यसम्बोधनेअस्यस्त्रीरेइत्यादौस्त्रियाश्चद्वितीयवर्णसन्निधानेसन्निकर्षाभा
वात्संहितासञ्ज्ञायाअविषयेऽवसानसञ्ज्ञायास्तत्कार्य्यस्याणोप्रगृह्यस्येत्यनुनासिकस्यह्रस्वइत्यत्रचार्द्धमात्राधिककालव्यवधा
नेनरेफोच्चारणेसंहितासञ्ज्ञायाअभावादवसानसञ्ज्ञायास्तत्कार्य्यस्यविसर्गस्यचसंभवात्सत्यपिसंभवेबाधनंभवतीतिन्यायोप
ष्टम्भेनबाधकत्वोक्तेरयुक्तत्वादितितच्चिन्त्यम्। विसर्जनीयस्यसइतिसूत्रभाष्यप्रामाण्येनानवसानकार्य्यविषयेपूर्वसन्निकर्षरूप
संहितायाःस्वीकारेणोक्तलक्ष्ययोःसंहिताधिकारस्यानुनासिकाभावावसानसञ्ज्ञाफलस्यदुर्निरूप्यत्वात्। नचतत्रतेषांपाठेपितेषु ४६
तरसंबन्धोऽग्रेचमण्डूकप्लुत्यासम्बन्धइतिवाच्यम्। नियतावधिपरिच्छिन्नेष्वधिकारेषुमण्डूकप्लुतेरभावात्तदीयत्वेनोन्यायेनतेषामधि

कारादितिस्पष्टमुद्योते। एतेनतत्रपाठस्यसत्वेप्यवसानकार्य्येयोगित्वात्तदसम्बन्धादग्रेचमण्डूकानुवृत्त्यादोषाभावस्यवक्तुंशक्यत्वादि
त्यपास्तम्। ह्रस्वइत्यत्रार्द्धमात्रिककालव्यवायस्यावग्रहकृतस्यपदान्तेएवावग्रहइतिनियमेनरेफात्पूर्वमसंभवादालस्यादिकृतस्यतु
साधुत्वप्रयोजकत्वेनतत्रशास्त्रप्रवृत्तेरभावात्पूर्वेणसन्निकर्षमादायसंहितायाःसत्वेनावसानकार्य्यस्यविसर्गस्यनिष्प्रत्यूहत्वा
च्च। यदपिपरत्वाद्बाधइतिपरमवशिष्यतेतदपिवर्णान्तरोच्चारणेसर्वत्रविरामसद्भावाद्व्यापिकामवसानसञ्ज्ञांवर्णान्तरानुच्चार
णेसावकाशामनवकाशसंहितासञ्ज्ञाबाधते इतिसंहितासञ्ज्ञासूत्रेवदताभाष्यकृतैवसमाहितम्। एतेनसंहिताधिकारेऽव
सानकार्य्याणांपाठसामर्थ्यात्तयोःसमावेशोक्तिःप्रत्युक्तेतितदपिचिन्त्यम्। ह्रस्वइत्यादौपरवर्णानुच्चारणेपरेणसंहितायाअभा
वेपिआष्टमिकभाष्योक्तरीत्यापूर्वेणतस्याःसद्भावाभ्युपगमात्संहितासञ्ज्ञायाअनवकाशत्वाभावेनैतद्भाष्यस्यैकदेश्युक्तत्वात्।
अतएवतत्रैवतर्हिअनवकाशसंहितासञ्ज्ञाऽवसानसञ्ज्ञांबाधिष्यतेइतिलृङन्तंप्रौढत्वसूचकमुक्तमतएवचाथवेत्यादिना
पक्षान्तरमुक्तंतन्नएतेनपूर्वोक्तभाष्यरीत्याह्रस्वइत्यत्राप्यवसानसञ्ज्ञायाःसंहितासञ्ज्ञयाबाधप्रसङ्गात्खरवसानयोरितिविसर्गाप्र
सङ्गात्। अतएवैतद्भाष्यव्याख्यानावसरेह्रस्वइत्यत्रावसानसञ्ज्ञायाःसावकाशत्वमुक्तंप्रदीपकृतेत्यपास्तम्। परस्सन्निकर्षइतिसूत्र
भाष्यस्यैकदेश्युक्तत्वात्। ह्रस्वइत्यादौविसर्गसिद्धयेत्वयाप्येतद्भाष्यस्यैकदेश्युक्ततयाअवश्यंवक्तव्यत्वाच्चेत्यन्यत्रविस्तरःअप

प॰शे॰ वादृशास्त्रस्य निषेधस्यत्वेन तु सर्वथाविरोधान्निषेधविषये विधेरप्रवृत्तिः ब्राह्मणा भोज्यन्तां न कौण्डिन्य इत्यत्रयथा तेन हलन्त्यमि
४७ त्यादिनविभक्तावित्यादिविषयेन कदापि प्रवृत्तिरिति हलन्त्यमिति शेखरे स्पष्टम् यत्तु गवाकृशब्दे स्वमोर्लुकालुप्तत्वान्नन्त्यलक्षण
भावान्नुम्नेति शेखरोक्तेराशयेन तदनुगामिनः प्रष्टव्याः सु ङ नपुंसकस्येति निषेधविषये सर्वनामस्थानसञ्ज्ञाविधेर्विरोधात्प्राप्तेरेव
नुमोप्यभावादिति तच्चिन्त्यम् उपायस्योपायान्तरादूषकत्वात् स्वमोः स्थितौ हि सर्वनामस्थानत्वाभावादिति हेतोः समुचितत्वेपि लु
कि सति कुड्यं चित्रमिति न्यायेन प्रथमकल्पिकस्य तत्परत्वाभावादिति हेतौरेव समुचितत्वाच्चेति दिक् कांचनीत्यादाविति ननु शेष
इत्यस्याधिकारत्वात्तेनाणो विधानानुपपत्तिरिति चेन्न तस्य विधायकत्वाभावात् अपि मनोरमाशेखरादावुक्तत्वात् न च वृद्धत्वाच्छोऽणं
बाधित्वा स्यादिति वाच्यम् राष्ट्रावारपाराद्धखावित्यारभ्य विहितानां घादीनां तत्र जातइत्याद्यर्थेषु विधानेन स्वविषये तत्प्रमाणबा
धकत्वेपि तस्मात्कृपठितग्रैवे इति सूत्रविहितत्वाबाधकत्वाभावात् वृद्धाच्छे त्यस्य घाद्यन्तर्गतत्वात् तत्र जात इत्याद्यर्थेनि दृशप्रकरणपठि
तस्य तस्येदमित्यस्यतु तत्प्राप्तिर्येन तद्धितालो वृद्धाच्छो बाधकः प्रसज्येत कांचनकरणकनिर्म्माणविषयत्वार्थस्य विवक्षितत्वेन स
म्बन्धार्थविधायकस्य तस्येदमित्यस्याप्राप्तेः अत एव गर्गेण निर्मितो गार्ग्यं इत्येव गर्गाणामयं कांचनस्येयमिति विवक्षायां तु तस्येद राम
मित्यणं बाधित्वा वृद्धाच्छो भवत्येवेति गदायां स्पष्टम् एतेनात्र नव्यमताः कांचनेन निर्मितेत्यर्थे शैषिकेऽणि न कुत्रापि दोष इति त ४७

त्रेदं वक्तव्यं किं शैषिकोऽणा तस्येदमित्यनेन नविवक्षितनिर्माणस्येदमर्थव्याप्यत्वात् उत शेष इत्यस्य स्वतन्त्रविधायकत्वेनाप्यङ्गीकारात्तेने
ति नाद्यः वृद्धाच्छ इत्यनेन बाधादिति भास्करेणैव दूषितत्वात् अत एव न द्वितीयः शेष इत्यस्य प्रत्याख्यानाच्चाधिकारत्वे प्रयोजनानां ज्ञाप
केरन्यथासिद्धेर्भाष्ये प्रदर्शितत्वात् स्वतन्त्रविधायकत्वे प्रयोजनानानुचाक्षुषं रूपमित्यादीनां तस्येदमित्यनेन सिद्धेः कैय्यटोपाध्यायैरु
क्तत्वादित्यपास्तम् चक्षुषा गृह्यमाणरूपादेः चक्षुःसम्बन्धित्वेन विवक्षायां तस्येदमिति सिद्धावपि तत्करणकग्रहणकर्मकत्वविवक्षायां
तेनासिद्धेश्च गर्गेण निर्मितो गार्ग्यो रथ इत्यत्र गतेश्च अत एव ज्ञापकादानुमानिकवचनकल्पनेन सिद्धस्य वचनस्य प्रत्याख्यानं न सु
त्वित्यभिसन्धायाधिकारत्वमस्तु लक्षणत्वन्तु नातीवोपयुज्यत इत्यतीव यद्घटितं मिश्रैरुक्तं दीक्षितैरपि शैषिकान्मतुवर्थीयादित्य
स्य विषयलाभार्थत्वमधिकारस्य व्यवस्थाप्यैवं स्थिते विधायकत्वमपि तस्य सुवचनमिति नातीव निर्भरः कार्य्य इति मनोरमायामुक्त
म् यत्तु काञ्चनीत्यादि सिध्यर्थे विधायकत्वस्यावश्यं वक्तव्यतया तद्वैयर्थ्यापत्तिरप्रामाणिकी अत एव भाष्येऽधिकारत्वस्यैव ज्ञाप
काश्रयणादाक्षेपः कृत इत्याशंक्य भानुः पितायस्येत्यर्थे भानव इत्यस्य शेष इत्यणैव सिद्धे तस्येदमित्यपत्येपि बाधनार्थं कृतं
भवेत् उत्सर्गः शेष एव वा सौ वृद्धान्यस्य प्रयोजनमिति वार्तिककृदुक्तस्य तस्यापत्यमिति योगविभागप्रयोजनस्यासङ्गतिप्रसङ्गा
दिति समादधुस्तच्चिन्त्यम् कृतेपि योगविभागेऽपत्यत्वपुरस्कारेणैव तस्यापत्यमित्यणो विधानाद्भानुः पिताऽस्येत्यर्थे भानव इत्यणसि

प॰टी॰ इष्येशेष इत्यस्याणविधायकत्वावश्यकत्वात्। तस्येदमित्यपत्येपीति वार्त्तिकशेष इतिसूत्रस्थभाष्यं च प्राग्दीवोधकृत्तविशेषा
४८ नादरेण प्रवृत्तमिति भानोरपत्यं भानव इत्यादौ अपत्यत्वेन बोधार्थं योगविभागस्य सार्थक्यात्। यदप्यत्रोच्यते मयड्वैतयोरित्ये
वसिद्धे नित्यं वृद्धशरादिभ्य इत्यत्रारम्भसामर्थ्यान्नित्यग्रहणस्य शरादिभ्य इत्यनेनैवान्वयाङ्गीकारात् क्वचिद्वृद्धेभ्यो मयड्प्रवृत्त्या
काञ्चनीत्यस्य साधनीयत्वात् इति तदपि चिन्त्यम्। आरम्भसामर्थ्यादेवास्य नित्यत्वे सिद्धे नित्यग्रहणं क्वचिदन्यत्रापि नित्यविधा
नार्थमिति एकाचो नित्यं त्वङ्मयं वाङ्मयमित्यस्य सिद्धिरिति शेखरे एवाभिधानात्। न चैवं शरादिषु मृच्छब्दपाठो व्यर्थ इति वाच्यम्
तस्य तदनित्यत्वबोधनार्थत्वात्। तेन त्वचो रोग इत्यादावौत्सर्गिकाणसिद्धिरिति नडिःसमुद्धेभ्योरिति सूत्रे शेखरे एव स्पष्टम्। एतेन नि
त्यग्रहणं वृद्धशरादिभ्योऽन्यत्रापि क्वचिन्नित्यार्थं तेन त्वङ्मयमित्येकाचो नित्यं मयडिति प्राप्तं च लत्वशरादिषु मृच्छब्दपाठस्य वै
यर्थ्यप्रसङ्गादित्यपास्तम्। काञ्चनीत्यत्र मयड्भावस्तु शेष इत्यस्याण्विधित्वादेव सिद्ध इति बोध्यम्॥ केचित्तु काञ्चनीत्यादौ काञ्च
नस्येयमिति विग्रहेपि वृद्धाच्छ इत्यपवादविषये तस्येदमित्यौत्सर्गिकोऽण् कर्तृकर्मणोः कृतीत्यत्र कृद्ग्रहणात् क्वचिदपवादविषये
प्युत्सर्गप्रवृत्तेः स्वीकारात्॥ अन्यथा कृतपूर्वी कटमित्यत्र न लोकेति निषेधात् षष्ठ्यभावे सिद्धे कृतीत्यस्य वैयर्थ्यापातात्। तेन ददैहे
षसमाधाम्योधायैरामोदसत्तममिति भट्टिप्रयोगे पवादषष्ठीविषये द्वितीयासिद्धिरित्याहुस्तन्न कर्तव्यपूर्वी कटमित्यपवादविषये
षष्ठीवारणेन कृद्ग्रहणस्योपक्षीणत्वात्। कृतेनापि यथाश्रुतार्थकेन कृद्ग्रहणेन षष्ठ्या वारणाच्च उक्तम्। ॥

व्योदाहरणात् कृद्ग्रहणस्य सामर्थ्याच्च कृदन्तशक्तिग्रहसहकारेणोपस्थितक्रियाकर्तृकर्मणोः षष्ठी न तद्धितान्तशक्तिग्रहमात्रप्र
योज्योपस्थितिविषयक्रियाकर्तृकर्मणोरिति शेखरोक्तार्थकल्पनेन षष्ठीवारणेऽनु न लोकेत्यत्रापि लादिसाहचर्येण निष्ठांशे निष्ठा
शक्तिज्ञानसहकारेणोपस्थितक्रियान्वयिनोः कर्तृकर्मणोरित्यर्थस्वीकारेण निषेधस्याप्यसत्त्वात्। न्यायकस्य शैथिल्यात् कृतपूर्वी
त्यत्र कर्मणोः विवक्षाया अभावकाले तस्येदमिति मात्रविषयतायाः भाष्यसंमतत्वेन तस्य केवलस्य क्वाप्यप्रयोगेण कृदन्तशक्तिग्रहसं
भवेन तद्धितान्तसमुदायशक्तेरेव क्रियोपस्थापकत्वात् तण्डुलानां पाचकतर इत्यादौ तु पाचकादेः पृथक् प्रयोगात् तच्छक्तिग्रह
स्यापि सत्त्वेन कृदन्तशक्तिग्रहसहकारेणोपस्थितक्रियाकर्मत्वसत्त्वात् षष्ठ्युपपत्तिरिति शेखरे एव स्पष्टम्। न चैवं प्राज्ञो व्याकरणे
मिति मनोरमोक्तप्रयोगानुपपत्तिः प्रज्ञाशब्दस्य भावाऽनस्य पृथक्प्रयोगसत्त्वेन कृदन्तशक्तिग्रहप्रयोज्योपस्थितक्रियाकर्म
त्वसत्त्वात् तण्डुलानां पाचकतर इत्यादाविव षष्ठीप्राप्तेरिति वाच्यम्। प्राज्ञो व्याकरणे स्यान्येवेष्टत्वात् इति प्रज्ञाश्रद्धेति सूत्रे शब्दर
त्ने स्पष्टम्। एतेन निष्ठायोगे न लोकेति निषेधविषयत्वेन भाष्योदाहरणस्य स्वार्थे तात्पर्याभावात् तद्बले नार्थविशेषकल्पनेऽप्रमाण
भावात् न च न लोकेत्यत्र कृद्ग्रहणानुवृत्त्या कृन्निष्ठाप्रयोज्योपस्थितक्रियाकर्तृकर्मणोरेव निषेधात् कृतेतरविषयत्वमिति
वाच्यम्। तथा स्वयमव्याख्यातत्वात् फलाभावाच्च तण्डुलानां पाचकतर इति वृत्तौ समुदायस्यैवार्थवत्त्वात् कृदन्तशक्तिग्रहप्रयोज्यो

प॰टी॰ पस्थितिविषयत्वस्य क्रियायामभावात् षष्ठीप्रवृत्तेर्व्युत्क्रमशक्यत्वाच्च प्राज्ञो व्याकरणमित्यादाविव तण्डुलानां पाचक इत्यादिद्विती
४६ ययैव भवितुं युक्तत्वादित्यपास्तम् उक्तरीत्या निषेधविषयत्वेन कृतपूर्वीति भाष्योदाहरणस्य स्वार्थतात्पर्यसंभवात् कैयटादि
भिस्तथैव वर्णितत्वाद् उपलक्षणत्वे मानाभावात् सिद्धान्तमञ्जूषोद्योतयोः परमगुरुचरणैर्व्याख्यातत्वाच्च कटं कृतवानित्यत्र इत्यादौ
निषेधप्रवृत्तेरेवफलत्वाच्च यथाश्रुतार्थकत्वे तु निषेधाप्राप्त्या कर्तृकर्मणोरिति षष्ठ्यापत्तेः तस्य प्रत्ययस्य द्योतकत्वेन पक्षद्वये
यिक्तद् इत्यत्र शक्तिग्रहप्रयोज्योपस्थितक्रियाकर्मत्वस्य सत्त्वाच्च प्राज्ञो व्याकरणस्येति षष्ठीप्रयोगस्येष्टत्वेन दृष्टान्तासिद्धेश्च कृतो यक
र्तृकर्मणी तत्र यथा स्यात् तद्धितस्य ये कर्तृकर्मणी तत्र मा भूदिति कृद्ग्रहणप्रयोजनपरभाष्यस्वरसात् तण्डुलानां पाचकतरः प्राज्ञो व्या
करणस्येति षष्ठीघटितप्रयोगस्यैवेष्टत्वलाभाच्च अन्यथा तद्धिताधिक्ये मा भूदित्येव वदेत् एतेन तद्धिताधिक्ये कर्तृकर्मणी तत्र
मा भूदित्याकरे तद्व्याख्यानमित्यपास्तम् कैयटाद्याकारानुपलम्भात् भाष्यस्वरसविरोधाच्च उक्तभाष्यस्य निरुक्तार्थकत्वादेव तण्डु
लानां पाचकतर इत्यादाविव तण्डुलानां पाचकपुत्र ओदनस्य पक्तृपुत्र इति समासवृत्तौ षष्ठी भवत्येव कृदन्तशक्तिग्रहसहका
रणोपस्थितक्रियाकर्मत्वसत्त्वादित्युद्योते स्पष्टम् एतेनात्र तद्धिते इति वृत्तिमात्रोपलक्षणं तेनौदनस्य पक्तृपुत्र इति समासवृत्तौ न ४६
षष्ठीति बोध्यमित्यपास्तम् ओदनं पाकीयति ओदनं प्रश्रयतीति तुमाणवकं मुण्डयति व्याकरणं सूत्रयतीति वत्करोतिक्रियाकर्म

त्वमादायसम्बन्धेति सुप आत्मनः क्यच् हेतुमति चेति सूत्रयोर्भाष्ये स्पष्टम् भट्टाचार्यस्तु व्युत्पत्तिवादे ओदनस्य पाकीयति प्रयोगे इष्टा
पत्तिं कुर्वन्तो मान्याएव धात्वर्थे रामो रघुत्तममिति त्वदुक्तफलस्य यथासिद्धिस्तथा कर्तृकर्मणोरिति सूत्रे शेखरे स्पष्टम्। एतेन धेट्धा
तोः शत्रन्ययान्तात्स्वार्थिके ण्यन्ताद्धात्वैरिति प्रयोगं साधयन्त उपेक्ष्याः वृत्तिद्वयकल्पनापत्तेर्विधायकाभावाच्च। यत्तु वस्तुतस्तु कृतपू
र्वी कटमित्यत्र कर्मसामान्ये प्रत्यये पूर्वशब्देन समासे इनौ च कृते पश्चात्कर्मविशेषाकाङ्क्षायां कटस्य कृतस्य विशेषणयोगेनेति
निषेधात्सामानाधिकरण्येन कृतपदार्थेन योगाभावेपि क्रियाकारकयोर्नित्यसाकाङ्क्षत्वाच्छब्दैः शान्तितपत्र इत्यादाविव धात्व
र्थक्रियायां कर्मत्वेन योग इति भावः क्तान्तस्याविवक्षितकर्मत्वस्य कटेऽभावेपि कर्मसामान्यप्रथमान्तस्य शक्यं च क्षुरुपहन्तुमित्या
दौ केवलस्यापि प्रयोगदर्शनात्तथाभूतक्तान्तस्य तथाप्रयोगात् द्योपस्थितिविषयक्रियानिरूपितकर्मत्वस्य कटे सत्त्वात्त्वदुक्तकल्प
नायामपि श्रमितसिद्धेरलाभाद् इति तच्चिन्त्यम् विशेषातिरिक्तसामान्यसंज्ञाविभागाभावात् सधात्वर्थफलाश्रयः क्तेनाभिहि
तविशेषजिज्ञासाकाले तदर्थफलेऽन्वितस्य कटस्यानभिहितत्वायाव्युत्क्रमशक्यत्वेन द्वितीयाषष्ठ्योरप्राप्तेश्चेत्तु द्योते स्पष्टम् कर्म
सामान्येऽभिहिते क्रियायाः स्वोत्तरप्रत्ययानभिहितकारकांशे शब्दैः शान्तितपत्र इत्यादाविव साकाङ्क्षत्वेपि स्वोत्तरप्रत्ययाभिहि
तकारकांशे निराकाङ्क्षत्वेन विशेषकर्मणः क्रियाकारकभावेन क्रियायामनन्वयाच्च सामान्यस्य परं सामानाधिकरण्येन वि

विशेषजिज्ञासात्वस्यैवेत्यन्यत्। अत एव कैयटेन भावे वाक्तउत्पद्यत इति पक्षान्तरमुक्तम् योऽसौ कृतकटयोरभिसम्बन्धः स उत्पन्ने
प्रत्यये इनोपश्चादभिनिवर्त्तते ऽस्ति च करोतेः कटेन सामर्थ्यमिति कृत्वा द्वितीयामविध्यतीति भाष्यस्य कृतः पूर्वकटोऽनेनेति वाक्य
इष्टस्तयोः सामानाधिकरण्यलक्षणः सम्बन्ध उत्पन्ने प्रत्यये इनोपश्चादभिनिवर्त्तते बुध्यारूढो भवति पूर्वभावविषयक्तप्रत्य
न कृतिसत्त्वात्तत्र तद्धितार्थे दर्शनात्ते नैकार्थीभूतस्य कटेन सम्बन्धाभाव एव पश्चात्तदभिनिर्वृत्तावेव करोतेः कटेन सामर्थ्यमित्यर्थः
नदपि भावे क्तप्रत्ययवादिमते एव निर्वहति कर्मसामान्ये क्तप्रत्ययवादिन स्वमते तु क्तनस्य कटेन सामर्थ्यमिति वक्तुं युक्तं स्यात् ते
दमुभयं युगपद्भवति वाक्यं च प्रत्ययश्च यदा वाक्यं न तदा प्रत्ययः यदा प्रत्ययः सामान्येन तदा वृत्तिस्तत्र विशेषार्थिना विशेषोऽनुप्रयो
क्तव्यः कृतपूर्वी कटमिति भाष्ये सामान्येनेत्यस्याविवक्षितकर्मतया धात्वर्थमात्रवृत्तिनाभावक्तान्तेनेत्यर्थो विशेषार्थिनेत्यस्य कर्म
विशेषजिज्ञासाभिर्व केवलवनेत्यर्थ इत्युद्योते शेखरे च स्पष्टम्। सामान्येन वृत्तिरित्यस्य कर्मसामान्येन विवक्षायां वृत्तिरित्यर्थवादि
नान्तु अनभिहिते कर्मणि द्वितीयेत्यादौ विशेषपदानुपादानात्कर्मत्वेन कर्मसामान्याभिधानाच्छक्यं च सुदुपहनुमित्यादावि वद्विती
यानापत्तिर्हैवेति बोध्यम्। अत एव हरिः विशेषकर्मसम्बन्धे निर्मुक्तेपि कृतादिभिः विशेषनिरपेक्षोऽन्यः कृतशब्दः प्रवर्त्तते अकर्म
कत्वे सत्येव क्तान्तो भावाभिधायिनि ततः क्रियावताकर्त्रा योगो भवति कर्मणामिति कृतः कटोऽनेनेति वाक्यावस्थायां कृताद्विन्तेन ५०

कटादिरूपविशेषकर्मसम्बन्धेऽनुभूतेपि तस्यामवस्थायाम सामर्थ्येन वृत्तिविरहाद्विशेषनिरपेक्षोभाववचनोऽन्य एव कृतशब्दः
प्रवर्त्तते इति लभ्यते तदेवोपपादयन्नाह अकर्मकत्वे इति एवं विशेषनिरपेक्षत्वेपि सामान्यापेक्षत्वमस्त्येवेति वाच्यम् विशेषरहि
तसामान्यस्याभावादिति इतोतरत्वात्। यत्त्वकर्मकत्व इति सत्त्वे वा इति पाठं हे रौ अभिधायाकर्मकत्वसत्त्वेवेत्यादिनाऽविवक्षि
तकर्मत्वाद्भावे क्त इति पक्षान्तरमुक्तं हरिणा तदभ्युच्चयमात्रम्। अविवक्षितकर्मत्वेनाकर्मकत्वस्य धातुमात्रे सत्त्वात्। काला
दिकर्मणा तु सर्वेषामपि सकर्मकत्वाच्छास्त्रेऽकर्मकपदेन सामर्थ्यात्कालादिभिन्नं कर्म येषां न संभवति तेषामेव ग्रहणस्य
न्याय्यत्वात्। अन्यथा घटं क्रियते देवदत्तेन घटः कृतमित्याद्यपि प्रसज्येतेति तच्चिन्त्यम्। कैयटे तथापाठस्याभावात्पक्षान्तरत्वाभा
वात्कालादिभिन्नं कर्म येषान्न विवक्षितन्तेषामकर्मकपदेन ग्रहणस्येष्टत्वाच्च उक्तरीत्या भाष्यप्रामाण्येऽचोक्तोदाहरणे एवस्वीकारात्त्व
दुक्तातिप्रसङ्गस्याभावाच्च ततः क्रियावताकर्त्रेति हरिस्वारस्येन क्तस्याभावाभिधायकत्वलाभाच्च कर्मान्वययोग्यधात्वर्थाविवक्षा
याऽकर्मकत्वमभिप्रेत्यैव रोरव्याविति सूत्रे प्रदीपे कैयटेन लुनातेर्निवृत्तप्रेषणास्ति चिला वयति केदारं देवदत्त इति प्रयोगेग
ति बुद्धौ त्वनेन कर्मत्वमित्युक्तम्। यत्तु तत्रार्थान्तरवृत्तित्वेन धातोरकर्मकत्वमकर्मकपदे धातोरन्यपदार्थत्वाद्र्थभेदाच्छब्द
भेद इस्याविवक्षितत्वात्त्वविवक्षितकर्मत्वादिनि तच्चिन्त्यम्। एतादृशविषयेपि धातोरर्थान्तरवृत्तित्वेनाकर्मत्वेऽभियुक्तोक्ता

प॰टी न्नपि पक्षान्तर इत्यस्यैव पर्यापत्तेः तस्माद्धातोरर्थान्तरे वृत्तेरित्यस्य सर्वथा फलव्यापारयोस्त्यागेन दीसन्नत इत्यर्थकं नदीव
५२ हतीत्यादेवोदाहरणमिति मञ्जूषायां स्पष्टम् अत एव कर्मणः शेषत्वेन विवक्षायामविवक्षायामविवक्षितकर्मत्वेनाकर्म
कत्वाद्भावे लादयोऽधीगर्थेति सूत्रे भाष्यकैयटयोरुक्ताः न ह्याहि कर्मादिष्वकर्मवद्भावो वक्तव्यः किम्प्रयोजनमकर्मकाणां भा
वे लो भवतीति भावे लो यथा स्यान्मातुस्स्मर्य्यते पितुः स्मर्य्यत इति अर्थवत्करणं किमर्थं स्वाश्रयमपि यथा स्यान्मातास्मर्य्यते
पितास्मर्य्यते कर्माभिधाने हि लिङ्गवचनानुपपत्तिस्स्यात् मातुः स्मृतं मात्रोः स्मृतं मातॄणां स्मृतमिति मातुर्यल्लिङ्गवचनं च तत्
त्स्मृतशब्दस्यापि प्राप्नोति षष्ठी च प्रसज्येत कुर्वतो मातृशब्दात् स्मृतशब्देनाभिहितकर्मेति कृत्वा षष्ठी न प्राप्नोति नतर्हि वक्त
व्यमविवक्षिते कर्मणि षष्ठी भवति किं वक्तव्यमेतत् न हि कथमनुच्यमानं गंस्यते शेषे इति वर्त्तते कश्च शेषः कर्मादीनामविवक्षा
शेष इति यद्यप्युपसं[हा]रभाष्यात्कर्मप्रत्ययेनाभिहितत्वान्मातृशब्दादप्राप्तायाः षष्ठ्याः प्रापणार्थमेवकृतस्याकर्मकवद्वचन।
स्याविवक्षितकर्मत्वेन प्रत्याख्यानं लभ्यते तथापि मातुः स्मर्य्यते मातुः स्मृतमित्युपक्रमोक्तभावलादिसिद्धये भगवतोपायस्या
नुक्तत्वाद्धातोरर्थान्तरवृत्तित्वेनाकर्मकतायास्त्वदुक्तायाः कर्मत्वानुपपत्त्याऽसंभवाच्चाकर्मकवद्वचनस्यावश्यकत्वेन प्रत्याख्या
नासङ्गत्याऽविवक्षितकर्मत्वस्यावश्यकत्वमिति भाष्यतात्पर्यात् एतेन यत्तु कर्मणः शेषत्वविवक्षायामविवक्षितकर्मत्वादक ५५

र्मकत्वेन भावे लकारो भाष्ये उदाहृत इति शेखरशब्दरत्नयोरुक्तम् तन्न तन्नर्हि वक्तव्यं न वक्तव्यमविवक्षिते कर्मणि षष्ठी भव
ति किं वक्तव्यमेतत् न हि कथमनुच्यमानं गंस्यते शेषे इति वर्त्तते कश्च शेषः कर्मादीनामविवक्षा शेष इत्युपसंहारभाष्यात्कर्मप्र
त्ययेनाभिहितत्वान्मातृशब्दादप्राप्तायाः षष्ठ्याः प्रापणार्थं कृतस्य वचनान्तरस्यैवाविवक्षितकर्मत्वेन प्रत्याख्यानलाभादित्यप्र
त्युक्तम्। यत्तु वस्तुतो भाष्ये ऽकर्मकवद्भावो वक्तव्यः किम्प्रयोजनमकर्मकाणां भावे लो भवतीति भावे लो यथा स्यादित्यत्राकर्मकाणां
भावे लो यथा धर्म्यनभिधायकस्तथा सकर्मकाणामधीगर्थादीनां कर्मणि लो धर्म्यभिधानेपि तदनभिधानप्रयुक्तकार्य्यभाग्भ
वतीत्यर्थो न तु भावबोधको भवतीत्यपीति तच्चिन्त्यम् तथात्वे हि सकर्मकाणां कर्मणि लोऽकर्मकाणां भावे लवद्भवतीति भगवान्ब्रू
यात्। अधीगर्थादीन्सकर्मकानुद्दिश्याकर्मवद्भावविधानेनाकर्मकत्वप्रयुक्तभावलकारादेरेव विधेयतया वार्त्तिकात्प्रतीतेः भगवता
पि भावे लो यथा स्यादिति वदताऽविधेयतया भावल एवाभिहितः किञ्चाधीगर्थेति सूत्रेऽनभिहिताधिकारादनभिहिते कर्मणि शेष
त्वेन विवक्षिते इत्यर्थात्कर्मसामान्ये क्ते मातृशब्दाच्छेषत्वविवक्षायामपि षष्ठ्यनापत्तिः भावविशेष्यकबोधानापत्तिश्च एतेन
कर्मविशेषस्य मात्रादेः शेषत्वविवक्षायां कर्मसामान्यक्तान्तस्य लिङ्गसर्वनामनपुंसकैकवचने च मातुः स्मृतं मात्रोः स्मृतमित्यादि
सिद्धिरित्यपास्तम् अविशेषानतिरिक्तसामान्यसद्भावेमानाभावाच्चेति संक्षेपः प्रतिपदोक्तमपि निरवकाशत्वे सत्येवेपि यथा रमाया

मित्यादौ ङे-रामायाद्बो बाधः पाटिहृतेयाउविशिष्टस्य निर्दिश्यमानत्वाभावात्॥ निर्दिश्यमानस्य ङेर्याडाद्यवधानान्ङे-रामोः श्रामे
निरवकाशत्वात् सप्तम्येकवचनरूपङि-विशेषमुद्दिश्याम्विधानेन प्रतिपदोक्तत्वाच्च। निरवकाशत्वेन बाधकप्रवृत्त्युत्तरमुत्सर्ग
प्रवृत्तेः पश्चाद्याडूपसिद्धिरिति शेखरे स्पष्टम्। येतु मनोरमाकारादयः टाबृचीत्यस्य प्रतिपदोक्तत्वात्पादोन्यतरस्यामिति ङीब्बाधक
त्वं वदन्ति तेतु प्रतिपदविहितस्य निरवकाशत्व एव बाधकत्वमित्युगवादिभ्योयच्छेषाद्विभाषेति सूत्रस्य भाष्यविरोधादुपेक्ष्याः
पादोन्यतरस्यामिति ङीपो वैकल्पिकत्वेन तदभावे ऋच्यभिधेयायां टाबृचीत्यस्य सावकाशत्वे न निरवकाशत्वाभावात् तत्रोगवादि
भ्यो यदिति सूत्रे भाष्ये छदिरुपधिबलेर्ढञ् भवति चर्मणोञः पूर्वविप्रतिषेधेन पाठञोऽवकाशः छादिषेयं तृणमञोऽवकाशः
बाध्रं चर्मछदिर्नीम चर्मविकारस्तस्मादुभयंप्राप्नोति छादिषेयं चर्मठञ् भवति पूर्वविप्रतिषेधेनेत्युक्तम् महाविभाषायामञोऽ
भावपक्षे चरितार्थेनापि ठञा प्रतिपदोक्तत्वेन बाधे पूर्वविप्रतिषेधोऽनर्थकः स्यात् यद्यपि कैयटेनोक्तरीत्याऽत्राहरित्यादि दूषि
तं भाष्यं तथाप्याहुरित्यरुचिबीजं निरवकाशत्वे सत्येव प्रतिपदविहितत्वं बाधकत्वे प्रयोजकं नान्यथेत्युक्तम्। शेषाद्विभाषेति
सूत्रे भाष्येपि नैवकवपेक्षं शेषग्रहणं नापि समासान्तापेक्षा किन्तर्हि अनन्तरो योबहुव्रीह्यधिकारः बहुव्रीहौ सक्थ्यक्ष्णोरि ५२
ति सोपेक्ष्यते इत्युक्तेस्तदपेक्षये वशेष उक्तपक्षद्वयोक्तदोषाणां निरासात् अस्मिन्नपि ङ्ग्लेदीरुणीति प्रतिपदविहितसमा

सान्तैः स्वविषयकपो बाधं नैनैवोपयन्तेः शेषग्रहणवैयर्थ्यं तु न तेषां कवभावे सावकाशत्वे न निरवकाशत्वाभावादिति अत एव
ङ्याप्प्रातिपदिकादिति सूत्रे भाष्ये ह्यिपदाक्रमिन्यास्तापग्रहणप्रयोजनकथनावसरेऽकारान्तपरशब्दसंज्ञां कृत्वा रन्तत्वादापि एक
देशो पूर्वान्तवत्त्वात्प्रातिपदिकत्वेन स्वाद्युत्पत्तिमाश्रित्य ठाबृचीति प्रत्याख्यातम्। अन्यथात्र ऋच्यभिधेयायां प्राप्तङीबू बाधनार्थं टाबृची
त्यस्यावश्यकत्वेन प्रत्याख्यानमसङ्गतं स्यात्। तेन ऋच्यभिधेयायामपि द्विपदी द्विपादितीष्यत एव एवं च सूत्रमतेपि तयोः सिद्धये टा
बृचीत्यत्र पादोन्यतरस्यामित्यन्यतरस्यांग्रहणमनुवर्त्यमिव प्रत्याख्यानेन सहफलैक्याय अनभिधानं तु न युक्तं मानाभावादिति ङ्या
प्प्रातिपदिकादिति सूत्रे उद्योते टाबृचीति सूत्रे शेखरे च स्पष्टम्। नन्वेवमपि क्रुञ्चा उष्णिहा देवविशत्यादौ हलन्ताट्टापः सत्त्वे नैकादेशभा
वेन स्वाद्युत्पत्त्यर्थमापग्रहणमावश्यकमिति वाच्यम् क्रुञ्चा नालभेत उष्णिहककुभौ देवविशं च मनुष्यं विप्राप्य इति प्रयोगानुरोधा
त्तेषामदन्तत्वं स्वीकृत्य ङ्याप्सूत्रेभाष्यकृतैवान्यथासिद्धेः कृतत्वात् नन्वन्तादिवत्सूत्रेभाष्ये स्यादिवत्वे कानि प्रयोजनानीति प्रश्न
इके आयखट्वामालाआवनायोरेकादेश आदिवद्भवतियथा प्राक्पेतकर्त्तुमावन्नात्सोलोपोभवमीनिति न तर्हि स्यात् यत्रैकादेशो
न क्रुञ्चा उष्णिहा देवविशति हलन्ताद्दाबुक्तः स विरुध्यते इति चेन्नोक्तप्रयोगानेषामदन्तत्वस्वीकारेपि जातिलक्षणङीषबाधना
र्थोऽजादिषु पाठ इति कैयटोक्तरीत्याजादिपाठस्यावश्यकत्वे हलन्तानेवेतान्यठित्वा टाप्कार्य्य इति भाष्याशयात् नित्वे नावता

प॰टी॰ ऽदन्तानां कुम्भकारी नाम भावो लभ्यते उक्तरूपभाष्यीयप्रयोगानुपपत्तेः वस्तुतस्त्वेकदेशयुक्तिरियं हलन्तेभ्य एव ष्टाबन्तप्रयोगसि
५३ द्धावपि अदन्तेभ्योऽदन्तत्वात्प्राप्तं टापं बाधित्वा स्त्रियां जातिलक्षणङीषापत्तेर्दुरुद्धरत्वात् अजादिषु दन्तत्वपाठस्यावश्यकत्वात्
भाष्यं तु भागुरिमताभिप्रायेण अत एव मनोरमाकारोऽपि त्रयोमीहलन्ता इत्येके इति भागुरिमताभिप्रायेण स्वरसं सूचितवान्।
अत एव च तष्टिभागुरिरल्लोपमिति कारिकाव्याख्यानावसरे इदं भाष्ये न दृश्यते इत्यादिना निशादिशयोर्हिगुपधलक्षणे कोऽ
दन्तत्वाट्टापं स्त्रीकृत्य कुम्भकारी नाम दन्तत्वं स्वाकृतत्वं च वाचेत्यादीनां साधुत्वमुक्तमव्ययप्रशेषे शेखरे अत एव तस्मात्क एवं विषे
ये देववि शमिति भाष्यव्याख्यानावतरे एतेन हलन्तेभ्योऽपि टाबिति भागुरिमतं चिन्त्यमिति ङ्याप्सूत्रे उद्योते उक्तम्। वहुराजेति भा
ष्यप्रतीकमुपादाय तत्रैव वाचादिशानिशादेरप्युपलक्षणमिति व्याख्यानम् तद्भागुरिमतसिद्धस्येति शेषपूरणेन व्याख्येयमन्यथै
तेनेत्यादिपूर्वोक्तग्रन्थविरोधापत्तेः एतएव गुरुचरणैरजन्तस्त्रीलिङ्गवाचेत्यादिलिङ्गविशिष्टपरिभाषयास्ताद्य इति शेखरग्रन्थो भागु
रिमतेनाहवाचेत्यादावितीन्येवमवतारितः लिङ्गविशिष्टपरिभाषामवष्टभ्योक्तभाष्यस्यैकदेशयुक्तत्वेनूभयोरप्येकदेशयुक्तत्वमस्तुव
स्तुतः सूत्रमतएतद्ग्रन्थस्तत्वान्नैकदेशयुक्तत्वं युक्तमिति दिक्। क्वचिदेवकाशत्वाभावेपीति यथा सांपीत्यादावन्यत्र चारितार्थ्यस्याप्यमृ ५३
न्निति दीर्घस्य झलन्तलक्षणनुमः पूर्वमप्रवृत्तिरिति हलन्तनपुंसकेपरत्वादित्यादिना शेखरे एव स्पष्टम् अत्र च लक्ष्यानुरोध एव व्यव।

स्थाहेतुः तेन स्त्रीणामित्यादौ प्रतिपदोक्तस्यापि स्त्रिया इतीयङ्देशस्य इहखनधाय इति नुटः पूर्वं न प्रवृत्तिः न देतत्काचिदित्यनेन सू
चितमिति सङ्क्षेपः पुरस्तादपवादा अनन्तरान्विधीन्बाधन्ते नोत्तरान् कुम्भशब्दस्यैवोपादानादिति उत्तरपदत्वेनेति शेषः प्रातिपा
दिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् कुमारीशब्दस्यैव सामानाधिकरण्यमिति। न च कुमारीश्रमणेत्यारोपेण सामानाधिक
रण्योपपत्तेर्न ज्ञापक इति वाच्यमभिन्नलिङ्गानां तादृशोपचारिकं सामानाधिकरण्यमादायोद्देश्यविधेयभावाप्रतीतेः शब्दश
क्तिस्वभावसिद्धत्वादिति गदायां स्पष्टम्। सर्वासां सर्वस्यामित्यादौ तु यण्णादिवद्भावेनैकादेशस्यापत्त्वादनयान्तस्य सर्वनामत्वान्सु
ट्स्याडादिरिति शेखरे स्पष्टम्। यत्त्वेकादेशस्य पूर्वोक्तत्वेन ग्रहणादामि सर्वनाम्नः सुडिति कौमुद्यां स्थमेकादेशस्येति प्रतीकमुपादा
य न चैवं माबन्तत्वाभाव इति यच्छेखरे शङ्कितं तद्भ्रमात्। तत्राबन्तस्य निमित्तत्वेनानुपादानादिति तच्चिन्त्यम्। एकादेशस्य पूर्वा
न्तत्वेन ग्रहणादित्येतावन्मात्रस्य सर्वनामत्वेमिति शेषपूरणसहितस्य सर्वनाम्नः सुट् सर्वासामित्येकोग्रन्थ इति देहलीदीपकन्या
येन तावन्मात्रस्य पूर्वपरोभयशेषत्वमिति वाऽनेकाविकल्पनाः उपपदविधौ द्विषत्यन्योस्तापेरिति खश् यथेह भवति द्विषन्तप
इति एवं द्विषन्तीं ताप इत्यत्र न भवति। समासान्तविधौ राजाहः सखिभ्यष्टच् यथेह भवति मद्रराज इति मद्रराज्ञीत्यत्र न भवति म
हदात्वे आन्महत इत्यात्वं यथेह भवति महाप्रिय इति एवं महतीप्रिय इत्यत्र न भवति ञ्नित्स्वरविधौ ञ्नित्यादिरित्याद्युदात्तत्वं।

प.टी.
५४

स्वरोयथेह भवतिदाक्षिरहिंचुंकायनिरितिएवंदाक्षी अहिंचुम्बकायनीत्यत्र न भवति राजस्वरे ब्राह्मणकुमारयोः ब्राह्मणकुमारयो
परयोराज्ञाचेतिप्रकृतिस्वरोयथेह भवतिराजब्राह्मणः राजकुमार इति एवंराजब्राह्मणीराजकुमारीत्यत्र न भवति। वहोनञ्वदुत्त
रपदभूम्नीत्यादौ समाससंघातग्रहणे चेति इत्यादिरूपसमाससंघातेत्याद्यर्थे उत्तरपदभूयस्त्वं वर्त्तमानाद्बहुशब्दात्परंयत्पदन्तद
न्तस्य समासस्य नञ्इव स्वरो भवतीत्यर्थः केन बहोर्नञ्वदित्यतिदेशसूत्रेण समासान्तोदात्तत्वं यथेह भवति बहुगोमान् एवं बहुगोमती
त्यत्र न भवति समाससंघातग्रहणे इति विशेषणात्तु सूलकूपकुम्भशालं बिले इति पूर्वपदोदात्तत्वं कुसूलबिलं कुसूलीबिलमित्युभ
यत्रापि भवति॥ राजाहःसखिभ्य इत्यादौ लिङ्गविशिष्टपरिभाषाया अप्रवृत्तिरित्यर्थः। समाससंघातग्रहणे चेति समासरूपसंघातग्रहण
णे चेत्यर्थः समासान्तविधावित्यनुवर्त्तते तेन शेषाद्विभाषा न घृतश्चेत्यादेरुभयत्रापि प्रवृत्तिः अत्र हेतुमाह स्वरेति नञ्सुभ्यामित्यादौ
वित्यर्थः भाष्याच्चेति तत्र न घृतश्चेत्यादिसमासान्तविधौ समाससंघातग्रहणे परिभाषायाः प्रवर्त्तनात् शंकाया अज्ञानेनोपपन्नेग्रहन
घन्तानामिति इत्याशंक्याहेति तथा चानया बहुव्रीहित्वस्य विशिष्टे अतिदेशाच्छंकानुपपत्तिरिति भावः। विभक्तौ लिङ्गविशिष्टाग्र
हणम् न च श्वयुवेत्यत्र विभक्तित्वेन विभक्तेरनिमित्तत्वात् युवतीः पश्येत्यत्र कथम् अनया निषेध इति वाच्यम्। वसुगत्या विभक्तौ परतः
सम्प्रसारणस्य प्राप्तत्वादेतत्परिभाषाप्रवृत्तेरिति प्रदीपोद्योतयोः स्पष्टम् नन्वेवमपि श्वयुवेति सूत्रे मघवतेत्यत्र लिङ्गविशिष्टपरि ५४

भाषया युवतीः पश्येत्यत्र सम्प्रसारणातिप्रसङ्गमाशंक्य नकारान्तग्रहणमनकारान्तप्रतिषेधार्थमिति समाधाय यत्तावदुच्यते इत्या
दिना मघवतेत्यस्य साधुत्वात् सत्त्वाद्युवतीः पश्येत्यस्य विभक्तौ लिङ्गविशिष्टाग्रहणज्ञापनान्यथासिद्ध्या नकारान्तग्रहणप्रत्याख्यानाय श्ववेत्या
दिना ऽऽल्लोपो न इति योगविभागं कृत्वा तस्योभयशेषत्वं प्रसाध्य मघवता युवतीः पश्येत्यनयोः सम्प्रसारणं वारितं भाष्ये तेन युवतीः प
श्येत्यस्य प्रकृतपरिभाषाऽसाधारणोदाहरणत्वाभावएव लभ्यत इति मूलमसङ्गतमिति चेन्न। अधुना गोमती सुपथी सुपुंसी सखी
भगवतीत्यादौ लिङ्गविशिष्टपरिभाषया प्राप्तानां स्वरनिषेधनुमात्वासुङनङ्लित्वेलोपानां वारणायावश्यकया विभक्तौ लिङ्गवि
शिष्टाग्रहणमिति परिभाषयैव युवतीः पश्येत्यत्र दोषवारणस्य युवोरनाकाविति सूत्रे भाष्ये कृतत्वादेतत्परिभाषाऽसाधारणफल
त्वात् अतएव एवमर्थम् इत्युभयोः शेष इति नाश्रयणीयमिति तत्रैव प्रदीपकृतोक्तम्। अतएव च श्वयुवेति सूत्रे शेखरे परेत्वित्या
दिनाऽन्तानामित्यस्य मघवन्शब्दस्य विभाषाविषयत्वमभ्युपेत्य मघवतेत्येव प्रयोजनमुक्तं ननु युवतीः पश्येति राजकीयमित्या
दौ चैकदेशविकृतन्यायेनानन्तत्वमादाय अल्लोपोऽन इत्यतिप्रसङ्गस्य श्वयुवेति सूत्रोपसंख्यानेन नकारान्तग्रहणानुवृत्त्या वारणप
रत्वात् तत्सूत्रस्य भाष्यं त्वेकदेश्युक्तिर्नकारान्तग्रहणस्य भाष्ये प्रत्याख्यानात् एकदेशविकृतन्यायोऽप्यप्रसक्तेश्चेति श्वयुवेति सूत्रे शे
खरे स्पष्टम्। अत्रः परिभाषायां विभक्ताविति विषयसप्तमी तेन विभक्तौ परतः पूर्वस्य यत्कार्यं विभक्तेश्च यत्कार्यं तत्र सर्वत्रान

प॰टी यानिषेधः शुनेत्यत्र सावेकाच इति प्राप्तस्य विभक्त्युदात्तत्वस्य न गोश्वन्निति यथा प्रतिषेधः तथा शुन्येत्यत्र गौरादित्वान्ङीषि कृते प्राप्तस्यो
५५ दात्तयणो हल्पूर्वादिति विभक्तिस्वरस्य न गोश्वन्निति न प्रतिषेधः अनया निषेधे न श्वन्शब्दग्रहणे। धुनीशब्दस्याग्रहणादिति
पूर्वोरनाकाविति सूत्रभाष्यात् न चैवं विभक्तिस्थानिककार्ये प्रयुक्तपरिभाषया निषेधे कुमतिं चेति णत्वस्यापि विभक्तिस्था
निकत्वादनया लिङ्गविशिष्टपरिभाषया निषेधात्कवर्गवदुत्तरपदकसमासत्वस्य चित्रगवीणामित्यादौ ङीवन्तेऽभावात्पर
त्वाप्राप्ते हलन्त्यमिति सूत्रशब्दरत्नासङ्गतिरिति वाच्यम् उक्तभाष्यात्प्रधानन्यायाच्च विभक्तेः प्राधान्येन स्थानित्वे एवैतत्परि
भाषाप्रवृत्तेरभ्युपगमात् एवं तु नकारस्य प्राधान्येन विभक्तेरिति भावप्रकाशे स्पष्टम्॥ ननु यदागमा इति परिभाषया आगमा
नामागमिधर्मवैशिष्ट्यबोधनान्नकारस्य विभक्तित्वात्प्राधान्याच्चैतत्परिभाषाप्रवृत्त्यापत्तिरिति चेन्न विभक्ताविन्यावन्त्ये विभक्ति
स्थानिकनिषेधविषये विभक्तित्वेनादिविभक्तेः प्राधान्येनानाश्रयणेन निषेधाङ्गीकारात् नकारस्योक्तरीत्या विभक्तित्वेपि प्रा
धान्येपि च तत्त्वेन स्थानिताया अनाश्रयणमपि तु तत्त्वेन विभक्त्यंशत्वेन स्थानित्वेपि प्राधान्ये नाश्रयणमपि अविशेषणत्वेने
ति न दोषः एतेनैतेनैकशेषप्रकरणे प्रदीपे स्त्रीगवीनामिति प्रयोगे हलन्त्यसूत्रे मनोरमायां चित्रगवीनामिति प्रयोगे च कुमति ५५
चेति णत्वाभावो व्याख्यातः कवर्गवदुत्तरपदकसमासत्वस्य ङीवन्ते लिङ्गविशिष्टपरिभाषालभ्यस्य विभक्तेरणत्वे कर्तव्ये नप्रा

निषेधात् नव्यतराणां तु तत्र णत्वपाठमङ्गीकृत्य तदन्यपाठे लेखकप्रमाद इति तत्र कुत्सनानि निर्बीजत्वपास्तम्। इयञ्चापूर्ववच
नहृपापूर्वोरनाकाविति सूत्रभाष्ये पठितान्तरमाह घटघटीति अत्र विभक्तिग्रहणस्योपलक्षणत्वादुपपदविधौ द्विषन्तपयोर्लो
परित्यादिभाष्योक्ता नोलिङ्गविशिष्टपरिभाषादोषाणां संग्रहः यत्तु ङ्याप्प्रातिपदिकादिति ङ्याब्ग्रहणं लिङ्गविशिष्टपरिभाष
या अनित्यत्वान्नमूलेषेति तन्न भाष्यकृता ङ्याब्ग्रहणस्य प्रत्याख्यानात्सूत्रमते ङ्यावन्तात्तद्धितोत्पत्त्यर्थं तदावश्यकत्वात् ननु भा
ष्योक्तलिङ्गविशिष्टपरिभाषामतादोषेषु पूनस्तिरित्यस्यापरिगणनात्तद्विषये लिङ्गविशिष्टपरिभाषायानित्यत्वादपूनीतिरिति प्रा
प्नोतीति चेदत्रोच्यते किं ङ्याब्ग्रहणं प्रत्याख्यानवादिभाष्यमते आपाधानेऽ तो ङ्यन्तादावन्तात्तद्धितोत्पत्तिरिति सूत्रमते॥ ना
द्यः प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमित्यनया हि लिङ्गबोधकप्रत्ययरहिते दृष्टानां प्रातिपदिकत्वव्याप्यधर्माणां
लिङ्गप्रत्ययविशिष्टे प्रसिद्धेऽतिदेशो यथा यस्कुम्भीत्यत्र कुम्भीशब्दे कुम्भत्वातिदेशः एवं पूनीशब्दे नयापुत्वमात्रातिदेशात् पू
नस्तिरितिनिप्रत्ययातिप्रसङ्गो वाच्यः स च न संभवति येन नाप्राप्तिन्यायेन तिप्रत्ययस्यानान्तलक्षणङीवबाधकत्वात् बाधकवि
षये ङीपोऽप्रसङ्गेन पूनीतिङीवन्तस्यैवाभावेन निरधिष्ठानपुंस्त्वातिदेशासंभवात् नान्त्यः तद्धितोत्पत्तिर्ङ्याब्भ्यः परैव न पूर्वेत्य
र्थेन यत्र ङ्यापस्तद्धितयोर्युगपत्प्राप्तौ परत्वान्नटङ्त्वाभ्यां तद्धितस्य ङ्याब्भ्यः प्राक्प्रसङ्गस्तत्रैवानेन नियमेन तस्य प्राक्प्रसङ्गो निव

प॰टी॰ र्यते यथा लोहितिनिकेत्यादौ इहनुतिप्रत्ययस्यापवादत्वात्तद्विषय उत्सर्गस्याप्रवृत्तेर्युगपत्प्राप्त्यभावादित्यन्यत्र स्पष्टम्. अन्ये तूक्ता
५९ र्थकङ्याव्ग्रहणेनैव लोहिनिका लोहितिकेति रूपद्वयसिद्धेर्लोहिनाल्लिङ्गबाधनं वेत्यनेन ङ्याव्ग्रहणकृतनियमस्य कालिके
त्यादिफलकस्यानित्यत्वज्ञापनाद्यूनीतिरिति प्रयोगस्य निरासः अत एव ङ्याव्ग्रहणप्रत्याख्यानपरभाष्यशेषे कथं लोहिनिके
ति वक्ष्यते तल्लोहिनाल्लिङ्गबाधनं वेति भाष्यप्रतीकमुपादायावश्यकर्तव्यतां दर्शयति क्रियमाणेपि ङ्याव्ग्रहणे लोहितान्म
णौ वर्णे चानित्ये इति प्रतिपदविधानाद्बलीयस्त्वात्स्त्रीप्रत्ययं बाधित्वा कन्नेव स्यादित्युभयथाप्यावश्यकत्वप्रतिपादकः कैयटः
सङ्गच्छते परत्वादिति वक्तव्ये प्रतिपदविधेर्बलवत्त्वादिति हेतूपन्यासश्चिन्त्यो निरवकाशत्वाभावादिति तत्त्वन्यदित्याहुः मिश्रा
दिषु युवतिरिति निर्देशस्तदपि नित्यत्वज्ञापकमित्यपि केचित् एतत्फलितमत्तद्धितपदं तिप्रत्ययाद्यतिरिक्तमिति शेखरे अभि
हितम् एतेन ङ्याव्ग्रहणं ङ्यावन्तात्तद्धितोत्पत्तिर्यथा स्यात् ङ्याब्भ्यां माभूदिति पक्षे तु यूनीतिरिति प्राप्नोत्येवेत्यपास्तम् आय
तु मान्याः सर्वत्र लोहितादिकतन्तेभ्य इति सूत्रे आरम्भसामर्थ्यादेव प्राचां ग्रहणनिवृत्तौ सर्वत्रग्रहणमुदीचां मतेऽचरितार्थस्य
चाप आवश्यायनीत्यत्र प्राचां मतेपि परत्वाद्बाधकस्य बाधनार्थमिति भाष्योक्तसर्वत्रग्रहणप्रयोजनस्य चावन्त्येकादेशस्य पूर्वा ५९
न्तत्वेन यत्र तत्त्वात्ष्फसिद्धेस्तस्यासिद्धिप्रसङ्गाच्चातुरर्थिकस्त्रियामित्यधिकारविहितस्त्रीप्रत्ययान्तात्तदधिकारविहितस्त्रीप्र

त्ययो न भवतीत्यस्य सर्वत्रग्रहणेनावश्यज्ञापनीयत्वाद्यूनीतिरिति प्रयोगो न भविष्यति ष्फप्रत्ययान्तान्ङीषुविधिसामर्थ्यादेव
यङश्चाबित्यत्र ष्यङः ष्यङोः सामान्यग्रहणार्थाद्ष्यङन्ताच्चाबित्याहुः तन्न वनतद्धीत्यत्रोदीचां मते सावकाशे शार्ङ्गरवादिङीनं बाधि
त्वा वचायनीत्यादावपि सर्वत्रग्रहणात्प्राचां मते प्राप्तस्यापि ष्फस्य वारणायानुवृत्त्यनुवृत्तेः शेखरे स्पष्टत्वेनोक्तरीत्या ज्ञापकस्य वर्णयि
तुमशक्यत्वात् यदपि ष्फविधावत इतिनानुवर्तितेः कारान्तात्ष्फे तस्यायनादेशे एकादेशेनापि रूपसिद्धिः ष्फस्य तद्धितसंज्ञा पापस्येति
लोपप्रयोजिकाया आनर्थक्यप्रसङ्गात् अत एवासुरेरुपसंख्यानमिति वार्तिकस्यापि सूत्रेणैव सङ्ग्रह इति चावन्त्यादेकादेशे ष्फो ना
प्राप्नोत्यत इति तत्राधिकारादिति नव्यतरोक्तं दूषणमप्ययुक्तमिति तदपि चिन्त्यम् परत्वाच्चापि सत्कृतिन्याये न पुनः ष्फस्याप्राप्तेः किञ्च्या
द्ग्रहणाननुवृत्तौ लोहितगार्गीत्यादावुदीचां मते ष्फस्याप्राप्त्या यञन्तान्ङीपि गार्गीति सिद्धावपि प्राचां मते यञन्तात्ष्फङीपोः प्राप्तयोर्ङ्या
वग्रहणकृतनियमेन यूनीतिरित्यापादकत्वउक्तरीत्या प्रातिपदिकत्वाच्चाव्ययत्वेन तत्त्वस्य लिङ्गविशिष्टपरिभाषया ङीबन्तेऽतिदे
शात् ष्फे तस्य यस्येति लोपार्थं तद्धितसंज्ञाया आवश्यकत्वेनैव वैयर्थ्याभावादासुरेरुपसंख्यानस्यापूर्वत्वापत्तेः अत इत्यनुवृत्तौ तु
लिङ्गविशिष्टपरिभाषयाऽत्वाननिर्देशात्सर्गीत्यत्राप्राप्तौ तद्धितग्रहणं व्यर्थं सद्घन्तत्वसंख्यात्वस्यापि बोधनद्वारा ङ्यन्तात्ष्फबोध
कत्वेनासुरायणीत्यस्य सिद्धिरित्यादिकं नन्वेवमपि बहवो गोमन्तो यस्यामिति विग्रहे बहुव्रीहौ ङीपि तत्र नैव लिङ्गविशिष्टपरिभा

षया बहुव्रीहित्वातिदेशाच्छेषाद्विभाषेति कपि बहुगोमतीकेति स्यान्न तु बहुगोमत्केति चेन्न ङ्याब्ग्रहणप्रत्याख्यानपक्षे ङीप्कापोः
प्राप्तयोः परत्वान्नद्यृद्भ्यां कबुत्पत्तेर्भाष्यकृतैवोक्तत्वात् ङ्याबन्तात्पर्द्धितोत्पत्तिरिति मते ङ्याब्ग्रहणकृतनियमस्यानित्यत्वेन समा
धानात् यत्तु ङ्याबन्तात्तद्धितोत्पत्तिर्न तु ततः प्रागिति पक्षे समासान्तविधौ लिङ्गविशिष्टपरिभाषाया अप्रवृत्तेः स्त्रीप्रत्ययान्तस्य बहुव्री
हित्वस्यैवाभावान्न कबिति तच्चिन्त्यम् ङ्याप्प्रातिपदिकादिति सूत्रभाष्यप्रामाण्यात्समासात्समासावयवो यत्र स्त्रीप्रत्ययान्तो मद्रा
ज्ञीत्यादौ तद्विषयसमासान्तविधौ राजाहःसखिभ्य इत्यादौ तस्याप्रवृत्तावपि बहुव्रीहेरूधसो ङीषिति सूत्रभाष्यप्रामाण्यात्समासरू
पसंघाततद्विषये समासान्तविधौ परिभाषायाः प्रवृत्तेः एतेनावपश्यै यत्र स्त्रीप्रत्ययान्तस्तत्रैव समासान्तविधौ सा न प्रवर्तते इति तत्त्व
तरोक्तिर्न युक्ता प्रमाणाभावादित्यपास्तम् यद्यपि बहुव्रीहिप्रकृतिकङीषन्तस्य न घन्तत्वाभावात्पूर्वपक्षानुत्थानात् व्यपदेशि
वद्भावाद्दूर्ण्योरेव नदीसंज्ञेति पक्षावलम्बनाद्वा पूर्वपक्षाशयवर्णनस्य कर्तुमशक्यत्वेऽपि न घन्तानां यो बहुव्रीहिरिति तत्समाधा
नेयावन्नघन्तावयवको बहुव्रीहिरित्यर्थकल्पने बहुकुमारीक इत्यादावव्याप्तिर्यत्किञ्चिन्नघवयवक बहुव्रीहिरित्यर्थकल्पने कु
मारीभार्य इत्यादावतिव्याप्तिरिति न घः परः समासार्थपदस्यान्तावयवः प्रत्यासत्त्या नदीरूपस्य कम्परो भवति सोऽपि समासस्या ५७
न्तावयवो यथा भवतीति तथा च समासार्थोत्तरपदावयवाः समासान्ता इति निष्कृष्टसूत्रार्थेनात्यर्थाल्लिङ्गविशिष्टपरिभाषायाः

समासान्तविधानमतिरूपसमाधानेन न सा लङ्घयितुमशक्यत्वादिति भाष्यप्रयोजनम् तदप्यसत् सर्वत्र समासान्तविधौ परि
भाषाया अप्रवृत्तिमभिधाय तामेव पुनरवलम्ब्य पूर्वपक्षाशयवर्णनस्यासङ्गतेः यथाकथंचित्सूत्रार्थवर्णनेऽपि नघन्ता
नां यः समास इति भाष्याक्षरायोजनाच्च गोस्त्रियोरुपसर्जनस्यान्त इति सूत्रभाष्यप्रामाण्यान्नघृतश्रेण्यादीनां समासान्तत्वेन
नेकवाक्यतया नघन्तानामिति बहुवचनस्याराद्यागमनं गुरुहृत्यमागमनमित्यादाविव प्राधान्यसूचकतया चाप्रधानीभूतनघन्ताव
यवकबहुव्रीहेः समासस्य तदर्थकवाक्यस्यान्तावयवोऽर्थान्नघन्तान्यः कब्भवतीत्यर्थेनादोषाच्च उक्तभाष्यप्रामाण्यादेव च प्राति
पदिकादित्यस्य समासान्तप्रकरणेऽसम्बन्ध एवं तेन समासार्थपदसमुदायस्यैवावयवः समासान्तो नोत्तरपदमात्रस्येति न व्यतिरे
कि: प्रत्युक्ता आपच्चमसमामेरधिकृतस्य प्रातिपदिकस्येत्यस्यानन्वयप्रसङ्गादित्यपास्तम् नाद्यर्थान्त्राच्छद्ममिति सामान्यप्रवृ
त्ताङ्ग्याप्युत्तरपदावयवत्वस्याप्रतीतेश्च सरूपसूत्रभाष्यमपि नास्माकं प्रतिकूलमिति समासान्ता इति सूत्रे शेखरे सरूपसूत्रे उद्योते
स्पष्टम् तथाहि कृत्तद्धिता नामेकविभक्तौ परत एकशेष इति पक्षे स्वरसमासान्तेषु दोष इति वार्त्तिकव्याख्यानावसरे समासान्तेषु दो
षमुपक्रम्य ऋक्च ऋक्च ऋचाविति समासान्ते कृते सारूप्यादेकशेषो न प्राप्नोतीति भाष्ये उक्तम् तस्यायमाशयः संख्यावाच्येवात्र पक्षे
एकशब्दः पूर्वभाष्यसन्दर्भात् तत्र समासार्थपदसमुदायावयवसमासान्तप्रागवर्त्तिसुपो लुका लुप्तत्वेन प्रत्ययलक्षणाभावात्सरूपयो

र्थः च शब्दयोर्नास्त्येकविभक्तिपरत्वं तदन्तसमुदायादुत्पन्नसुपमादायापि न तत्समासान्तेनव्यवधानात् । न हि शिष्टस्य तु एकविभक्ति
परत्वेन सरूपत्वमिति यत्तु तुल्यतावाच्यैकशब्दोच्चनसामर्थ्यान्नित्यप्रत्ययलक्षणमाश्रित्य भाष्यप्रवृत्तेः कथमन्यथा तत्रैव स्वरे दोषमुप
क्रम्याश्वश्वश्रूस्वस्राश्वी समासान्तोदात्तत्वे कृते एकशेषः प्राप्नोति इदमिह सम्प्रधार्यं समासान्तोदात्तत्वमेकशेष इति किमत्र कर्त
व्यम्परत्वात्समासान्तोदात्तत्वे च दोषो भवतीति भाष्य उक्तम् संख्यावाच्यैकसब्दसमासाश्रयणे हि अव्ययवविभक्तेर्हि लुको बलव
त्त्वात्पूर्वं लुकि समुदायोत्तरविभक्तिनिमित्तकत्वेन बहिरङ्गादेकशेषादन्तरङ्गस्य स्वरस्य परत्वेन बाधकत्वोक्तेरयुक्तत्वापातादिति त
च्चिन्त्यम् परत्वादित्यस्योक्तत्वात्पूर्वकालप्रामत्वादित्युपोतेऽवसमाधानात् कृते द्वन्द्वे एकविभक्तावितिवदता भाष्यकारेण समु
दायोत्तरसुपमादायैव दोषस्य सूचनाच्च । उत्तरपदावयवः समासान्त इति न वमते प्रत्ययलक्षणेन विभक्तौ परतः सारूप्यसत्त्वादुक्त
भाष्यविरोधापत्तेश्च न नूक्तरपदावयवत्वेपि उत्तरपदसम्बन्धिविभक्तेः प्राक् समासान्त इत्याश्रयणान्न भाष्यविरोध इति चेन्न स
मासान्ता इत्यत्रान्तशब्दस्य चरमावयववाचितया सुपः प्राक् प्रवृत्तौ समासार्थोत्तरपदचरमावयवत्वस्यासिद्ध्यापत्तेः ॥ बहुचर्मिके
त्यादापः सुपः परत्वादित्यानापत्तेश्च न च प्रातिपदं विधीयमानसमासान्तानाननुसमासावयवत्वमिति स्वीकाराद्बहुचर्मिकेत्यत्र शे ५८
षाद्विभाषेति कपः सत्वान्न दोष इति वाच्यम् । विप्रमाणमर्द्धजरतीयस्यानौचित्यात् समासस्यान्तोदात्तत्वमुत्तरपदस्य चेति विकल्पा

चेदं प्रथमकार इत्यादौ कपोऽन्तोदात्तत्वमितरत्र समासान्तोदात्तत्वमित्यन्न इति सूत्रभाष्यविरोधापत्तेश्च तत्रेदं प्रथमकाइत्यत्र शेषा
द्विभाषेति कपः प्रतिपदमविधानात्समासावयवत्वादुक्तदोषतादवस्थ्ययोजनेपि अनृच बह्वृच इत्यत्र ऋक्पूरिति समासान्तस्य प्रतिपद
विधानादुत्तरपदावयवत्वाच्च शब्दाकारस्यैवोदात्तत्वसिद्ध्यान्तोदात्तत्वानापत्तिरित्युक्तेरसङ्गत्यापत्तेः एकदेशयुक्तत्वकल्पनेनुप्र
माणभावादयुक्तम् ननु द्वित्रिभ्यां पाद्दन्मूर्द्धसु बहुव्रीहाविति सूत्रभाष्यविरोधः तत्र हि मूर्द्धन्निति निर्देशान्नकारान्तग्रहणेऽकारान्त
स्योपसंख्यानाद्द्विमूर्द्धस्त्रिमूर्द्ध इत्याशङ्क्योदात्तलोपास्सिद्धं पूर्वपदप्रकृतिस्वरं बाधित्वाऽन्तेनोत्तरपदान्तोदात्तत्वे कृते लोपे च सत्युदात्त
निवृत्तिस्वरेण सिद्धमित्यभिधाय इदमिह सम्प्रधार्यम् अन्तोदात्तत्वं क्रियतां लोप इति परत्वाल्लोपः इत्युदात्तलोपाभावमाशङ्क्य पुनरुक्तमे
वन्तर्हि अन्तोदात्तत्वं क्रियतां समासान्त इति परत्वादन्तोदात्तत्वं नित्यसमासान्त इत्यादिनोभयोर्नित्ययोः परत्वादन्तोदात्तत्वं तत्र कृते स
मासान्तः समासान्ते कृते टिलोपः टिलोपे कृते उदात्तनिवृत्तिस्वरेण सिद्धमित्युक्तं कैयटेनापि एवन्तर्हीति प्रतीकमुपादाय पदाकृते समा
से समासान्तः क्रियत इति पक्षलदासम्प्रधारणे वाचनालीत्युक्तम् तत्तश्चैतद्भाष्यकैयटाभ्यां समासचरमावयवत्वेमेव समासान्तं लभ्यते न
तु समासार्थपदसमुदायावयवत्वमिति चेन्न गोस्त्रियोरुपसर्जनस्यान्त इति सूत्रद्वयभाष्यप्रामाण्येनास्य भाष्यस्यैकदेश्युक्तित्वेनाविरोधात्
समासान्तानां समासार्थपदसमु[illegible] समासान्तप्रवृत्तिसमकालं समासमन्तायां पूर्वस्य शेषनिर्घातेनोत्तर

प्र॰दी॰ ५८ पश्चभूतमूर्द्धन्शब्दाकारस्योदात्तत्वे समासान्तस्य शेषनिघातेन हि मूर्द्ध इत्यादावुदात्तनिवृत्तिस्वरसिद्धिर्निर्विघ्ना समासार्थोत्तरपदावयवः
समासान्त इति मेऽन्तु अन्तरङ्गत्वादुत्तरपदान्तोदात्तत्वात्प्राक् उत्तरपदावयवे समासान्ते कृते समास इति मूर्द्धन्निति विशिष्टस्योत्तरपदत्वात्तत्का
रणेन तद्भावादुत्तरपदान्तोदात्तत्वं न प्राप्नोतीत्युदात्तनिवृत्तिस्वरेणेष्टसिद्धिर्वक्तुमशक्यैव यत्तु मूर्द्धन्शब्दावयवत्वात्समासान्तस्य वि
शिष्टमूर्द्धन्शब्दरूपोत्तरपदत्वमस्त्येवेति नात्र निर्देशेऽपि सूत्रे लोपसिद्धिरित्याशयः युक्तश्चैतन्नात्र कृते समासे समासान्त इत्याद्यपक्षमा
श्रयोदात्तलोपात्सिद्धमित्येतदुपपादनस्य कर्तुमशक्यत्वेऽपि सति शिष्टत्वात्प्रत्ययस्वरेण बहुव्रीहिप्रयुक्तपूर्वपदप्रकृतिस्वरस्य बाधना
दन्यथासिद्धत्वात् अथ उच्चरितत्वकरणाज्ज्ञापकात्सति विशिष्टेऽपि प्रत्ययस्वरो बहुव्रीहिस्वरस्य न बाधक इति कल्प्यते तत्किमिति समा
सान्तोत्तरपदावयवत्वे समासान्तानां न कल्प्यते इति तन्न युक्तम् तथा सति प्रतिपदविहितसमासान्तविषये बहुकुमारिका नगरिका
नगरीत्यादौ कप उत्तरपदभूतकुमारीशब्दावयवत्वाद्धि शिष्टकुमारीशब्दरूपोत्तरपदत्वमस्त्येवेति गोस्त्रियोरिति ह्रस्वापत्तेः न च स्त्रीप्र
त्ययान्तत्वे नास्ति न कारान्तत्वमपि नास्तीति तुल्यत्वात् समृद्धापूर्व्यस्य समृद्धपुरो राजेत्यादौ पूर्वपदविहितसमासान्तानां द्वित्रिभ्यां षमू
र्द्ध इत्यादीनामुत्तरपदावयवत्वस्यैव त्वयास्वीकारात्कृते समासे समासान्त इत्येतन्न्यत्र उक्तसूत्रभाष्यस्यैकदेशयुक्तित्वस्य वक्तव्यत्वात् कि ५८
मिति गोस्त्रियोरिति सूत्रभाष्याद्धि रूढं समासार्थपदसमुदायावयवत्वं समासान्तानां नाङ्गीकारोऽपि एतेनैतेन समासार्थपदसमुदायावय

वत्वं समासान्तानाम् अवलम्ब्य विग्रहवाक्ये एव समास समासान्त प्रवृत्त्या तस्य तत्सन्नियोगशिष्टाद्युदात्तत्वेन देशाद्याक्यतापन्ने शेषनिघातेन
पूर्वपदस्योदात्तस्वरितयोगित्वाभावेन पूर्वपदप्रकृतिस्वराप्राप्तेर्द्वे च श्चित्त्वं व्यर्थं सत् समासान्तविधावाद्युदात्तश्चेत्यस्यासम्बन्धज्ञापकं भ
वतीति बहुव्रीहिस्वरस्य प्रत्ययस्वरबाधकत्वात् द्विमूर्द्ध इत्यादौ दोषं वारयन्तो नव्यविवरणकाराः प्रत्युक्ताः समासार्थपदसमुदायावय
वत्वपक्षस्य पूर्वं निरस्तत्वाच्चेति दिगित्यपास्तम् तारप्यौतौ च्छब्दमिति सामान्य प्रवृत्तभाष्यसिद्धस्य समासार्थपदसमुदायावयवत्वस्यै
व मयास्वीकारेण कल्पनीयस्याभावाच्चेत्यलम् प्रातस्यापत्यमित्येकवचननपुंसकाभ्यामिति न स्यैत्येकवचननिर्देशादिति क्रमेणान्व
यः तस्येति नपुंसकनिर्देशादिति तु नार्थः एकशेषेणोभयनिर्देशस्य कर्तुमशक्यत्वादित्युद्योते स्पष्टम् गार्ग्यो गार्ग्यौ इत्याद्युक्तमिति मूले
आदिपदेन गर्गयोरपत्ये गार्ग्य इति न स्यादिति सङ्ग्राह्यम् अपत्यमित्येकवचननिर्देशादित्यपि नार्थः न हि विवक्षायामपि गार्ग्याविन्या
देरेकशेषेणं सिद्धत्वादिति केचित् गुरवस्तु अपत्यमित्येकवचननिर्देशादित्येव व्याचक्षते तेषामयमाशयः अपत्यमित्येकत्वस्यवि
वक्षायामेकस्मिन्नेवापत्ये युगणगन्तं बहुत्वारोपेण बहुवचनान्तस्य गार्ग्या इत्यादेरेकशेषेण निर्वाहाद विवक्षायामावश्यकत्वं नित्य
शब्दवादिमते औपगव इत्यादावुपसर्जनेऽभेदैकत्वसंख्यास्वीकारेण द्वित्वादेरभानात्तस्येत्येकत्वाविवक्षायाः फलाभाव इति प्रा
हुः अपत्यमिति नपुंसकनिर्देशादित्यन्वयः अयमर्थः यः शब्दो पत्निलिङ्गवैशिष्ट्येन प्रयुज्यते न लिङ्गसतदर्थमात्रपरिच्छेदकत्वं

तत्त्वं तदभावो ऽतत्त्वम्। यथा पुण्यं च पत्रं इत्यादौ पुण्यमिति नपुंसकनिर्देशात्तस्य तदर्थपरिच्छेदकत्वे पुण्यो गौरित्यसिद्धापत्त्या ऽत
त्त्वमुच्यते परमियान्विशेषः नियतलिङ्गपत्न्यादिशब्दस्थले तल्लिङ्गे तदर्थपरिच्छेदकत्वाभावस्तच्छब्दबोध्यार्थपरिच्छेदकत्वा
भावेनासंभवन्नपि तदर्थ कारणादिशब्दबोध्यार्थपरिच्छेदकत्वाभावत्वेन पर्यवस्यति अपत्यशब्दावच्छेदेन तदर्थपरिच्छेदकत्वा
भावाभावस्तल्लिङ्गे सन्नपि तदर्थ कारणादिशब्दावच्छेदेन तदभावस्तल्लिङ्गे ऽस्तीत्यर्थः अपत्यशब्दावच्छेदेन तदर्थे तदकतल्लिङ्गा
परिच्छेदकत्वेपि तदर्थ कारणादिशब्दावच्छेदेन तदर्थे तल्लिङ्गपरिच्छेदकत्वेपि तदर्थ कारणादिशब्दावच्छेदेन तदर्थे तल्लिङ्गपरिच्छेदकत्वा
भाव इति यावत् अनियतलिङ्गपुण्यादिशब्दस्थले तु तल्लिङ्गे पुण्यादिशब्दावच्छेदेनापि तदर्थपरिच्छेदकत्वाभाव एव संभवतीति अत
एव भगवता भाष्यकारेण निरुक्ततत्त्वाभिप्रायेण पत्न्यभिधाने स्त्रीपुल्लिङ्गस्य तस्यादित्याशङ्क्य निरुक्तातत्त्वाभिप्रायेणैव सिद्धं तु प्र
जनस्याविवक्षितत्वात्प्रजनोऽत्र विवक्षितः प्रसवमात्रं विवक्षितं न तु लिङ्गसंख्ये अपि सच सर्वलिङ्ग इति समाहितम्। निरुक्तविशे
षाभिप्रायेणैव नियतलिङ्गशब्दविषयं शब्दशक्तिस्वभावसिद्धं निदर्शनमुपन्यस्तमेकार्थशब्दान्यत्वात्। दृष्टलिङ्गान्यत्वं यथा पुण्य
तारकान क्षत्रं गेहं कुटीति भावे इति सूत्रेपि स्फुटमेतत्। तस्मादपत्यमिति नपुंसकलिङ्गे तदर्थ कारणादिशब्दावच्छेदेन तदर्थपरिच्छे
दकत्वे गार्ग्यादित्यादि सिद्धे ऽलदतत्त्वं चमतया च्यत इति मूलं सम्यगेवेति संक्षेपः एतेनापत्यमिति नपुंसकनिर्देशादौपगव इति पुं ६

सि तत्प्राप्नोतीति लिङ्गाविवक्षायां तव्यत्ययेरुदाजह्रे तन्निःसारम्। अपत्यशब्दस्य नित्यनपुंसकत्वेन लिङ्गाविवक्षायास्तत्र वक्तुमशक्य
त्वादपत्यार्थबोधकप्रत्ययस्य तु नपुंसकलिङ्गवैशिष्ट्ये नाभिधायकत्वस्य ...मेकार्थिशब्दान्यत्वात् दृष्टलिङ्गान्यत्वं पुण्यस्तारकान
क्षत्रमित्यादावि देन्येवं भाष्यकारैः समाहितं चेत्यपास्तम्। एकार्थिशब्दान्यत्वादिति भाष्यस्य विधायकाभावेन तत्रापि कथमित्याशंका
यामुक्तरामावान्नि दर्शनमात्रेणार्थासिद्धेश्चोक्तरीतेरेवाश्रयणीयत्वात्। सूत्रे लिङ्गवचनमतन्त्रम्। अर्द्धं नपुंसकमिति सूत्रे ऽर्द्धमिति
नपुंसकलिङ्गस्यार्द्धशब्दार्थपरिच्छेदकत्वे पुल्लिङ्गार्द्धशब्दग्रहणप्रसक्तेर्नपुंसकग्रहणं व्यर्थं सदुक्तविधौ तत्रत्वं ज्ञापयतीत्याहार्द्ध
मिति नच षड्ङ्क्योलुगित्यत्रानयावहुवचनाविवक्षायां गोलोलुगापत्तिरिति वाच्यम्। अविवक्षायामिष्टापत्तेः प्रियपञ्चानरत्यादौ
गोलोलुग्वारणं तु विहितविशेषणाश्रयणादेव न तु प्रियपञ्चामित्यादौ षट्चतुर्भ्यश्चेति नुटसंभवादेव तत्र षट्चतुर्भ्यामिति द्विवचन
निर्देशस्य गुरुत्वाद सङ्गतत्वाच्चे बहुवचननिर्देशस्य लाघवार्थत्वात्सङ्गतत्वाच्चावश्यके नार्थप्राधान्यबोधकत्वे प्रमाणाभावात्।
प्रियचतसृणामित्याद्यनुरोधेन विहितविशेषणानाश्रयणस्य शेखरे ऽभिधानाच्च एतेन षड्भ्यो लुगित्यत्र बहुवचननिर्देशात्स्वउ
र्यप्राधान्यबोधेपि षट्चतुर्भ्यश्चेत्यत्रासंभवः षट्चतुर्भ्यामिति द्विवचननिर्देशे गौरवाल्लाघवार्थं बहुवचननिर्देशस्योपपत्तेरित्यादि
तिपरास्तम्। अन्विनार्थे द्विवचनमपेमेयस्यानन्विनार्थ बहुवचनाश्रयणे केवलदन्तवृत्तिमतो ऽलेकशेषसहितायास्तस्या आश्रय

प॰टी॰ णिच गौरवस्यस्पष्टत्वादित्यपास्तम्· षडिति सञ्ज्ञाशब्दस्यानेकसञ्ज्ञाभिप्रायेण बहुत्ववदर्थप्रतिपादकतया बहुवचनस्यानन्विता
६१ र्थकत्वाभावात् बहुवचनान्तस्यैव सञ्ज्ञात्वाच्चैकशेषस्याभावेन वृत्तिद्वयकल्पनाया अभावाच्च षडन्यद्रत्यादावुक्तरीत्या बहुवच
नावश्यकत्वेन तस्यार्थप्राधान्यबोधकत्वाभावाच्चेति चेन्न· प्रियपञ्चानामित्यादेरिष्टत्वात् प्रियपञ्चामित्येवरूपमित्याग्रहे तु षट्
चतुर्भ्यश्चेत्यत्र लुप्तपञ्चम्यन्तं षडिति स्त्रीकृत्य विहितविशेषणं चाश्रित्य नुड् वारणीयः चतुर्भ्य इति बहुवचनं तु निसर्भ्योजस
इति वेति बोध्यम् यत्तु प्रियपञ्चानः प्रियपञ्चां प्रियचतुरामित्यादौ गौणे लुग्नुटोरतिप्रसङ्गः प्राधान्येन षडर्थबोधकात्परत्वस्य
सत्त्वादित्याशङ्क्योभयत्र विहितविशेषणाश्रयणादित्याह तच्चिन्त्यम् एवं सति परमचतुर्णामित्यादौ नुडनापत्तेः प्रियपञ्चाद्वैपदी
त्यादौ षडन्त्यपि न षडिति निषेधः अनउपधेति ङीप्तु न स्त्रियां यत्प्राप्नोति तन्नेत्यर्थे न तस्यापि निषेधादिति स्त्रीप्रत्ययप्रकरणे शेख
र उक्तम्· यत्तु नो बहुव्रीहेरित्यनेन षडित्यस्य परत्वाद्बाधं मन्यमानाः पक्षे ङीष्टापावित्युक्तानि विद्धुन्मूलकत्वेन सकलप्राप्तिबाधकत्वानु
न युक्तम् दामहायनान्ताच्चेत्यत्राव्ययग्रहणानुवृत्तेरुद्दामा वडवेत्यत्र डाप्निषेधावपि पक्षेलोपि नाऽनउपधेत्यनेन पक्षे ङीबि
ति सिद्धान्तभङ्गप्रसङ्गादिति तच्चिन्त्यम्· न षडित्यस्यानो बहुव्रीहेरित्येतदपवादतया परत्वादित्यस्यासङ्गतेः निषेधानां विद्धुन्मूल ६१
कत्वेपि बाधकविषयेऽप्रवृत्तेश्च कथमन्यथा चतुरित्यादौ गुणनिषेधकस्य ङिति चेत्यस्य त्रुच्छन्दनामिति गुणनिषेधकत्वं नेति ए

वमनो बहुव्रीहेरिति निषेधविषये आरभ्यमाणस्यानउपधेत्यस्य तद्बाधकत्वात्तद्विषये निषेधस्याप्रसङ्ग इति सिद्धान्तासङ्गतिः द्रुहनु
स्त्रियां यत्प्राप्नोति तन्नेत्यर्थकरणसामर्थ्यान्निषेधस्तस्या अपीति बोध्यम् नन्विदं व युक्तमन्यसदृशाधिकरणे तथात्वेऽर्थगतिः ॥
स्वपष्ठाच्चेयं भूष्णादिभ्य इतीति अत एवाङो दो नास्यविहरणे इति सूत्रे नास्य इति पर्युदासः आस्यान्नास्य समुदायश्चास्य भिन्न
आस्य सदृश इति विधिरेव भवति तेन मुखविपादिकाव्याददाते इत्यात्मनेपदमेवेति प्रदीपोद्योतौ यत्त्वेतद्द्योतमनूद्य तत्र मुखवि
पादिको भयसमवेतविवरणविशेषस्यास्योपलक्षितत्वेन प्रतिषेधस्यायोग्यत्वादित्याह तच्चिन्त्यम् विहरणग्रहणाभावे नास्य
इत्येतावतैवास्य भिन्नास्यसदृशसमवेतफलजनकक्रियावाचकाद्धातोरात्मनेपदमिति पर्युदासमादाय कैयटोक्तार्थस्य मु
खमाददाते इत्यादावि व मुखविपादिके व्याददाते इत्यत्राप्यात्मनेपदप्राप्तिः विहरणग्रहणे तु आस्यग्रहणस्य विहरणस्य विहरणविशे
षोपलक्षणत्वान्न प्रसज्यप्रतिषेधेनैव व्याख्यानाच्च न भवत्येवात्मनेपदमिति वस्तुतस्तु नास्तीत्यादिनोद्योत एव स्पष्टमिति दिक् एवञ्च
पर्युदासपक्षे विपादिकां व्याददातीत्यत्रात्मनेपदापत्तेर्भाष्योक्तप्रसज्यप्रतिषेधाश्रयणस्यावश्यकतया एतदनुपरिभाषोदाहरण
त्वमशुद्धमेवेति विभाव्यम्। जातिलक्षणे ङीष् न स्यादिति कुक्कुट्यादीनाम् एङादिरिति पुंस्त्वज्ञानाख्याप्रकारेण निर्वाहस्तु
नात्र अपकृष्टेनाशादीनां जातित्वकत्वाभावात् न च तद्भावेपि पूर्वसाम्यादिविशेषणावयवसमासे स्त्रीत्वविवक्षायाम् दत्तत्वान्ङी

प॰शे॰
६२

पुत्पत्तौ व्याघ्यादीनां सिद्धिरिति वाच्यम्॥ आघ्राणकर्तृत्वमात्रविवक्षायामपि समासे स्त्रीत्वविवक्षायाम[illegible]तत्वान्ङीबुत्पत्तौ व्याघ्यादीनां सि
द्धिरिति वाच्यम् आघ्राणकर्तृत्वमात्रविवक्षायामुक्तरीत्या व्याघ्यादेस्सिद्धावपि यत्र कप्रत्ययोत्पत्तिकाल एव प्रत्ययार्थे स्त्रीत्ववि
वक्षा तत्रैतत्परिभाषां विना सिद्धेः न चैवमपि मृगशब्दार्थ एव पूर्वं स्त्रीत्वविवक्षया मृग्याः क्षीरमिति विग्रहे मृगक्षीरमिति सिद्धये वार्त्तिक
मावश्यकमिति वाच्यम् आव्यविकन्यायेन तादृशविग्रहे हृत्यभावस्याकरे स्थितत्वात् प्रकृते तन्न्यायसंचारस्तु न स्त्रीत्वस्य प्रत्यया
र्थविशेषणत्वादिति दिक्। नन्वेवमपि उपजनिष्यमाणनिमित्तोऽप्यपवाद इति न्यायेन दधतीत्यादावदादेशस्येव व्याघ्रीत्यादेः समासात्पू
र्वं ङीषि सुपि ततः समासे सिद्धिरस्त्वेव न चायं न्यायो निरवकाशविधिविषय इति वाच्यम् जक्षतीत्यादावदभ्यस्तादित्यस्य द्विधेश्चारितार्
थ्ये न निरवकाशत्वाभावादिति चेन्न माषवापिणीत्यादौ न्यायाविषये समासरूपप्रातिपदिकान्तस्य नस्य णत्वसिद्धये स्याः परिभाषा
या आवश्यकत्वादित्यन्यत्र विस्तरः न च परिभाषाया अभावे कौम्भकार्यासिद्धिः स्वार्थादिप्रयुक्तकार्याणां क्रमिकत्वात्पूर्वं कारशा
ब्दात् अपि ततः सुपि समासे स्त्रीभ्यो ढगिति कारीशब्दादेव ढक् स्यात् न तु तत्र कशब्दात् कारे ङ्कीर्नेस्यादिति वाच्यम् स्त्रीप्रत्यये चानुपसर्ज
नेति परिभाषया तदादिविधिनिषेधे न स्त्रीप्रत्ययान्तादपि ढकः सिद्धेः॥ गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः॥ ६२
अत्र गतिकारकोपपदानां यः कृद्भिः समासः प्राक् सुबुत्पत्तेरेवेत्यर्थो न तु तेषां कृद्भिरेव समासः सुबुत्पत्तेः प्रागेवेति तथा सति प्रपचति

तरामित्यादावामन्तेन सुबुत्पत्त्यनन्तरमपि गतिमतोदात्तवतेति सुप्सुपेति वा [illegible] प्र इति गतिकारकोपपदात्कृदिति सूत्रे प्रदीपोद्योतयोः
स्पष्टम्। नन्वेवं प्रपचतितरामित्यादौ गतिकारकोपपदेति कृदुत्तरपदप्रकृतिस्वरेण प्राप्नोति कृदुत्तरपदत्वाभावात्तत्पुरुषत्वाभावाच्चे
ति चेन्न तिङि चोदात्तवतीति सूत्रे तिङ्ग्रहणस्य प्रत्याख्यानेनोदात्तवति ग्रमन्ते परे गतेर्निघातविधानादिष्टसिद्धेर्भाष्यकृतामभिधाना
त् सुप्सुपेति समासस्य वैकल्पिकत्वेन तदभावपक्षे गतेर्निघातसिद्धये तिङ्ग्रहणप्रत्याख्यानस्यावश्यकत्वाच्च प्रपचतितरामित्यादावे
वोत्तरपदप्रकृतिस्वरेणोदात्तत्वे शेषनिघातेन गतेर्निघात इत्येतत्सिद्धये कृद्ग्रहणप्रत्याख्यानमित्येतत्परं गतिकारकोपेति सूत्रस्थभाष्यन्वे
करे स्युक्तिः समासाभावपक्षेऽनेनानिर्वाहादित्युद्योते विस्तरः एतेन यत्तु नव्यतरैः समासाभावपक्षाभिप्रायकं तिङि चोदात्तवतीति सूत्र
स्थभाष्यमित्युक्तम् तन्न पचतितरामित्यामन्तेन प्रशब्दस्य समासः सुप्सुपेत्यनेन यद्यपि वैकल्पिकः प्राप्तस्तथापि नित्येन गतिसमासेन तस्य
बाधनात् समासाभावस्य तत्राभावादिति परास्तम् बहुव्रीहिणा तिङन्तघटितः समासस्त्वर्थकस्यातिङन्तस्य गतिकारकोपपदानामि
त्यनुरोधात् गतिप्रादय इत्यत्र गत्यन्तेन सम्बन्धात् न गतिसमासस्य प्रपचतितरामित्यादावव्याप्तेः यत्त्वतिङिति न बहुव्रीहिरपि तु तत्पु
रुषो लाघवात् तिङिति प्रत्ययग्रहणेन तदन्तग्रहणात् तद्भिन्नमतिङ् पदं तेनोच्यते तदपि समासस्य विशेषणमतिङन्तमिन्नातो यः समा
सस्त्वर्थे अर्थलभ्यमतिङन्तभिन्नो यः समास[illegible]गतिसमासो निष्प्रत्यूहः

प.टी. बहुव्रीहौ त्वतिङ्ग्रहणस्यैवमाद्यर्थे सार्थकत्वान्न ज्ञापकत्वोक्तिर्भाष्यकृतामनुपपन्ना स्यादिति तच्चिन्त्यम् उपपदमतिङिति सूत्र
६३ भाष्यविरोधापत्तेः तत्र हि अतिङ् किं कारको व्रजति हारको व्रजति अतिङिति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्योऽनयोर्योगयो
र्निवृत्तं सुप्सुपेति वर्तत इत्युक्ते एवं तर्हि सिद्धे सति यदतिङिति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्योऽनयोर्योगयोर्निवृत्तं सुप्सुपेति कि
मितस्य ज्ञापने प्रयोजनं गतिकारकोपपदानामित्येषा परिभाषा न कर्तव्या भवतीत्युक्तम् त्वदुक्तार्थे तिङ्ग्रहणस्य चारितार्थ्यं दुर्लभम
कारको व्रजतीत्यादौ सति समासे व्रजतिशब्दस्योपपदस्य प्रथमानिर्दिष्टत्वात्पूर्वनिपाते व्रजतिकारक इत्यस्येत्याद्यसमासस्येतिङ।
न्तानामभिन्नत्वात्कृतेनाप्यतिङ्ग्रहणेनास्य स्यावारणात् न च भाष्यस्य सुप्सुपेत्येतत्तृतीयान्तनिवृत्तिमात्रतात्पर्यकत्वात्प्रथमान्तव
ग्रहणानुवृत्तेः सत्त्वादुक्तप्रयोगे समासवारणमिति वाच्यं न हि तेनैव तद्वारणे सिद्धे तिङ्ग्रहणवैयर्थ्येन चारितार्थ्यस्य दुर्निरूपत्वा
त्वात् अतिङ्ग्रहणेन प्रथमान्तसुप्पदनिवृत्तेरेव ज्ञापयितुं युक्तत्वाच्च किञ्च किंवृत्तस्यानधिकारादकिंवृत्तग्रहणमनर्थकमुपप
दसंज्ञार्थं न हि स्यादुपपदसंज्ञाफलस्य समासस्यातिङ्ग्रहणादप्राप्तेरित्यनवक्लृप्त्यमर्षयोरकिंवृत्तेपीति सूत्रभाष्यविरोधाप
त्तेः न च संभावयामि धर्मं भावाभाविन्नेतरामित्यादावकिंवृत्ते भवानित्यादेरामन्तेन तिङन्तभिन्नेन समासप्राप्तेः एतादृशप्रयोगा
णां विना प्रमाणमनभिधानकल्पनमपेक्ष्य बहुव्रीहिणातिङन्ताघटित[illegible]ास इत्यर्थस्योपपदमिति सूत्रे उपाध्यायोक्तस्याश्र ६३
यणीयत्वात् न च समासादुद्देश्यविधेयभावानभिधाने प्रमाणम् लोहितोष्णीषा इत्यादौ समासेपि तत्प्रतीतेरित्यन्यत्र विस्तरः।

तिङन्तभिन्न इत्यर्थलाभेपि तिङन्तभिन्नान्त इत्यस्यालाभेन तिङन्तान्तभिन्न इत्यस्यार्थलभ्यत्वाभावाच्च बहुव्रीहौ त्वित्याद्यपि चि
न्त्यम् उपपदमिति सूत्रसम्बद्धेनैवातिङ्ग्रहणेन तिङ्घटितसमासव्यावर्तकेनैकदेशानुमत्याकारं काशे इव गत्यंशेपि तु ज्ञापक
त्वात् ननु तिङ्ग्रहणस्य योगद्वयशेषत्वं ब्रूमो येनातिङ्ग्रहणस्य पचतितरामित्यादौ सार्थक्यं स्यादिति शेखर एवोक्तत्वात् यत्त्वेन
च्छेखरमनूद्य तत्र माभूत्तरामित्यत्र समासव्यावृत्तये तिङ्ग्रहणं सार्थकं स्यादेवमपि सत्त्वात् न चोपपदमित्यत्रात्यतिङित्यस्य सम्बन्धो ना
स्तीति शक्यं वक्तुं न च माङि लुङित्यत्र माङिति सप्तमीनिर्देशेन तस्योपपदसंज्ञायां फलाभावः इति वाच्यम् अतिङ्ग्रहणाभावे उक्तप्र
योगे एवोपपदसमासस्योपपदसंज्ञाफलस्य वक्तुं शक्यत्वात् अतिङिति तत्पुरुष इति सिद्धान्तपक्षे माभूत्तरामित्यत्रोपपदसमासो ह्याप्यत
एवेत्याहुः तच्चिन्त्यम् माङ उपपदत्वे उपपदमिति महासंज्ञाकरणेनान्वर्थलाभान्माकशाप्यवर्णभून्माकशाप्यत्वन्निर्भूदित्यादिभाष्यप्रयोगो हि
त्रिपदव्यवधानं न माङः प्रयोगानापत्तेः उपप्रणयमित्यादौ तु धातोरुपसर्गद्योत्यार्थविशिष्टक्रियाप्रतीतेर्धातोः प्रागुपसर्गप्रयोगमन्तराऽसंभवाद्द्योत
कोपसर्गस्य मध्ये पाठेपि समासस्वीकारः स्वाढ्यंभवं स्वाढ्यंकरणमित्यादौ सोरुपपदत्वाद्द्योतकत्वाच्च धातोः प्राक्प्रयोगमप्राप्याविति खलः खि
त्त्वसामर्थ्यादुपपदस्यानुपसर्गस्याप्याढ्यशब्दस्य धातोः प्राक्प्रयोगः अनव्ययस्येति निषेधेन सौखिलफलासंभवादित्यन्यत्र कारको व्रजतीत्याद्य
वतिङ्ग्रहणे नोपपदसमासाभावेपि [illegible] वहतस्य कथञ्चिदुक्तमशक्य।

प॰टी॰ त्वाच्चतिङ्ग्रहणाभावेप्राप्तस्योपपदसमासस्यातिङ्ग्रहणेनवारणेनत्वदुक्तरीत्यासार्थक्यंवाच्यम् तदुपपदसंज्ञानञ्कारादेववा
६४ रणेसिद्धेःनर्थकमेव नत्वतिङ्ग्रहणेनोपपदसंज्ञाभावेनवोपपदसमासवारणेकश्चिद्दोषोस्ति वस्तुतोज्ञापकपरभाष्यप्रामाण्या
त्कारकोव्रजतिव्रजामित्यादेरिवमाभूद्व्रजामित्यादेरनभिधानमेवेतितन्नम् एतेनोद्देश्यविधेयभावस्यसमासात्प्रवृत्तेःक्रियार्थक्रि
यायाःसमासादनवगमादनभिधानकल्पनात्वसदभिप्रेतत्वम् पुनर्भासितेविलक्षुनेनशान्तोद्देश्यप्रवृत्तेःक्रियार्थक्रियायाःसमासाद
समासादुद्देश्यविधेयभावप्रतीतेरसन्मतेः श्रीकारेणनदनवगमप्रयुक्तानभिधानाभावेपि ज्ञापकपरभाष्यप्रामाण्याद्नभिधानस्वी
कारादितिसंक्षेपः उपपदमतिङ् इत्यत्रातिङ्ग्रहणात्सुप्सुपेत्यनयोर्निवृत्तावपि उपपदमहासंज्ञाबलादनर्थत्वलाभेनसुबन्तसै
नोपपदसंज्ञासंविज्ञानाद्राजयुद्ध्वेत्यादौपूर्वपदेनलोपापत्तेः यत्तुकुम्भकारइत्यादौकृत्प्रत्ययोत्पत्तेः प्राक्कर्मषष्ठ्याःकर्तुमशक्यत्वा
नीयायाश्चापवादविषयत्वादप्रवृत्तेः कुम्भेत्यस्योपपदत्वाभावात्कर्मण्यणोऽप्रसङ्गात् असत्त्वमतेतुपञ्चकंप्रातिपदिकार्थपक्षेप्रातिपदि
कस्यैवकर्मत्वबोधकत्वादुपपदत्वेतन्निबन्धनेप्रत्ययेकर्मषष्ठ्याःकुम्भङसकारइतिप्रक्रियावाक्येसमासइतितच्चिन्त्यम् आहरकुम्भं
म्भंकरोतिकटमित्यादावसमर्थेकर्मण्यणोऽतिप्रसङ्गवारणायसमर्थवचनं कर्तव्यमितिवार्त्तिकस्यसमर्थपरिभाषोपस्थित्याप्रत्वा
त्वानाग्भाष्यकारेणयावतावेसानींपरगन्धोलीनुक्तोपपदमितिमहासंज्ञाय नन्वर्थत्वाश्रयणस्पत्त्रोपपदमितिसूत्रभाष्येबोधने ६४

नप्रत्ययविधौसुबन्तत्वेननिमित्ततायाआश्रयणात् किञ्च पञ्चकमितिपक्षेपिकलकारकशक्तिमानर्थः सुमुधाकारेणैवप्राति
पदिकेनोच्यतेनतुविशिष्यतेतिकर्मोपपदत्वप्रयुक्ताणोप्राप्तिः अन्यथावारणाद्युपपदेपिकर्मोपपदप्रसङ्गः वार्त्तिकस्योक्तिसंभ
वस्तुकर्मण्यणित्यत्रधातोरित्यधिकारेपिप्रत्यासत्त्यनाश्रयणेनअन्यथायस्माद्धातोरणभवतितद्धात्वर्थक्रियाकर्मण्युपपदेइति
कर्मवत्कर्मणेतिसूत्रभाष्यप्रदर्शितप्रत्यासत्त्यान्यथासिद्धेः एतेनाणएवोपपदंसप्तमीस्थमितिसूत्रेआहरकुम्भंकरोतिकटमित्यत्रो
पपदसंज्ञासंज्ञानिबन्धनयोरणसमासवारणायोपपदसंज्ञायांसमर्थवचनंकर्तव्यमितिवार्त्तिकक्तोक्तंसङ्गच्छतेइत्युपष्टम्भ
कमपास्तम् असत्त्वमतेचकृत्त्वकृत्यर्थकर्मत्वसत्त्वेनतदनुत्पत्तावपिभाविकृदन्तत्वमादायषष्ठीकृतीतिरिति उपपदमतिङितिसूत्रेउ
क्तोनेसपष्टम् ननुराजदर्शीराजयुद्ध्वेत्यादावुपपदमितिमहासंज्ञाबलात्सुबन्तस्यैवोपपदत्वस्वीकारात्तल्लोपापत्तिसिद्धावपिगतिसमासविधायके
सुप्सुपेत्यस्यनिवृत्तौपदान्ताभावान्निर्गतः संयन्तेत्यादौत्वानुस्वारयोरनापत्तिः प्राठिनेत्यादौपररूपापत्तिश्चेतिचेन्नकुंसितेइतिसूत्रभाष्य
प्रामाण्यात् शब्दान्तरसम्बन्धात्पूर्वंनिसशब्दादेः सुबुत्पत्तौलुकिचपदत्वोत्तरंपदान्तरसम्बन्धेनसमासइतिदोषाभावादित्युपपदमतिङि
तिसूत्रेशब्दरत्नेस्पष्टम् उक्तप्रकारेणनूपपदसमासेननिर्वाहइतिस्पष्टमेव एतेनातिङ्ग्रहणंज्ञापयति अनयोर्योगयोर्निवृत्तेत्सुप्सुपेत्य
तिभाष्योक्तिस्तुसुप्सुपेतिपददयमितिवृत्तिर्न्नाम् ... ... ... ... नवर्त्ततइत्येतिव्याख्यानायपाश्चुतन्या

प॰टी ख्यानेत्वनयोर्योगयोरिति भाष्यात्पूर्वसूत्रेऽपि पदद्वयनिर्देशान्नीतिरेभ्यूयेत्यादौ रुत्वादिनस्यादित्यपास्तमिति दिक् साम्प्रतिकाभावे भूतपूर्वगतिः
६५ नमस्करोति देवानिति ननु नमः स्वस्तीति सूत्रे स्वस्त्यादिसाहचर्य्यात्स्वरादिपठितस्यैव नमःशब्दस्य ग्रहणात् साक्षात्प्रभृत्यूर्य्याद्यन्तर्गण
पठितस्य नमःशब्दस्य योगे द्वितीयैव भवति गतिसंज्ञकस्य सह नमःशब्दस्योपसर्गवद्द्योतकतया कृञ एव प्रणत्यर्थकत्वेन कर्मणि द्वि
तीयेत्यस्य प्रवृत्तेरुपपदविभक्तेरित्यस्यानात्रोपयोग इति चेन्न अत्राहुः कुतो ध्यागच्छति गाः स्वामी व्रजति नमस्यति देवानित्यादावर्थमा
त्रविवक्षया न यानमः करोति देवान्मुनित्रयं नमस्कृत्येत्यादेरपि सिद्ध्या संकोचकसाहचर्य्यपरिभाषायाः फलाभावेनानादरः अत एवावन
र्गेण नमस्यति देवानित्यप्युक्तमिति केचित्तु नमः स्वस्तीत्यत्र साहचर्य्यपरिभाषाप्रवृत्तौ रावणाय नमस्कुर्य्यादिति भट्टिप्रयोगे द्वितीयाप्रसङ्गः
न च सत्त्वार्थकस्य स्वरादिपठितस्यैवायं प्रयोग इति वाच्यम् नमस्पुरसोर्गत्योरिति सत्वाभावप्रसङ्गात् नमः स्वस्तीत्यनेन चतुर्थीति जय
मङ्गलोक्तव्याख्यानुरोधात्सविसर्गपाठकल्पनेऽपि स्वयंभुवे नमस्कृत्येत्यत्र समासस्यानापत्तिः परिहारः न च रावणमनुकूलयितुं स्वयं
भुवमनुकूलयितुमित्यर्थकल्पनया क्रियार्थोपपदस्येति चतुर्थीति वाच्यम् तथाबोधाविवक्षायां दोषस्योद्धृतत्वादित्याहुस्तदपरे न
क्षमन्ते तथार्थाविवक्षायां चतुर्थ्युपपत्तेरथाप्यभावादिति उपपदविभक्तेः [illegible]रकविभक्तिर्बलीयसी क्रियान्वयित्वादिति यत्तु क्रि ६५
यान्तरान्वयानपेक्षक्रियाक्रियान्वय्यर्थप्रयोज्यविभक्तेः कारकविभक्तित्वे [illegible] विवक्षितत्वात् गोषु दुह्यमानासु गत इत्यादौ चत

थात्वाभावात् अत एवान्तरङ्गन्यायमूलैवमित्युपाध्यायाः क्रियान्वयं विना [illegible]दर्थप्रतीतेरभावेन पदान्तरान्वयस्य ततः पूर्वव
र्त्तुमशक्यत्वात् तन्निमित्तोपपदविभक्त्युपजीवकत्वेन दौर्बल्यमप्यस्या मूलम् क्वचिद्धन्ति घटकपदस्यैवार्थक्यात्तन्निमित्तकवि
भक्तेरप्रसङ्गोऽपि तथा यथा नमस्यति देवानित्यादौ भाष्ये चतुर्थ्यापादनशंकानुपूर्वपक्षिणस्तदन्तानादिति नमोवरिव इत्यादिसूत्रस्थ
भाष्यविरोधो नास्तीति तच्चिन्त्यम् एतादृशविवक्षाया भाष्याद्यनुग्रहाभावेनाप्रामाणिकत्वात् किञ्च क्रियान्तरान्वयानपेक्षत्वं क्रिया
न्वय्यर्थान्वयि नाद्यः ओदनं भुक्त्वा व्रजतीत्यादावोदनमित्यत्र द्वितीयाविभक्तेः कारकविभक्तित्वेनापत्तेर्द्वितीयाया व्रजनक्रियान्वय्यु
नपेक्षभजिक्रियान्वयिकर्मत्वरूपार्थप्रयोज्यविभक्तित्वात् नान्त्यः गोषु दुह्यमानासु गत इत्यादौ गोष्विति सप्तम्याः कारकविभक्तित्वा
पत्तेः॥ सप्तम्या गामिक्रियानपेक्षगोदोहनक्रियान्वय्याश्रयत्वलक्षणलक्षणप्रयोज्यविभक्तित्वात् क्रियान्वयं विनापि पदाच्छक्तिग्रहस्य
तैर्थोपस्थितेश्च प्रत्येकं क्रियान्वयः वादे सत्त्वासत्त्वेऽपि विशिष्टस्य क्रियान्वय इति वादे पदार्थान्वयस्य क्रियान्वयात्प्राक् वक्तुमशक्यत्वा
च्च नमस्यति देवानित्यादौ प्रथमं नमःशब्दस्यानर्थकत्वाच्चतुर्थीनिर्वाहाय मुण्डयतौ मुण्डस्येव नमःशब्दस्याप्यर्थवत्त्वाभिप्रायेण
चैवोपपदविभक्तेः कारकविभक्तिर्बलीयसीति चतुर्थीवारणपरनमोवरिवश्चित्रङः क्यजिति सूत्रभाष्यविरोधस्य वारणञ्चेति
दिक् अन्यविकारेऽन्यस्य देशस्य प्रधानाप्रधानयोः प्रधाने कार्य्यसंप्रत्ययः भाष्यकैयटयोरिति अत एव श्लाघह्नुङ्स्थाशपां ज्ञीप्स्य

प॰टी॰ मानइत्यत्र ज्ञीप्स्यमानपदेन प्रधानभूतण्यर्थकर्मणो ग्रहणमेतन्न्यायात् सन्वारस्येन समर्थेच्छाविषयत्वाविशेषाद्यद्विषयकज्ञानानु
६६ कूलव्यापारस्तस्य प्रकृत्यर्थकर्मणोपि ग्रहणम् अन्यथा ज्ञाप्यमानइत्येव वदेत् इति सिद्धान्तमञ्जूषायां विस्तरः यत्तु ज्ञाप्यमानत्वाभावेपि ज्ञा
पनेच्छासद्भावमात्रेण चतुर्थीप्रयोगस्येष्टत्वात्तस्य नः सार्थक्यात् अत एव येनादर्शनमिच्छतीत्यत्रादर्शनेच्छायां सत्यपि दर्शनेपञ्चम्यर्थे
केच्छति ग्रहणवदिति तच्चिन्त्यम् ज्ञाप्यमानत्वाभावश्च ज्ञापनविषयभावः स किं ज्ञापनाभावप्रयुक्तः उत विषयाभावप्रयुक्तः नाद्यः जि
गमिषतीत्यत्रेव ज्ञीप्स्यमान इत्यत्र सनर्थेच्छायाः प्रकृत्यर्थनिरूपितप्राधान्येपि गमनेइव प्रकृत्यर्थभूते ण्यन्तार्थे ज्ञापने उद्देश्य
त्वलक्षणार्थप्राधान्यसत्वेन तदभावस्य वक्तुमशक्यत्वात् अत एव न द्वितीयोपि तत्सत्वेन तद्विषयस्यावश्यंभावात् अन्यथा ग्रामं ग्रा
मायजिगमिषतीत्यादौ गमनेच्छासद्भावमात्रेण सनउत्पत्तावपि ग्रामस्य गमिकर्मत्वाय गम्यमानत्वाभावे न द्वितीया चतुर्थ्यौ इति न्याय
तौ गमेर्ग्रामः कर्म इषेरुभे कर्मणी इति सन्नुत्रस्थभाष्यविरोधापत्तिः किञ्च ऊनेत द्वाप्य प्रामाण्यात्तस्कर्मकधातोः प्रकृत्यर्थविषय
त्वाभावेन दर्थमात्रेच्छायां सनोऽनिष्टिरेव दृष्टान्तेन इच्छति ग्रहणसत्वेन तद्वैषम्याच्चेति प्राहुः॥ अन्येत्विच्छाविषयत्वस्य ज्ञानविष
यत्वव्याप्यत्वाज्ज्ञानविषयत्वावश्यकत्वेन दर्थनयानदनुकूलव्यापाररूपज्ञापनस्यावश्यंभावात्तद्विषयत्वाभावोऽसंभवी अत ६६
एव तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशके[illegible]श्रुतौ यज्ञादीनां प्रकृत्यर्थविद्यासाधनत्वं तत्स्वार्थ

प्राधान्यान्नेच्छासाधनत्वमित्युक्तं वेदान्तिभिरित्याहुः यदपि घटश्च पटश्चास्मिन्भूतले इत्यादौ परमतरङ्गमपि द्वन्द्वं बाधित्वा नेन
न्यायेन प्रधानकार्यत्वाद्बहुव्रीहिमाशंक्यानभिधानेन वारणमाह॥ तदपि चिन्त्यम् त्रिकतः शेष इति भाष्यप्रतिपादितप्रथमान्त
त्वेपि समानाधिकरणानां बहुव्रीहिवचनादन्यत्र तस्य प्राप्त्यभावादनभिधानकनावैयर्थ्यात् न च सामानाधिकरण्यं समान
विभक्तिकत्वमात्रं तच्चेहास्ति अत एव उच्चैर्मुखो वा दृषद्भ्रियइत्यादौ समानविभक्तिकतामात्रेण बहुव्रीहिरिति वाच्यम् एकधर्म
बोधकत्वरूपसामानाधिकरण्यस्याश्रयणात् उच्चैर्मुख इत्यादौ वृत्तिविषये उच्चैरादिशब्दस्योच्चैः कल्पमित्याद्यनुरोधाच्छक्ति
मत्त्वरत्वाद्युक्तं सामानाधिकरण्यमक्षतम् वादृषदप्रियइत्यादौ वादृषदोः परस्परं निरुक्तसामानाधिकरण्याभावेपि प्रियश
ब्देन तयोः सामानाधिकरण्यसत्वाद्बहुव्रीहिः पञ्चभुक्तवन्तोऽस्येत्यादौ तु गमकत्वाभावाद्बहुव्रीह्यभाव इत्यनेकमन्यपदार्थइ
ति सूत्रे भाष्ये स्पष्टम् यदपि वृत्तिविग्रहयोः समानार्थबहुव्रीहौ पञ्चविधेपि कर्तृकर्मादिप्राधान्यस्योक्तरीत्यालाभाद्वृत्तिविग्रहयोर्म
हान्विप्रकर्षः स्यादित्येवं मनोरमाग्रन्थस्य प्रपञ्चविधेपीति प्रतीकमुपादाय व्याख्यानपरे कर्मकरणसम्प्रदानापादानाधिकरण
रूपे इति शब्दरत्नग्रन्थे कर्तुरसंग्रहेण न्यूनतापत्तिर्दोषोद्भावनम्। तदपि चिन्त्यम् अषष्ठ्यर्थे इति पदस्वारस्येन कर्मादिपदानां तत
दर्थकद्वितीयादिविभक्तिपरतया दो[illegible] चित्रागावोप

प.टी.
६१

स्येति इत्यर्थावबोधके वाक्ये उदासीनैतादृशवाक्याद्विशेषणं विशेष्यभावव्यत्यासेन चित्राभिन्नगोसम्बन्धीत्येव बोधः स एव च इत्यर्थ
प्राप्तोदक इत्यादावपि वृत्तिविग्रहयोरुभयोरपि प्राप्ताभिन्नोदककर्मकेत्येव बोधः विशेष्ये उदके तन्निरूपकत्ववाधेपि विशेषणीभूत
प्राप्तौ तत्पर्य्यवसानं खर्गोध्वस्त इति वत् शब्दबोधस्तु विशिष्टे तदारोपेणोपपाद्यः अन्यथा प्राप्तभार्य्य इत्यादौ वृत्तिघटकपदयोरेक
विशेष्यकप्रतीतिजनकत्वलक्षणसामानाधिकरण्याभावात् पुम्वद्भावो न स्यात् न स्याच्चोक्तसामानाधिकरण्याभावात् द्वहुव्रीहिरिति
द्वास्वरे स्पष्टम् अत एव तद्वहतीति सूत्रे भाष्ये तस्येदमित्येव सिद्धे इदं व्यर्थमित्याशंक्य वहति वोढेति शब्दभेदान्न तेन सिद्धिरित्युक्त्वा
शब्दभेदेप्यर्थसामान्यात्सिद्धं य एवार्थो रथं वहतीति स एवार्थो रथस्य वोढेत्युक्तं तत्र शब्दभेदादित्यस्य क्रियाप्रधानककर्तृप्रधान
योर्वहति वोढेति शब्दयोर्भेद इत्यर्थः अर्थसामान्यादित्यस्य इत्यर्थो यदारोपेण वहतीत्यत्र विशेष्यविशेषणभावव्यत्यासाद्वहनकर्त्रे
त्येवार्थ इत्यर्थः एवं कालाः परिमाणिनेति सूत्रे भाष्येपि स्फुटमिदम् अत एवास्यानं तद्धितहूनोर्यत्किञ्चिदुपदर्शकम् गुणप्रधा
नभावस्य तत्र दृष्टो विपर्य्यय इति हरिरप्यन्यत्र विस्तरः एतेनोक्तशेखरमनूद्य सोपमस्यानोपालम्भः जहत्स्वार्थायां वृत्तौ वृत्तिघटकपदा
नां सामानाधिकरण्यस्य क्वापि वक्तुमशक्यत्वात् अजहत्स्वार्थायां वृत्तौ तु स्वार्थविशिष्टार्थानारोपसंक्रमात् सर्वत्रैव वृत्तौ तदस्तीति व्याव
र्त्यालाभाद्विग्रहवाक्योपपदानां सामानाधिकरण्यं वृत्तिघटकपदेष्वारोप्य दोषस्य सुपरिहरत्वादित्यपास्तम् वृत्तेर्जहत्स्वार्थत्वपक्षेवि

शेषणेन्त्रकारणाविधिस्वनिष्ठविशेष्यतामानत्यागेपि सर्वथा स्वार्थत्यागाभावात् अजहत्स्वार्थायां वृत्तौ त्वदुक्तरीत्या सामानाधिकर
ण्यसत्त्वाच्च पुम्वद्भावापत्तिर्वा हा विग्रहवाक्योपपदसामानाधिकरण्यस्य वृत्तिघटकपदेष्वारोपे प्रयोजनाभावात् न चाजहत्स्वार्थावृत्ति
रितिपक्षे दर्शनीयाभार्य इत्यादौ वृत्तौ सामानाधिकरण्यसत्त्वेन पुम्वद्भावापत्तिरिति वाच्यम् अथेह पुम्वद्भावः कस्मान्न भवति दर्शनीया
भार्य्येति अथ मतमेतत् प्राक् समासाद्यत्र सामानाधिकरण्यं तत्र पुम्वद्भावो भवतीति चार्थे द्वन्द्व इति सूत्रभाष्योक्तेर्वृत्तौ वृत्तेः प्राक्य
त्र सामानाधिकरण्यं तत्र पुम्वत्वमप्रवृत्तेर्दोषाभावात् अस्तु वा त्वदुक्तरीत्या प्राप्तभार्य्य इत्यादौ पुम्वद्भावसाधनम् प्राप्तोदक इत्यादौ वृ
त्तिविग्रहयोः समानार्थकत्वन्तु दुर्घटमेव समानविशेष्यकत्वमेव समासार्थत्वमिति तु वक्तुमशक्यम् यत्कर्मक प्राप्तिकर्त्रभिन्नमुद
कमिति विग्रहार्थस्तोदककर्तृकप्राप्तिकर्मेति इत्यर्थस्य तथा स्वीकारेण समानविशेष्यकत्वाभावादिति दिक् अवयवप्रसिद्धेर्वलीय
सी सहचरिता सहचरितयोः सहचरितस्यैव ग्रहणम् तेन विशब्दसाहचर्य्यादिति एषपिपक्षा वा च काम्नुपसर्गोसि तथापि तस्य पुं
स्त्वकत्वाभावात्पुंसि विभक्त्या व्यवधानादेरनन्तरं जयतिर्न सम्भवतीति भावः यत्तु कैयटः वहुविजयति वनमित्यत्र जहत्स्वार्थायां वृत्तौ
वेरानर्थक्यादिह चार्थवतो ग्रहणाद् जहत्स्वार्थायामपि तदपस्योपसर्ज्जनत्वाद् ग्रहणमिति विपराभ्यां जेरिति सूत्रे आह तत्तु प्रथमप
क्षेनैरर्थक्यस्यैव ग्रहणे द्विशेष्यता रूपार्थस्यैव त्यागोच्चारुद्धामिति तेज जहत्स्वार्थत्वाभावाच्चाजहत्स्वार्थायामुपसर्ज्जनत्वेपु

प॰दी॰ पसर्ज्जनप्रतिषेधाभावाद्गौणत्वाभावेन गौणमुख्यन्यायाप्रवृत्तेश्चेत्युक्तमित्युद्योते स्पष्टम् । नन्वेवमपि वेजयसीत्यत्रानुपसर्गाद्धिः परो
६८ जयतिः संभवत्येव वेदित्यस्य स्थानिवद्भावाद्ग्रहणेनं ग्रहणात् न च विरिविमत्पन्नस्योपधानुमानिक आदेशेन विशब्दस्येति कैयटो
क्तरीत्या न दोष इति वाच्यम् विभक्त्युत्पत्त्यनन्तरं गुणप्रवृत्तावपि विशब्दान्त्यवर्णावच्छेदेन विकारसत्त्वात्तस्याप्येकदेशविकृतत्वम ।
स्त्येवेति लौकिकैकदेशविकृतन्यायेनाविकृत्वानिर्देशसंभवात् एवं वीजयत इत्यत्रैकादेशस्य पूर्वान्तवद्भावेनापि विशब्दान्तरो जयतिः सं
भवत्येव न च पूर्वकार्य्यकर्त्तव्येऽन्तवद्भावोऽत्र तु पूर्वस्य न किञ्चित्कार्य्यमित्यदोष इति कैयटोक्तं युक्तमिति वाच्यम् ॥ सर्वासामित्यादौ पूर्व
स्य कार्य्यासंभवेनान्तवद्भावानापत्तौ सर्वनामत्वाभावात्सुडनापत्तेः यत्तु कैयटो जीवनमर्द्धाधिकविकारे एकदेशविकृतन्यायस्याप्रव
त्तेराघदोषस्य परास्तत्वात् द्वितीयदोषोपि पूर्वस्मादव्यवहितस्यैव पूर्वसम्बन्धिनि विधेये इत्याश्रयणात्परिहरणीयः नत्वत्र सर्वना
म्नो विहितस्यामः सुटि वैरव्यवहितं किञ्चिद्विधेयं वर्त्तत इति तच्चिन्त्यम् अर्द्धाधिकविकारयोरेकदेशविकृतन्यायाप्रवृत्तेरसत्त्वे नैस
त्त्विपि कैयटमतेऽभावेन तन्मतरीत्यैव दोषापादनात् पूर्वसम्बन्धिनि पूर्वस्मादव्यवहितस्यैव विधेये इत्यर्थे चमानाभावात् ओहणमि
त्यादौ पूर्वस्मादव्यवहितस्य पूर्वसम्बन्धिविधेयाभावेन णत्वानापत्तेश्च ह्रापयते पलायते इत्यादौ लत्वानापत्तेश्च उपसर्गस्यायतावितिभा ६८
सूत्रभाष्यविरोधापत्तेश्चेति यत्किञ्चिदेतत् एतदस्वरसादेव कैयटेन सूत्रशेषे पक्षि वाचिनो विशब्दस्य संभवेनुद्वयोरपि दृष्टापचार

त्वात्परस्परसाहचर्य्यादुपसर्गग्रहणं व्याख्येयमिति चेन्न यद्यपि तावदपंपराशब्दो दृष्टापचार उपसर्गश्चानुपसर्गश्चायन्तु विशब्दोऽदृ
ष्टापचार उपसर्ग एव तस्य कोन्यः सहायो भवितुमर्हत्यन्यदत उपसर्गादिति न्यायश्रुते भाष्यस्यासंगतत्वाद्विशब्द इत्यस्य जिधातुसम्बन्ध
इत्यादिपूरणपिच्चार्थद्वारा साक्षाज्जिधातुसम्बद्धो विशब्दोऽदृष्टापचारो दृष्टान्यार्थक इत्यर्थः कार्य्य इत्युद्योत एव समाधानात् तस्यायमा
शयः वीजयतः वेजयसे इत्यादौ विशब्दस्याख्यातार्थकर्त्रनभद्वारा जिधात्वर्थेऽन्वयेपि साक्षाद्दत्त्वयाभावात् एवं नहि जिधातुसंबद्धद्वा
राशब्दसाहचर्य्यस्य विशब्देपि वक्तुं शक्यत्वात् तथैवमकुलौनोक्तं भाष्ये इति चेन्न पराजयति सेनेत्यत्र घन्तरितः पराशब्दस्य जयतिना सम्ब
न्धो वीजयतः वेजयसे इत्यादौ चैकान्तरितः संबन्ध इति विशेषाद्भाष्येन तथोक्तेः एवमपि वद्गु विजयति वनमित्यत्रापि घन्तरितः सम्बन्धो
विशिष्ट इतिन्वेन्नहि परस्परसाहचर्य्यप्रतिपादने भाष्यतात्पर्य्यमवसेयम् । अत एवोक्तं कैयटस्सङ्ग्निरिणीति दिक् क्तत्वोर्थग्रहण
द्दिषाग निरेति ननु द्विस्त्रिरिति सूत्रे सूच इति न्यासस्य शेखरे सिद्धान्तितत्वादस्या अनित्यत्वे कथमिदं ज्ञापकस्यैवाभावादिति चेन्न ।
सूत्रमनेन तस्य ज्ञापकत्वात् तथा न्यासे तु यावत्पुरानिपातयोर्लडिति सूत्रे निपातपदस्य ज्ञापकता बोध्या ननु सुच इति न्यासो वक्तु
मशक्यः तथा सति चतुष्करोतीत्यादौ सुच इति विकल्पसिद्ध्यादिदुदुपधस्येति नित्यषत्वापत्तेः उणादीनामव्युत्पन्नत्वे नाप्रत्ययइ
ति निषेधाभासेः प्रकरणे प्रकरणमसिद्धं न यो ये योमो सिद्ध इति पक्षेणापि न दोषस्तिराकरणप्रणतस्य भाष्ये दूषितत्वादिति चेन्नन्य

व्यक्तिपक्षे पावस्तु जनन्तविषयकलक्षणव्यक्तीनामुपलक्षवेन सुजन्तचतुश्शब्दविषयकलक्ष्यस्याप्युपलक्षतत्वात् नच सुचं इत्यस्यासिद्ध
त्वाच्चतुश्शब्दविषयकलक्षणस्योपलक्षेणैव न यथाः पवादविषयेन दुत्सर्गाप्यनक्तेरिति वाच्यम् एवं तु सुच इत्यस्य द्वित्रिशब्दमात्रवि
षयत्वेः सन्देहा यत्नथैव वक्तव्ये सुच इति सामान्यशास्त्रप्रणयनसामर्थ्यादिदुदुपधस्येत्यनुवृत्तिसामर्थ्याच्चतुश्शब्दविषयकलक्ष
णोपलक्षवद्दारा चतुश्शब्देपि प्रवृत्तिसंभवात् जातिपक्षे तु अन्तत्वरूपान्नमधिकरण्येन विधेयान्वये द्वित्रिरित्येवं वक्तव्ये सात् सु
च इति सामान्यशास्त्रप्रणयनानु अवच्छेदकावच्छेदेन विधेयान्वयासिद्धानरवान्नापि नित्यवत्त्वं बाधित्वा चतुश्शब्दे विकल्प
सिद्धेः नन्वेवं तर्हि कृत्वोर्थ इति न्यासेप्युक्तरीत्या चतुष्करोतीत्यत्र दोषाभावाद् सिद्धत्वेन दोषप्रतिपादनपरः शेखरोऽसङ्गत इ
ति चेन्न कृत्वोर्थत्वावच्छेदेन विसर्गस्य षत्वान्वये यत्र्व कत्वान्करोतीत्यादौ षत्वप्रसङ्गादिदुदुपधस्येत्यनुवर्त्य तदुपयत्नेन कृत्वो
र्थत्वसामानाधिकरण्येन विधेयान्वयेन द्वित्रिशब्दांशे चारितार्थ्येन चतुश्शब्दे विकल्पस्यासिद्धत्वादिदुपधस्येति नित्यषत्वापत्ते
रित्याशयात् एतेनैतेन द्वित्रिरिति सूत्रमपनीयतत्स्थाने सुच इत्येव सुवचम् वनोरचेत्यत्रेव वन्नन्तान्तस्येत्यर्थवत् सुजन्तान्तस्येत्य
र्थात्परमद्विष्करोतीत्यादेरपि सिद्धत्वादिति शेखरः प्रत्युक्तः कृत्वोर्थग्रहणस्य साहचर्यान्नित्यत्वज्ञापनार्थमावश्यकत्वात् चतुष्क ६९
रोतीत्यत्र त्रिपाद्यां पूर्वस्मात् परस्यासिद्धत्वादिदुदुपधस्येति नित्यषत्वापत्तेश्चेत्यपालम् तेन दीधीवेवीटामित्यत्रेति यत्तु सत्यपि साह

चर्य्ये आगमस्यैव ग्रहणं न धातोरित्यत्र व्याख्यानस्यैव शरणत्वयाः नित्यत्वज्ञापने प्रयोजनाभावादिति वुधमनोरमायां नरहरिरिति
तच्चिन्त्यम् इटो धातोर्ग्रहणेहि प्रकृतित्वाविशेषेप्यल्पाच्तरत्वात्तस्यैव पूर्वनिपाते न भाव्यमागमग्रहणे त्वागमापेक्षया प्रकृतेरभ्यर्हितत
त्वादीधीवेव्योः पूर्वनिपात इति सूत्रकृदुक्तन्यासे नैव निर्द्धारणं व्याख्यानापेक्षत्वादिति कौस्तुभे एवं व्यक्तम् यत्तु कृत्वोर्थ इति न्यासपक्षे
साहचर्यान्नित्यत्वे ज्ञापकन्तु पिरार्द्धधातुकयोरिति वक्तव्ये सार्वधातुकार्द्धधातुकयोरिति सूत्रे सार्वधातुकग्रहणमन्यथार्द्धधातुकसा
हचर्य्यादार्द्धधातुप्रकृतिकपिन्नन्यपेकार्य्यविज्ञो हरिषु चतुर्थिन्यादौ गुणवारणन्नैव यथ्थ प्रसङ्ग इति तच्चिन्त्यम् धातुप्रकृतिकत्वेन साहच
र्य्ये हरिषिन्यादौ गुणवारणेपि लूपु धूपु इत्यादौ गुणापत्तेः धातुरिति संशब्दनेन धातुप्रकृतिकत्वेन तद्ग्रहणे तु तदपेक्ष्य लाघवात्ति
ङ्शिद्भिन्नत्वेनापि साहचर्य्यग्रहणापत्तौ अर्वन शर्वन शब्दादौ वनिपिता दशेपिति गुणस्याचारितार्थ्ये न भवतीत्यादौ शपि गुणेन स्या
त् नच तिङ्शिद्भिन्नत्वेनापि साहचर्य्ये चक्रमश्च कं भूसुवोस्ति ङीत्यस्यैव पर्य्यप्रसङ्गादिति वाच्यम् शिद्भिन्नत्वेन साहचर्य्यग्रहण
स्यैवमपि दुर्वारत्वात् नच शेषपदोपस्थित तिङ्शिद्भेदवत एवार्द्धधातुकत्वात् र्द्धधातुकपदेन तथैवोपस्थितेरुक्तारूपेण साहचर्य्या
नाश्रयणमिति वाच्यम् तिङ्शितोरन्यस्मिन्सत्त्वेन नयोरार्द्धधातुकसञ्ज्ञापत्तेः तिङ्भेदवतः शिद्भेदवतश्चार्द्धधातुकसञ्ज्ञाविधाने
नशिद्भिन्नत्वेन साहचर्य्यस्याग्रहीतुं शक्यत्वात् सुपः पकारेण महिङो ङकारस्यैव समुदायानुबन्धत्वेन सुपः पित्वाभावात् हरिषिन्यादौ

१० टी. दोषाभावाच्चेतोः सुधीत्यादौ नुखरीत्यनुवृत्त्या प्रत्याहारग्रहणं नेतिपक्षेरेतस्मिन्नके सौरूत्वर्थाभावन्नैपि न दोष इत्यन्यत्र विस्तरः एते
१० नैतेनापि दाद्धातुकयोरिति न्यासे इष्टापत्तिमिव वक्तव्या सार्वधातुकमपिदिति सूत्रवैयर्थ्यशङ्कायां मृष्ट इत्यादौ वृद्धिनिषेधरूपसमाधान
पर शेखरः प्रत्युक्त इत्यपास्तम् उक्तरीत्या साहचर्य्येण निर्वाहेणेष्टापत्तेरनभिप्रेतत्वात् यत्त्वित्यादिना कस्यचिन्मतमनूद्य तत्र दर्शि
तलाघवस्य तिरस्कारेणापि स्थिति समासप्रविष्टपरद्वयप्रयुक्तस्य सार्वधातुकपदापेक्षया गौरवस्यैव ध्वनितत्वाच्च सार्वधातुकसन्नि
प्रविष्टपरद्वयप्रयुक्तन्तु गौरवन्नेत्यप्टक्कए काल्प्रत्यय इति सूत्रे भाष्ये ध्वनितम् मात्रा गौरवन्त्व किञ्चित्कतरमित्यन्यत्रेतिदिक् श्रुता
नुमितयोः श्रुतसम्बन्धो वलीयान् अभेदकागुणाः किंभेदकाः गुणाः विधेयाएव विषयेत्विति यत्त्वेन तादिनिर्देश इत्यन्तमनूद्य दूषणा
भिधानमसङ्गतमिति तन्न चोर्ज्जकारेऽन्तरतमादीर्घासिद्ध्यापत्तेः बहुवचनेभल्यैरित्यत्राप्येवमिति चाच्चेन्त्यमत्रैवस्वर्ण्याभावरूपैकैक श्रुत्या
सूत्राणां कैयटमतेपाठादच्सञ्ज्ञायामुदात्तादेरहितएव सत्त्वेन तत्रैव दीर्घसञ्ज्ञया अपि जायमानत्वेनान्तरतमदीर्घादिसिद्धेः बहु
वचनेभल्यैरित्यत्राप्येवमेवातएव वधारणादावाद्युदात्तनिपातनेनोदयत्वाद्धि वस्तासिद्धिः न त्वेतदर्थं गुणानामभेदकत्वपक्षाश्रय
णस्यावश्यकता अतएव घोर्विमलघोरित्यादौ अन्तरतमइदात्तादिवृद्धिसिद्धिः वस्तुतस्त्रैस्वर्य्येणपाठपक्षेपि दीर्घवृद्ध्यादिसञ्ज्ञा १०
याभाव्यमानत्वान्न दोषः अप्रत्ययपदेन तद्रूपेण विधीयमानप्रत्यय एवनिषेधेन तदेकदेशानुमन्याबोध्यमानभाव्यमानेतिपरि

भावयापि तद्रूपेणोपादानएव निषेधात् अतएवैकोगुणेनीग्रहणाभावे अनेनैनस्यान्तरतम्यादृकारोनुनासिकः प्राप्नोतीत्युक्तं भाष्ये
किञ्चाक्षरसमाम्नाये यत्किञ्चिद्ग्रहणविशिष्टस्य पाठे सावर्ण्यान्तद्भिन्नगुणकस्यापि ग्रहणम् न चोदात्तादिगुणभेदेन सावर्ण्याभा
वः उदात्तत्वादीनां वास्त्वत्वेन तद्भेदेपि सावर्ण्यसत्त्वात् बहुवचनेभल्यैरित्यादौ त्वन्यपक्षे अ अ इति सूत्रस्य भाष्योक्तरीत्यैकशेषेण
वृसिद्धेः यदप्यणग्रहणाननुवृत्तिपक्षेः नलोचरितार्थेन तपरसूत्रेणएसुपरत्वादणुदित्सूत्रबाध इति भेदकत्वपक्षोपष्टंभकत्वेनो
पन्यस्तं भाष्यं तदप्येकदेश्युक्तम् उक्तरीत्याभेदकपक्षाश्रयणे फलाभावात् यदपि यत्वभेदकत्वपक्षे तपरसूत्रस्यानवकाशत्वा
त्सवर्णग्रहणबाधकत्वमभिधाय तत्रैव पक्षे नियमार्थमित्युक्तं शेखरे नद्व्याहतमिति तन्न युक्तम् गुणानामभेदकत्वपक्षे परत्वाद्बाध
मभिधाय गुणानामभेदकत्वे पुनरपि वैयर्थ्येन गुणानामभेदकस्य न त्वनवकाशत्वाद्बाध इत्युक्तं क्वेदानीं व्याहतिरिति शब्देन्दुशेखर
दोषोद्धारे स्पष्टीकृतमस्माभिरित्यलम् बाधकान्येव निपातनानि ननु घोर्विमलघोः प्रदोष इत्यादौ णित्त्वे वृद्धिरान्तरतम्यादुदात्ता
यनुदात्ता श्रेष्यन्ते न तु तत्रोपपत्तिः वृद्धिशब्देन तैजाराकारः प्रत्याय्यते सचाचार्य्येणाक्षरसमाम्नाये यत्किञ्चिद्गुणकः प
ठित इति तेनैव प्रवर्त्तितव्यम् नत्वितरगुणकेनापि नचतेन सवर्णानां ग्रहणमिति मन्तार्थसिद्धिः उदात्तादिजनकयत्नस्याभ्य
न्तरकार्य्यकारित्वेनाभ्यन्तरत्वात्तद्भेदे सावर्ण्यस्यैवाभावादत आह अभेदकाउदात्तादयः स्वशब्दोच्चारणं विना भेदेन न विवक्षि

प॰टी॰ तात्पर्यम् अत्र च ज्ञापकमस्थिदधिसक्थ्यक्ष्णामनङुदात्त एवोच्चारणीय उदात्तग्रहणम् एतदपि प्रत्यासत्त्या शास्त्रे उच्चारितो ये
७१ गुणस्तद्विषयेऽपीति लौकिके प्रयोगे गुणभेदकः अत एवैषां सावर्ण्यानुपयोगित्वान्तरतमपरीक्षोपयोगित्वसाम्याद्भाष्यानुक्ताना
मपि वात्स्वप्रयत्नेषु परिगणनं कैयटप्रभृतिभिरुरीकृतम् स्पष्टं चेदं तुल्यास्यसूत्रे भाष्ये नन्वेवं घटवानित्यत्र मतोर्मस्यान्तरतम्या
दनुनासिकवकारः स्यात् लोके हि मुखेनापि कृते चौर्य्यस्थानके शेसो प्रत्यभिज्ञाय निगृह्यते अत एव यूस्त्र्याख्याविस्यादावन
न्त्वेऽपि न तद्गुणके कारादिग्रहणमत आह ॥ भेदका उदात्तादयः अणुदित्सूत्रे उदिदिति वक्तव्ये ऽण्ग्रहणमिह ज्ञापकम् तद्धि सा
म्यन्ते त्वत्रानुनासिकयकारस्य यग्रहणेन ग्रहणाद्धि त्वार्थं गुणानामभेदकत्वे निरर्थकं स्यादिति वृद्धिसूत्रे कैयटे स्पष्टम् अण्ग्रह
णप्रत्याख्यानपक्षे तु नद्यादीनामिति निर्देशो ज्ञापको बोध्यः अत एव च नसर्व्वाघुदात्तनिपातनं करिष्यते वधादेश आघुदात्तनि
पातनं करिष्यत इत्यादि तत्र तत्र भाष्यकृतः एतेन भाव्यमानेन सवर्णानां ग्रहणं नेति परिभाषया सवर्णग्रहणप्राप्तस्य जातिग्रहणप्रा
प्तस्य च निषेधः द्वव गुणभेदकत्वप्राप्तस्यापि निषेधस्तेन घ वदित्यादौ नानुनासिको वकार इति परास्तं न्दुशेखरादौ प्रतिष्ठितः सिद्धा राम
न्तः प्रत्युक्तः अमृन्निति तृन्तं चोर्ञ्जकारेऽन्तरतमदीर्घासिद्ध्यापत्तेः बहुवचनेभ्रूत्वादित्यत्राप्येवम् न चान्तरतमविधाने दृष्टापत्तिः ७१
नमो वृक्षेभ्यो हरिकेशेभ्य इत्युदात्तानुदात्तयोरेकारयोरेकाकारश्रवणप्रसङ्गात् न चानुदात्त एव सर्वत्र विधीयतां वृक्षेभ्य इत्य

त्र तु तस्मिन्निति निर्दिष्ट इत्येव नः प्रातिपदिकान्तोदात्तत्वे नष्टसिद्धिरिति वाच्यम् लक्ष्ये लक्षणस्येति न्यायविरोधात् विकारान्यानुपूर्व्यं क्वचिन्न त्यक्तेत्व
ये व सिद्धान्तितं त्वादतस्तत्र तत्राभेदकत्वाश्रयणे दैवेष्टसिद्धिर्वक्तव्या ॥ तथा हि कौ गुणवृद्धी इत्यत्रेग्ग्रहणाभावे जनेर्नस्यान्तरतम्या
द्ङ्कारोऽनुनासिकः प्राप्नोतीति भाष्य उक्तमिति दिक् अत एव तपरसूत्रे ऽण्ग्रहणानुवृत्त्यावनणि तपरेच्चारितार्थ्येन समकालग्रह
णेनाण्सु परत्वात्सवर्णग्रहणं बाध्यत इत्युक्तं भाष्ये यत्त्वभेदकत्वपक्षे तपरसूत्रस्यानवकाशत्वात्सवर्णग्रहणबाधकत्वमभिधायत
त्रैकपक्षे नियमार्थमित्युक्तं तपरसूत्रे शेखरे तद्व्याहतं स्पष्टमेव अनयोश्च पक्षयोर्लक्ष्यानुरोधाद्व्यवस्था अत एव उं आदेशः स्या
न्निवत्वान्मय उञो वो वेति प्रकृतिभावापवादभूते आन्तरतम्यादनुनासिके वकारे किं त्विति तीति रूपं मनोरमायां प्रतिपादितं स्पष्टं च्वेद
मीदूसूत्रे भाष्यकैयटयोः ॥ ॥ इति श्रीमन्मन्नूदेवविरचिता परिभाषेन्दुशेखरटीका समाप्ता ॥ ॥ सम्वत् १९ ३४ ॥

॥ इति श्रीमन्मन्नूदेवविरचिता परिभाषेन्दुशेखरटीका समाप्ता ॥

